श्रीः

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाङ्कितभव्याभशतपत्त्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दामोदमोहितम् ॥ २ ॥

स्तबकः—४२

चौखम्बा-संस्कृत-ग्रन्थमाला ।

(ग्रन्थसंख्या १३)

—:०:—

विधिरसायनम् ।



सर्वतन्त्रस्वतन्त्रश्रीमदप्पयदीक्षितविरचितम् ।

अडकरोपनामक-श्रीमुकुन्दशास्त्रिणा परिशोधितम् ।



काश्याम् ।

विद्याविलास-नाम्नि यन्त्रालये, श्रीयुतबाबूहरिदासगुप्तेन,

मुद्रयित्वा प्रकाशितम् ।

सन् १९०१ ईस्वी

वैक्रम सम्वत् १९५८

प्रथमम् ।



॥ श्री ॥

विधिरसायनभूमिका ।

इह खलु संसारचक्रे विपरिवर्तमानानां चत्वारः पुरुषार्थाः धर्मार्थकाममोक्षाख्याः सकलश्रुतिस्मृतीतिहासपुराणादिषु श्रूयन्ते जनैः सेव्यत्वेन च तथा च महाभारते भीमसेनवचो युधिष्ठिरं प्रति ।

धर्मं चार्थं कामं च यथावद्वदतांवर ।
विभज्य काले कालज्ञः सर्वान्सेवेत पण्डितः ॥
मोक्षो वा परमं श्रेय एषां राजन्सुखार्थिनाम् ।

इति तत्र निरतिशयानन्दलक्षणस्य मोक्षस्यैव मुख्यं पुरुषार्थत्वम् धर्मादीनां तु तत्साधनतामात्रेण तत्रापि धर्ममात्रं यथायोगं सर्वेषां साधनं स च चोदनालक्षणत्वेन मीमांसाशास्त्रं वक्ति तदुक्तं भट्टपादैः ।

धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम् ॥

इति स च प्रवृत्तिनिवृत्त्यात्मकतया द्विविधः द्विविधस्याप्यस्य पुरुषार्थसाधनतोक्ता वृद्धैः ।

प्रवृत्तिसंज्ञके धर्मे फलमभ्युदयो मतः ।
निवृत्तिसंज्ञके धर्मे फलं निःश्रेयसं मतम् ॥

इति द्विविधोऽप्ययं त्रिविधः अपूर्वविधिर्नियमविधिः परिसंख्याविधिश्चेति तदुक्तम् ।

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥

इति सोऽयं भाष्यवार्तिकादिग्रन्थनिरूपितोऽपि तेषु मन्दमतीनां व्युत्पित्सूनां दुरवगाहतामवलोक्य स्वल्पीयसा ग्रन्थेन प्रकारत्रयात्मकविधिस्वरूपं बोधयितुं सञ्जातकरुणः पदवाक्यप्रमाणपारावारीणः श्रीमदप्पय्यदीक्षितः सिद्धान्तसार-नामकं विधिरसायनं निर्ममे ।

तदेतच्चिरकालमन्वेषयद्भिर्गोविन्ददासमहाशयैः ।

काशी-दरभङ्गा-कलकत्ता-तञ्जोर-पद्दकोटा-

—:०:—

अनन्तशयनप्रभृतिनगरेभ्यो महता प्रयासेन द्वादशपुस्तकानि संपाद्यापि पूर्तिमगच्छतो ऽपि अस्य ग्रन्थस्य परीक्षकजनसन्तोषाय प्रकाशनाय प्रोत्साहितः खण्डितत्वं चास्य अन्ते २२१ पृष्ठे पङ्क्तौ २३ अन्यदिह वक्तव्यशेषं लक्षणत्रयसाधारणमग्रे वक्ष्यत इत्युल्लेखात् अग्रे च तस्य निर्दुष्टपरिसंख्याविधिलक्षणस्य चानुपलम्भादवगम्यते । एतत्पुस्तकं मुद्रणावशिष्टं येषां महाशयानां समीपे विद्यते ते एतत्पुस्तकमुद्रणाभिलाषिगोविन्ददासमहाशयसमीपे मुद्रणार्थं प्रेषयेयुरिति भूयोभूयः प्रार्थये

एतद्ग्रन्थकर्तुरप्पय्यदीक्षितस्य कालदेशवंशवर्णनाविस्तरस्तु तत्कृतसिद्धान्तलेशभूमिकायामस्मद्गुरुचरणैः सुनिरूपित इति तत एव विभावनीयः ॥

शोधने चास्य एकं पुस्तकं किञ्चिन्न्यूनं शुद्धमतिदुर्लभमंस्कृतपुस्तकसंग्रहशीलानां श्रीगोविन्ददासमहाशयानाम् अपरं च एतदपेक्षया न्यूनं शुद्धं प्राचीनं च धर्माधिकार्युपाह्वपण्डितनागेश्वरशास्त्रिणां चावलम्ब्य चौखम्भासीरीजाध्यक्षश्रीयुतबाबूहरिदासगुप्तमहाशयानुमत्या तदीयविद्याविलासयन्त्रालये मुद्रणकार्यं समापयम् आयामपुरःसरं शोधिते ऽपि या नैसर्गिकप्रामाणिदोषमूलाः मुद्रणादिदोषजाश्चाशुद्धयस्ताः संशोधयन्तु गुणैकपक्षपातिनो विद्वांसः सफलयन्तु च मत्परिश्रमम् प्रसीदतु चानेनव्यापारेण सर्वान्तर्यामी नारायण इति शम् ।

अडकरोपनामकमुकुन्दशास्त्री ।

शुद्धिपत्रम् ।

पृ०	पं०	शु०	अ०
६	२	प्राप्त	प्राप्त
१४	१	तस्मात्	तस्मा
१६	२५	व्रीहय:	व्रीहय:
२२	३	गुण्यं	गुण्य
२२	८	मान्त्य	मन्त्य
२६	१०	ऽग्नीषोमीय	ऽग्नषो
२७	१८	होत्रं	होत्र
२८	१२	नेक	नक
२८	१३	सार्य	मार्य
२६	२	भेदा	भदा
३३	१३	प्वावि	प्वावि
४५	५	॥६॥	॥८॥
६६	११	पूर्वक	पुक
७१	३	दण्डं	दण्ड:
७६	५	पंचाग्नि	चाग्नी
८२	४	पितत्वात्	तत्वत्
८५	२१	चेधातगडु	नधातागडु
८७	२	सान्नाय्य	न्नाय्ये
८८	११	मननुष्ठान	ममनुष्ठान
८६	१४	क्लृप्त	क्लप्त
६८	७	लभ्यते	लभ्यत
१००	०।१०।१	प्राप्त	प्रप्ता

पृ०	पं०	शु०	अ०
१०१	७	दृष्टि विशेषं	दृष्टिं विशेषं
१०३	२५	नावस्थान	नावनांस्थ
११२	८	हृहृद्रय	हय
११५	२५	दर्शितत्वात्	दर्शित्वा
११६	७	त्यवमान	पमान
११८	२३	प्यवमान	प्यबमान
१२९	६	सत्त्वेन	सत्त्वन
१४८	१८	दर्शं	दर्शं
१५३	२४	विध्यभाव	विध्याभाव
१५५	१३	विध्यन्वय	विध्वन्वव
१५५	२४	विध्यर्थं	विध्यय
१५८	२२	पश्चादावपि	पश्चादपि
१५८	८	कथं	कथ
१५८	१८	शाक्या	शाक्या
१६१	२४	प्रजापत्ति	प्रजाति
१६५	२	त्वाय	त्वय
१७४	१४	॥ ३१ ॥	॥
१७५	५	॥ ३२ ॥	॥
१८१	२०	दैपिक	देपिक
१८२	१४	अतः फलान्तरेण	अतफला
१८३	३३	क्रतु	क्रुत
१७७	७	३८	३७
१८८	१६	४०	३८
२००	२१	४१	४४

श्रीगणेशाय नमः ।

विधिरसायनम् ।

श्रीमदप्पयदीक्षितविरचितम् ।



उद्घाट्य योगकलया हृदयाब्जकोशम्
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥ १ ॥

जन्मस्थेमलयं समस्तजगतां यस्यैव लीलायितं
यस्मिन्नायतते भवस्थिरमहापाशक्षयः प्राणिनाम् ।
तद्ब्रह्मादिभिरप्यगम्यविभवं विश्वाधिकं शाश्वतं
साम्बं ब्रह्म रसाञ्चलरसिकं पश्येयमन्तर्दृशा ॥२॥

यत्कुमारिलमतानुसारिणा
निर्मितं विधिरसायनं मया ।
पद्यरूपमनतिस्फुटाशयं
तत्सुखावगतये विविच्यते ॥ ३ ॥

प्रारिप्सितप्रकरणाविघ्नसमाप्तये सूत्रकारस्य महर्षेरनुस्मरणरूपं मङ्गलमाचरन्नेव प्रकरणारम्भं[1] तावदाक्षिप्य समाधत्ते ।

---

१ शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चित इति प्रकरणलक्षणम् ।

विख्याता मुनिवर्यसूक्तिषु विधा
स्तिस्रो विधिस्रोतसाम्
आचार्यैर्विशदं विविक्तविषया-
स्ताश्च व्यवस्थापिताः ।
किं तत्रास्ति विचार्यमार्यमथिते
मार्गे निसर्गोज्ज्वले
नानोदाहरणैस्तु ताः
प्रविशदीकर्त्तुं प्रवर्त्तामहे ॥ १ ॥

मुनिवर्यस्य भगवतो जैमिनेः सूत्रेषु विधिर्वा स्यादपूर्वत्वात् । नियमार्थो वा श्रुतिरुच्यते । परिसंख्या इत्येवमादिषु त्रयोविधिप्रकाराः प्रसिद्धाः । अपूर्वविधिर्नियमविधिः परिसंख्याविधिश्चेति । ते च भट्टपादैः परस्परासंकीर्णविषयतया स्पष्टमेवोपपादिताः । तत्र तत एव निरवद्ये ग्रन्थकारैश्च बहुभिर्निष्कर्षं मापिते ऽपूर्वविध्यादिविभागे नूतनं किं चिद्विचारणीयं नास्त्येव यद्यप्येवं तथाप्यपूर्वविध्यादीनां द्वादशस्वप्यध्यायेषु विप्रकीर्णैर्दिव्यापूर्वविध्यादिलक्षणविचारव्याजेन तत्रतत्र प्रदर्शनीयैरुदाहरणविशेषैस्तमेवार्थमतिस्पष्टीकर्त्तुं प्रकरणमिदमारभ्यत इत्यर्थः । अथ,

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते॥

इति श्लोकेनाचार्यैरपूर्वविध्यादीनां लक्षणमुखेन विभागः कृतः। तत्र व्रीहीन् प्रोक्षतीत्यत्रापूर्वविधिः। एतदभावे हि दर्शपौर्णमासिकेषु व्रीहिषु प्रोक्षणं कथमपि न प्राप्नोति व्रीहीनवहन्तीति नियमविधिः। एतदभावे पुरोडाशार्थमुपात्तेषु व्रीहिषु तुषविमोके लोकसिद्धकारणत्वेनाक्षिप्ततयाऽवघातः प्राप्नोत्येव किं तु लोकसिद्धकारणत्वाविशेषात्कदाचिन्नखविदलनमपि प्राप्नोतीति पाक्षिकी तस्याक्षेपतः प्राप्तिः। इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते इतिपरिसंख्याविधिः। एतदभावे ऽप्यगृभ्णन् रशनामिति-लिङ्गादग्निचयनप्रकरणाम्नातो मन्त्रस्तत्राश्वरशनाग्रहणे नियतमेव प्राप्नोति किं तु लिङ्गाविशेषाद्गर्दभरशनाग्रहणे ऽपि प्राप्नोतीति तत्र चान्यत्र च प्राप्तिः। यद्यपि नियमपरिसंख्योदाहरणयोः पाक्षिकी नियता च प्राप्तिर्वस्तुतो नास्त्येव तुषविमोकेन कार्येणाक्षिप्ततया ह्यवघातस्य पाक्षिकी प्राप्तिर्वक्तव्याऽऽक्षेपात्प्रागेव व्रीहीनवहन्तीति प्रत्यक्षशास्त्रं झटिति प्रवर्त्तते तदनन्तरं प्रत्यक्षशास्त्रसिद्धेनैकेनोपायेन नैराकाङ्क्ष्यादनियतोपायाक्षेप एव न प्रवर्त्तते। एवं प्रत्यक्षशास्त्रेणाश्वरशनाग्रहणे झटिति विनियुक्तस्य मन्त्रस्य तेनैव नैराकाङ्क्ष्याद्गर्दभरशनाग्रहणसाधारण्येन लैङ्गिकविनियोगक-

१ [illegible]

ल्पनं न प्रवर्त्तते । एवं च नियमपरिसंख्ययोरप्यपूर्वविधिवद्वस्तुतोऽत्यन्ताप्राप्त एव विषयस्तथापि नियमपरिसंख्याशास्त्रयोरप्रवृत्तौ ऽर्थाक्षेपेण नखविदलनस्यापि कदाचित्प्राप्त्यावघातस्यापि पाक्षिक्येव प्राप्तिः स्यात् । मन्त्रस्य लिङ्गाविशेषेण गर्दभरशनाग्रहणेऽपि विनियोगः स्यात् । तयोः प्रवृत्तौ त्वाक्षेपमन्त्रलिङ्गावतारप्रतिबन्धद्वारावघातस्य नियतता मन्त्रस्य गर्दभरशनातो निवृत्तिश्च लभ्यते इति नियमपरिसंख्याविध्योः प्रवृत्तावपूर्वविध्यविशेषेऽप्याक्षेपमन्त्रलिङ्गावतारप्रतिबन्धद्वाराऽवघातनियमेन गर्दभरशनायां मन्त्रवर्जनेन च फलवत्त्वात्फलतो नियमपरिसंख्याव्यपदेश इत्यपूर्वविधितस्तयोर्भेदः । यद्यपि नियमे नखविदलनादिनिवृत्तिः परिसंख्यायां गर्दभरशनादिनिवृत्तिरितीतरनिवृत्तिलाभ उभयत्राप्यविशिष्टः । अवघातेनैव तुषविमोकः कार्यः अश्वरशनायामेव मन्त्रः कार्य इत्येवकारेण फलविवरणमप्यविशिष्टं तथाप्यवघातशास्त्रेणावघातनियमस्याक्षेपतोऽवघाताऽप्राप्त्यंशेऽवघातप्रापणरूपस्याकरणे उपायान्तरसाधारण्येनाक्षेपेणापातत उपायान्तरस्य निराकर्त्तुमशक्यतया तन्निवृत्त्यसम्भवेन नियमस्य प्रथमोपस्थितत्वाद्विधेयगतत्वेन प्रत्यासन्नत्वाच्चाप्राप्तांशप्रापणरूपो नियम एव फलम् । उपायान्तरनिवृत्तिस्तु चरमोपस्थितत्वादविधेयगतत्वेन विप्रकृष्टत्वान्न तदनुनिष्पादिनो न फलम् । परिसंख्योदाहरणे तु द्वयोरपि नित्यप्राप्तिसंभवेन स्वरूपप्राप्तेर्नियमस्य वा फलत्वायोगादितरनिवृत्तिरेव फलम् । एवं नियमपरिसंख्याविध्योः फलभेदे

स्थिते सति एवकारेण फलविवरणमेकतायोगव्यवच्छेदार्थं मन्यथा ऽन्ययोगव्यवच्छेदार्थमिति विशेषो द्रष्टव्यः॥१॥

एवमाद्यश्लोकार्थं मनसि निधाय तत्र कांश्चिदर्थानाक्षेपसमाधानाभ्यां विचारयितुं तदुक्तमपूर्वविधिलक्षणं तावदाक्षिपति ॥

अत्यन्ताप्राप्तियुक्ते विधिरिति-
विषये सप्तमी वर्ण्यते चेत् अ-
व्याप्तिः प्राप्तियुक्तं विषयमुपग-
तेष्वग्निविध्यादिषु स्यात् ॥ अ-
ग्रे इष्टेव सप्तम्यविषमगतये यो-
ज्यते चेत् व्यनीकाभाजोरग्र-
त्वविध्योः प्रथमपदजुषोः स्या-
त्तदा ऽव्याप्तिदोषः ॥ २ ॥

अत्यन्तमप्राप्ते विधिरित्यपूर्वविधिलक्षणमयुक्तम् । तत्र ह्यप्राप्त इति विषयसप्तमी, सति सप्तमी वा स्यात्, आद्ये यो विधिविषयत्वेनान्वेति तस्यैवाप्राप्तिर्वक्तव्या द्वितीये विधिविषयस्य प्राप्तिसत्त्वे ऽपि तदन्यस्य यस्य कस्यचिदप्राप्त्या लक्षणमुपपद्यत इति विशेषः। तत्र विषयसप्तमीपक्षे विधिविषयत्वेनाभिमतस्य सर्वथा ऽप्राप्तिर्विवक्षिता उद्देश्यसम्बन्धित्वेन वा । आद्ये"य एवं विद्वानग्निं चिनुते"

"अग्निहोत्रं जुहोति" "दधि मधु घृतं पयो धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्य"मित्यादिविधिभिः स्वरूपेण प्राप्तानामग्न्यग्निहोत्रप्राजापत्ययागादीनां क्रतुनिमित्तफलादिसम्बन्धार्थेषु "अथातो ऽग्निमग्निष्टोमेनानुयजन्ति" "यावज्जीवमग्निहोत्रं जुहोति" "चित्रया यजेत पशुकाम" इत्यादिविधिषु लोकतः स्वरूपेण प्राप्तानां राजसूयादिसम्बन्धार्थेषु "अक्षैर्दीव्यती"त्यादिविधिषु चाव्याप्तिः स्यात् । द्वितीये वैकृतेष्वग्निविधिष्वतिग्राह्यविधिषु चाव्याप्तिः स्यात् । तथा हि "य एवं विद्वानग्निं चिनुत" इति प्रकृत्य श्रूयते "अथातो ऽग्निमग्निष्टोमेनानुयजन्ति तमुक्थ्येन तमतिरात्रेण तं द्विरात्रेण तं त्रिरात्रेणे"त्यादि । तत्राग्निं चिनुत इति चयनेनाग्निं संस्कुर्यादित्यर्थः । चयननिष्पादिते स्थण्डिले ऽग्निं स्थापयेदिति यावत् । स्थण्डिलनिष्पादकस्य चयनस्य साक्षादग्निसंस्कारकत्वायोगादथातो ऽग्निमित्यादिश्चयननिष्पादिते स्थण्डिले आहवनीयाग्निस्थापनानन्तरं तस्मिन्नग्नावग्निष्टोमादिभिर्यजेतेत्यर्थः । तथातिग्राह्या नाम केचन ग्रहाः तानधिकृत्य श्रूयते उक्थ्ये गृह्णीयाद्विश्वजिति ग्राह्या इत्यादि । तत्राग्निस्तावत्प्रकृतावप्यस्ति । अग्निष्टोमेनानुयजन्तीति विधानात् । न च प्रकृतेः प्राकरणिकोत्तरवेद्यवरोधात्तत्रानारभ्य विहितो ऽग्निर्न निवेष्टुमीष्ट इति तत्राग्निष्टोमपदं विकृत्यग्निष्टोमपरं स्यादिति वाच्यम् । प्रकरणेन वाक्यबाधायोगात् । न च यथा सप्तदशसामिधेनीरनुब्रूयादित्यनारभ्याधीतं साप्तदश्यं प्राकरणिकपाञ्चदश्यावरोधात्प्रकृत्योर्दर्शपूर्णमासयोर्निवेशमलभमान मित्रवि-

न्दादिविकृतिगामित्वातमेवमग्निरपि स्यादिति वाच्यम् । प्राप्तद्रव्यस्य हि सामिधेनीमात्रसंबन्धो वाक्येनावगम्यते क्रतुसंबन्धस्तु तस्य वैयर्थ्यपरिहारार्थमव्यभिचरितक्रतुसंबन्धिसामिधेनीलिङ्गेन क्रतुं हृदयमागमय्य कल्पयितव्यः । पाश्चद्रव्यस्य तु प्रकरणवशात्स्वत एव बुद्धौ विपरिवर्त्तमानेन क्रतुना संबन्धः क्लृप्त इति युक्तमेव तत्र प्राकरणिकस्य बलवत्त्वम् । इह तु अग्निष्टोमशब्दः क्रतुमेवाभिधत्त इति तत्संबन्धे वाक्येन क्लृप्ते प्रकरणेन बाधो न युक्तः । तस्मादनारभ्याधीतो ऽयमग्न्याधारस्थण्डिलरूपो ऽग्निः प्रकरणाम्नातयोत्तरवेद्या विकल्पितः प्रकृतौ निविशत इत्यस्ति तत्र स्थापनेन संस्कृत आहवनीयाग्निः प्रकृतौ । एवमतिग्राह्या अप्युपस्तम्भनं वा एतद्यज्ञस्य यदतिग्राह्या इति प्रकृतौ विहिताः सन्ति प्रकृतौ सन्तस्त्वाग्न्यतिग्राह्याः सर्वासु विकृतिष्वतिदेशेनैव प्राप्नुवन्तीति कासु चित्तेषां श्रवणं न तत्प्राप्त्यर्थं किं तु तदाश्रितगुणकामप्राप्त्यर्थम् । अग्न्याद्याश्रिता हि गुणकामाः श्रूयन्ते । "श्येनचितं चिन्वीत स्वर्गकाम" इत्यादयस्ते चोदकान्न प्राप्नुवन्ति । अङ्गस्य हि सतश्चोदकात्कथंभावाकाङ्क्षाकल्प्याप्तिः न त्वङ्गाश्रितानां फलार्थगुणानां । तथा निर्णीतं चाष्टमाध्याये गुणकामेष्वाश्रितत्वात्प्रवृत्तिः स्यात् निवृत्तिर्वा कर्मभेदादितिपूर्वोत्तरपक्षसूत्राभ्याम् । एवं चाग्न्यतिग्राह्याणां प्रकृतौ कासु चिद्विकृतिषु च स्वपदेशेन तासां प्रकृतेश्च सामानविध्ये सति तदाश्रिताः फलार्थगुणाः प्रकृताविव तासु विकृतिष्वपि प्राप्नुवन्ति । न च प्रकृतावग्नेरुत्तर-

वेद्या सह विकल्पितत्वात्तासु विहिकृतिष्वग्न्युपदेशस्त-न्नियमार्थो ऽस्त्विति वाच्यम् । अनारभ्याधीतमग्निं प्रकृत्याधातो ऽग्निमग्निष्टोमेनेत्यादिवाक्यैस्तस्य प्रकृतिविकृतिरूपक्रतुसंबन्धः क्रियते न तु तत्तत्क्रतुप्रकरणे । ततश्च विकृतिष्वग्न्युपदेशस्य प्रयोजनाकाङ्क्षायामग्निप्रकरणाम्नाततया सन्निहितानां तदाश्रितगुणकामानां प्रवृत्तिः प्रयोजनमित्येवं कल्पयितुमुचितं नत्वसन्निहित-तत्तद्विकृतिप्रकरणाव्यवस्थिताच्चोदकगणात्प्राप्ययोत्तरवेद्याग्नेः पाक्षिकत्वप्रसक्त्यपेक्षस्तन्नियमः प्रयोजनमिति कल्पयितुमुचितम् । न च वाच्यमुत्तरे ऽहनि द्विरात्रस्य गृह्यत इति सर्वेषां द्विरात्राणामतिरात्रसंस्थे द्वितीये ऽहनि षोडशिग्रहनियमविधिस्तत्तद्द्विरात्रप्रकरणाव्यवस्थितचोदकगणप्राप्येन षोडशिग्रहाभावेन षोडशिग्रहस्य पाक्षिकत्वप्रसक्त्यपेक्षो दृष्टस्तथेहापि स्यादिति तत्र सन्निहितप्रयोजनालाभेनागत्या तथा कल्पनात् इह सन्निहितबुद्धिविपरिवर्तमानप्रयोजनसम्भवे दूरस्थितं बुद्धावविपरिवर्त्तमानं विप्रकलितानेकचोदकानुसन्धानसापेक्षमर्थं हृदयमागमय्य प्रयोजनकल्पनानौचित्यात् एतेन[१] द्विरात्रादिषु चोदकेन प्राप्तानामङ्गान्तराणां निवृत्त्यर्थं द्विरात्रादिष्वग्निरेव नाङ्गान्तराणीति वा द्विरात्राद्यतिरिक्तविकृतिषु चोदकात्प्राप्तस्याग्नेर्निवृत्त्यर्थं द्विरात्रादिष्वेवाग्निर्नान्यासु विकृतिष्विति वा परिसंख्याविधिरस्त्वित्यपि शङ्का निरस्ता प्रकरणसन्निधापितप्रयोजनसम्भवे द्विरात्रादिचोदक पर्यालोचनालभ्यस्य

१ वक्ष्यमाणेन प्रकरणेत्यादिहेतुना सहास्य निरसनेऽन्वयः ।

विकृत्यन्तरचोदकपर्यालोचनालभ्यस्य वा प्रयोजनत्वकल्पनायोगात् । प्रकृति समानविधानस्य चोदकप्राप्तपरिसंख्यात्वानुपपत्तेश्च । तथा हि न तावदङ्गान्तरपरिसंख्योपपद्यते । सा हि गृहमेधीयपञ्चमपक्षन्यायाच्चोदकप्राप्तपरिसंख्या वा स्यात्तदष्टमपक्षन्यायाच्चोदकपरिलोपकत्वेनाप्राप्तपरिसंख्या वा । नाद्यः । वैकृताग्निविधानकाल एव प्राकृताग्निविधेर्निष्पद्यमानतया तत्पूर्वकस्याग्न्यङ्गान्तरसाधारणस्य चोदकस्य तदानीमात्मलाभाभावेन ततः प्राप्त्यभावात् । प्राप्तपरिसंख्यात्वे स्वार्थत्यागः परार्थग्रहणं प्राप्तबाधश्चेति दोषत्रयापत्तेश्च । प्रागेव चोदकतः प्राप्तत्वे ह्यग्निर्न विधातव्यः चोदकतः प्राप्तानि त्वङ्गान्तराणि स्वयमेव न निवर्त्तन्त इति प्रतिषेध्यानि । अतो वैकृताग्निश्रवणस्याग्निविधिरूपस्वार्थपरत्वं त्यक्तव्यम् अङ्गान्तरनिवृत्तिरूपपरार्थलक्षकत्वं चाङ्गीकरणीयं । चोदकप्राप्तानि चाङ्गान्तराणि बाधितव्यानि । यदि हि रशनादानपरिसंख्याविधिवदप्राप्तपरिसंख्या स्यात्तदैव विधिश्रवणस्य प्रागप्राप्तस्वार्थविधायकस्य तेनैव नैराकाङ्क्ष्यमापाद्य ग्राह्यपरिसंख्येयसाधारणप्रमाणप्रवृत्तिप्रतिबन्धकतया फलतः परिसंख्यात्वमिति वैदोष्यं नोपपद्येत । अप्राप्तपरिसंख्येति द्वितीयपक्षो ऽपि नोपपद्यते । गृहमेधीये ह्याज्यभागौ यजतीति दार्शपौर्णमासिकयोराज्यभागयोश्चोदकात्सम्भवत्प्राप्तिकयोः पुनः श्रवणं कृतोपकाराऽऽज्यभागसंबन्धेन गृहमेधीयप्रयोगविधेर्नैराकाङ्क्ष्यमापाद्य चोदककल्पनाप्रतिबन्धकत्वेन गृहमेधीयस्य प्रकृ-

व्याप्त्यवकाशः । न च वाच्यमग्न्यादिविधिषु विधिविषयस्य प्राप्तत्वे ऽपि श्येनाकृत्यादिगुणो न प्राप्त इति खल्वव्याप्तिपरिहारं मन्यसे तद्भ्रान्तिविलसितं तस्यापि "श्येनचितं चिन्वीत स्वर्गकाम" इत्यादिवाक्यैः स्वरूपेण स्वस्वोद्देश्यस्वर्गादिसंबन्धित्वेन च प्राप्तत्वादिति । ततो ऽप्यन्यस्य यस्य कस्यचित्सम्भावितामप्राप्तिमादाय लक्षणानुगमनोपपत्तेः । लक्षणीयविध्युद्देश्यसंबन्धित्वेनाप्राप्तिविवक्षायां तस्याप्यप्राप्तिसम्भवाच्च । न ह्यग्नेर्विकृतिसंबन्धोपदेशाभावे तदाश्रितगुणकामानां विकृतिमध्ये ऽनुष्ठानप्रसक्तिरस्तीति चेत् । उच्यते यस्य च भावेन भावलक्षणमिति सूत्रानुशिष्टया सतिसप्तम्या यस्याप्राप्तिर्विधिप्रवृत्तावुपलक्षणत्वेन निर्दिष्टा तत्प्राप्तिफलकत्वपर्यन्तलक्षणमिति विवक्षितं, न वा । तदविवक्षायां इन्ध्मादिनियमविधिष्वतिव्याप्तिप्रसङ्गः । दार्शपौर्णमासिककृत्स्नाङ्गकलापोपदेशोपजीविपाशुकचोदकाधीनप्रसक्त्यपेक्षे "न तौ पशौ करोती" त्याज्यभागनिषेधे उक्तचोदकाधीनप्रयाजादिप्राप्त्यपेक्षे "एकादशप्रयाजान्यजती" त्यादिशास्त्रविहिते प्रयाजैकादशत्वादिगुणे च स्वस्वोद्देश्यमप्राप्त एवाज्यादिधर्मे विलापनादौ प्रकृतविध्युद्देश्यमप्राप्ते एव व्रीहीनवहन्तीत्यादिनियमविधिप्रवृत्तेः । अतस्तत्परिहाराय तत्प्राप्तिफलकत्वपर्यन्तमवश्यं विवक्षणीयम् । तथा सति चनीकाभाजीरात्र्योरग्रताविध्योरव्याप्तिः । तथा हि द्वादशाहे चनीकाम्नाता । ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ दशमं चाहरशीतरेषां नवानामह्नामैन्द्रवायवाग्रं प्रथममहरथशुक्राग्रमथाग्रय-

ग्राग्रमथैन्द्रवायवाग्रमथ शुक्राग्रमथाग्रयणाग्रमथैन्द्रवायवाग्रमथ शुक्राग्रमथाग्रयणाग्रमिति । अत्रैतेषां नवानामह्नामग्रताख्यानीका इत्युच्यन्ते । तयाश्चैन्द्रवायवाग्रः शुक्राग्रयणाग्रताद्रूपाणामनीकानां समाहार इति व्युत्पत्तेः । अत्र व्यनीकायामाद्ये ऽहनी रथन्तरबृहत्सामनी । तथा च तयोरैन्द्रवायवाग्रशुक्राग्रते प्रकृतितो ज्योतिष्टोमादेव प्राप्तुतः । ज्योतिष्टोमे "यदि रथन्तरसामा सोमस्यादैन्द्रवायवाग्रान् गृहान् गृह्णीयात् यदि बृहत्सामा शुक्राग्रानिति" रथन्तरसामत्वेन बृहत्सामत्वेन च निमित्तेन *तयोरग्रतयोर्विहितत्वात्* । एवमतिदेशप्राप्तयोरपि विधानमनैमित्तिकत्वार्थं तस्य प्रयोजनं तद्विकृतिष्वसत्यपि रथन्तरबृहत्सामत्वे निमित्ते ऐन्द्रवायवशुक्राग्रत्वप्राप्तिः । तद्यथा गर्गत्रिरात्रे द्वितीयमहर्वामदेव्यपृष्ठं तत्र वृहत्सामत्वाभावे ऽप्यनैमित्तिकी शुक्राग्रता द्वादशाहतोऽतिदेशात्प्राप्नोति । तदेतत्सर्वं त्र्यनीकायां न्यायोक्त्याख्यानं गुणार्थं स्यादिति दाशमिकाधिकरणे निरूपितम् । एवं च सत्यैन्द्रवायवशुक्राग्रताद्रूपे विधेये प्रकृतविध्युद्देश्यं द्वादशाहिकमाद्यमहर्द्वयमप्राप्ते सति तत्र तत्प्राप्त्यर्थमैन्द्रवायवशुक्राग्रताविध्योः प्रवृत्तिर्न भवतीत्यनिवार्यो तयोरव्याप्तिः । तथा गवामयने चाद्ययोरन्होरैन्द्रवायवाग्रत्वविधौ श्रूयते तयोरप्यव्याप्तिस्तथाहि गवामयने ऽप्युक्तरूपा त्र्यनीका सा चैकषष्ट्यधिकत्रिशतसंख्यात्मकस्य गवामयनस्य पूर्वस्मिन्पक्षस्याशीत्युत्तरशतसंख्यात्मके तद्वान्तरप्रकरणबलाद्ङ्गत्वेन निविशते । एकया च त्र्यनीकया पूर्वपक्षो न पूर्यतइत्याव-

त्नीष्ठा सा तदावृत्तिश्च द्वेधा सम्भवति दण्डकलितवदावृत्तिः स्वस्थानविवृद्धिश्च । यथा चेवमाने कर्त्तव्ये क्वचित्कृत्स्नं मानदण्डं निवेश्य तदनन्तरदेशे ऽपि कृत्स्न एव मानदण्डो निवेश्यते । एवं प्रथममहरैन्द्रवायवाग्रं द्वितीयं शुक्राग्रमित्येव प्रकारेण कृत्स्नां त्र्यनीकामनुष्ठाय तथैव सा पुनः पुनरनुष्ठीयते चेत्पूर्वस्मिन्पक्षे सि विंशतिवारं त्र्यनीकाया दण्डकलितवदावृत्तिर्भवति । अथ पूर्वपक्षो नवधा विभज्य आद्ये विंशतिसंख्यात्मके भागे ऐन्द्रवायवाग्रता द्वितीये भागे शुक्राग्रतेत्येवमेकवारमेव सानुष्ठीयते चेत् तदन्तर्गता स्वस्थानएव विवृद्धिः । यदैन्द्रवायवाग्रं प्रथममहरित्यादावहःशब्दं विवक्षितं तदा दण्डकलितवदावृत्तिर्भवति । अहरपूर्वप्रयुक्ताश्च तत्तद्ग्रता भवन्ति । तदविवक्षायां तु स्वस्थानविवृद्धिर्भवति । अहः संघातरूपपक्षभागगताश्चाग्रता अहर्धर्मत्वाभावाद्गवामयनिकपरमापूर्वप्रयुक्ता भवन्ति । एवं स्थिते दाशमिके एकादशिनीवत् त्र्यनीकापरिवृत्तिस्त्वादित्यधिकरणे ऽहःशब्दस्य श्रूयमाणत्वाद्दण्डकलितवदावृत्तिरिति पूर्वपक्षं कृत्वा प्रथमभागस्योद्दिश्यमानस्यान्हो अन्ह उद्दिश्यमानस्य प्राथम्येन वा विशेषणायोगाद् ग्रहैकत्ववदेकत्वमविवक्षितं कृत्वा प्रथममहरिति चोदद्दृष्टव्यम् । तत्राङ्गवद्देशेऽ क्रां धर्मा उपदिष्टाः स्युरित्यर्थेति निर्देशानुपपत्तिः । अतः प्रथमसैन्द्रवायवाग्रमथ शुक्राग्रमित्येतावदेव विवक्षितम् । अहःशब्दस्तु द्वादशाहिकत्र्यनीकायां प्रथमादिभागानां वस्तुगत्या ऽहोरूपत्वादनुवादः गवामयनिकत्र्यनीकायामहः संघातपरो ऽनुवादः । स-

स्यात्तस्थानविष्टिरिति सिद्धान्तितम् । एवं च त्यनीका- विधिबलादैन्द्रवायवाग्रायमन्नामाद्यायां विंशतौ तद- न्तर्गतयोराद्ययोरन्होपुनरैन्द्रवायवाग्रत्वविधानं तत्तदह- रपूर्वप्रयुक्तत्वमिद्ध्यर्थं तत्फलं तत्तद्विकारेष्वेकाहक्रतुषु र- थन्तरसामत्वाभावे ऽप्यैन्द्रवायवाग्रत्वप्राप्तिरिति प्रतिपा- दित तन्त्ररत्ने । ततश्च तयोरप्यैन्द्रवायवाग्रत्वविध्योरनि- वार्यैवाव्याप्तिः । न चावोदाहृतेषु विधिषु विधेयानाम- ग्रतानामुद्देश्येषु द्वादशाहिकगवामयनिकेष्वहःसु चो- दकत्यनीकोपदेशाभ्यां प्राप्तिसत्त्वे ऽपि तदन्येषां केषां चिदप्राप्त्या तेषु लक्षणं समर्थनीयमिति शङ्कितुं शक्यम् । तेषां विधीनां तत्प्राप्तिफलकत्वाभावात् । अत्र विपय- सप्तमीपक्षे विकल्पद्वयस्यापि दूषणमव्याप्तिः प्राप्तियुक्त- मित्यादिना दर्शितम् । तत्राद्यविकल्पदूषणे अग्निविधि- शब्देन प्रकृतिविकृतिसाधारणमग्नेः क्रतुसंबन्धविधि- मात्रं ग्राह्यम् । आदिशब्देन चाग्निहोत्रप्राजापत्ययाग- विदेवनादिविधिर्ग्राह्यः । द्वितीयविकल्पदूषणे ऽग्निवि- धिशब्देनाग्नेर्विकृतिसंबन्धविधिर्ग्राह्यः । आदिशब्देन त्व- तिग्राह्यविधिः । सतिसप्तमीपक्षे तत्प्राप्तिफलकत्वावि- वक्षायां यद्दूषणं तत्पञ्चमश्लोके प्रदर्शयिष्यमाणत्वा- दिह न प्रदर्शितं तद्विवक्षायां यदव्याप्तिद्वयं तत्त्यनीका- भाजोरित्यादिना दर्शितम् । तत्राद्याव्याप्त्युदाहरणे त्य- नीकाभाजोर्द्वादशाहिकत्र्यनीकान्तर्गतयोरैन्द्रवायवाग्- रवशुक्राग्रत्वविध्योरव्याप्तिरित्यर्थः । द्वितीयाव्याप्त्युदा- हरणे यत्र गवामयनिकी त्र्यनीका तत्रैव स्वयं प्रव र्तमानतया त्र्यनीकाभाजोरैन्द्रवायवाग्रताविध्योरव्या-

प्तिरित्यर्थः ॥ २ ॥ स्यादेतत्सतिसप्तमीपक्षे प्रथमविकल्पे उद्भावितमिदमव्याप्तिद्वयं न प्रसज्यते तथा हि द्वादशाहव्यनीकान्तर्गतमगृताद्वयं परमापूर्वसाधनत्वोपहितयोराद्ययोरन्होर्विधीयते। न च तथाभूतयोस्तयोः प्रकृतितस्तदगृताद्वयं प्राप्तं किं तु अवान्तरापूर्वसाधनत्वोपहितयोरेव द्वादशानां सोमयागानामेकफलावच्छिन्नानां सहानुष्ठाने ऽपि प्रतिसोमयागं चोदकस्य पृथक् प्रवृत्तेः। तथा गवामयनिकयोराद्ययोरन्होरवान्तरापूर्वसाधनत्वोपहितयोरैन्द्रवायवगृताद्वयं विधीयते। न च तथाभूतयोस्तत्प्राप्तं किं तु परमापूर्वसाधनत्वोपहितयोरेव। इदं च तत्तदव्याप्त्युद्भावनस्थले स्पष्टीकृतम्। तथा चोद्देश्यतावच्छेदकरूपेणाप्राप्तिसत्त्वादुद्भाविताव्याप्त्योर्नावकाश इत्याशङ्क्याह।

अप्राप्तिं प्राप्तिभाजामपि यदि परमावान्तरापूर्वकृत्वव्यावृत्तोद्देश्यधर्मैः सृजसि विघटयन्नेनमव्याप्तिदोषम्। तस्मादादाय लक्ष्मक्षयकृतिनिहितं स्यादतिव्याप्तिवक्त्रो व्रीह्युद्देशो ऽपि हन्तौ नियमविधिपदे खल्वपूर्वावलीढः ॥ ३ ॥

यद्यव्याप्तिं परिहर्त्तुं प्राप्तानामप्यगृतानामपूर्वविशेष-साधनत्वोपाधिभेदेनाप्राप्तिं लक्षणार्थत्वेन कल्पयन्ति तदा केषां चिदेव प्रसिद्धानामपूर्वविधीनां संग्राहकमिदं लक्षणमुक्तमिति लक्ष्यसंकोचविवक्षया सुपरिहराद्व्याप्तिदोषादादाय लक्षणहानिकरस्य नियमविध्यतिव्याप्तिदोषव्यावृत्त वदने इदं लक्षणं त्वया निहितं स्यात् । व्रीहीनवहन्तीति नियमविधावपि व्रीहीणामपूर्वसाधनत्वोपहितानामेवोद्देश्यतया उद्देश्यतावच्छेदकरूपेणाप्राप्तिसत्त्वात् । तत्र हि द्वितीयाश्रुत्या व्रीहीणामवघातसाध्यत्वमस्ति प्रागेव सिद्धत्वात् नापि व्रीहीनवहन्तीति लौकिकव्रीह्यवहननानुवादवाक्य इवात्र तुषविमोकविशिष्टत्वेन रूपेण तत्साध्यत्वं द्वितीयार्थ इति वक्तुं शक्यम् । विदलनेनापि सम्भवति तस्मिन्नत्र विवक्षितस्यावघातनियमस्यानुपयोगात् । तस्मादपूर्वसाधनत्वाकारेणैव तेषां तत्साध्यत्वं वाच्यम् । न च यथाग्नीनादधीतेत्यत्राग्नीनां स्वरूपेणाधानसाध्यत्वं तथेहापि स्यादिति वाच्यम् । तत्र "वहनीये जुहोति" "गार्हपत्ये हवींषि श्रपयन्ति" "दक्षिणाग्नावान्वाहार्यं पचतीति" वाक्यान्तरैर्होमादिषु विनियुक्तानां संस्कारविशेषविशिष्टाग्निरूपाणामाहवनीयादीनां साधनाकाङ्क्षायामाधानविधानात् । तेषां संस्कारविशेषावच्छिन्नत्वेन रूपेणाग्निपदोपात्तानामाधानसाध्यता युक्ता । न चेह व्रीहयः संस्कारविशिष्टाः क्रतौ विनियुक्ताः येनावहननवाक्येऽपि तेषां तद्विशिष्टतयोपादानात् तेन रूपेणावहननसाध्यता युक्ता स्यात् । व्रीहिभिर्यजेतेति जातिमात्रेण हि व्रीहयः क्रतौ विनियुक्ताः ।

न चात्र सक्तुन्यायेन विनियोगभङ्गः[1] कल्पयितव्यः अपूर्वसाधनत्वलक्षणामात्रेण प्रधानद्वितीयाश्रुतिनिर्वाहे आकाङ्क्षितदृष्टफलत्वे नियममात्रविषयतया विधिलाघवे च सम्भवति द्वितीयाश्रुतिबाधस्यानाकाङ्क्षितादृष्टफलकल्पनस्यात्यन्ताप्राप्तिप्रापकापूर्वविधिगौरवाभ्युपगमस्य[2] चायुक्तत्वात् । न चैवमपूर्वसाधनत्वलक्षणायामाज्यसान्नाय्यजुहूस्रुवादीनामप्यवघातप्रसङ्गः । व्रीहीणां ह्यवगतमपूर्वसाधनत्वं लक्षणीयम् । तेषां चाग्नेयाद्यपूर्वसाधनत्वं तण्डुलनिर्वृत्त्यादिद्वारकं व्रीहिभिर्यजेतेत्यादिशास्त्रेणावगतमिति तल्लक्षणायां यवसाधारण्यमात्रलाभे ऽपि नान्यत्रातिप्रसङ्गः तथैवावश्यलक्षणीयमवघातस्य दृष्टफलत्वनिर्वाहाय । तदेतत्सर्वं तेषामर्थेन संबन्ध इति तार्त्तीयाधिकरणे द्रव्यसंस्काहेतुसमुदायं वा श्रुतिसंयोगादिति नावमिकाधिकरणे च स्पष्टमिति भावः ॥ २ ॥ एवं प्राप्तानामपि रूपभेदाश्रयणेनाप्राप्तिमपेक्ष्य लक्षणानुगमने व्रीहिपदलक्षिताकाराश्रयणेनावघातनियमविधावतिव्याप्तिरुक्ता इदानीं शक्याकाराश्रयणेनान्यत्र नियमविधावतिव्याप्तिमुदाहरति ॥

यूपः[3] सर्वो ऽप्यपूर्वः स्वयमपि विविधादृष्टसंस्कारयोगात् तस्मिन् दैव्ये ऽपि दृष्टं खदिरनि-

---

१ सक्तून् जुहोतीत्यत्र यथासक्तुभिर्यजेतेति ।

२ अपूर्वविधित्वाभ्युपगमश्चेति २ पु० पा० ।

३ नियमविधिरयम् सर्वे द्रव्यविधयो नियमविधय इति वचनात् ।

यमनं तत्र काव्यामि¹वार्ता। तस्मात्तत्तत्स्वरूपे परमनवगतं रूपभेदं विहाय प्राप्त्यप्राप्ती विचार्ये कथमपि तदिहाव्याप्तिदोषान्न मुक्तिः ॥ ४ ॥

यूपः प्राकृतो वैकृतः सर्वोऽपि तावदाहवनीयादिवदलौकिकः प्रोक्षणजन्यादृष्टच्छेदनतक्षणाष्टाश्रीकरणादिजन्यनियमादृष्टरूपानेकादृष्टसंस्कारविशिष्टस्यैव यूपशब्दार्थत्वात्। तत्र प्रकृतिद्रव्यनियमविधिः श्रूयते खादिरो यूपो भवतीति । तत्राऽलौकिकयूपत्वावच्छेदेन खादिरप्राप्त्यभावादपूर्वविधिलक्षणस्य तत्राप्यतिव्याप्तिः स्यात् । नन्वाहवनीयाद्युद्देशेनाधानविधिवद्यूपोद्देशेन खदिरविधिरपूर्वविधिरस्तु । यूपाहवनीययोरलौकिकत्वाविशेषात् । खदिरादिविधेर्नियमविधित्वप्रसिद्धिस्तु वैकृतविधिविषया स्यात् विकृतावपि हि तत्र तत्र श्रूयते खादिरो यूपो भवतीति । तस्य प्रकृतौ विकल्पितानां खदिरपलाशादीनां विकृतावपि तथैव चोदकतः प्राप्तौ खदिर एव तत्र ग्राह्य इति नियमविधित्वमुपपद्यतइति चेत् । उच्यते । दैक्षे दीक्षासु यूपं छिनत्तीति दीक्षाकालकर्त्तव्यच्छेदने प्राकृतयूपे खदिरविधिरपि नियमविधिरेव । तदभावे² तक्षणादिवाक्यपर्यालोचनया दारु-

---

१ [illegible] २ पु० पा० ।
२ खादिरो यूपो भवतीति [illegible] ।

मयत्वेनावगतस्य यूपस्य प्रकृत्याकाङ्क्षायामनियतानेकद्रव्याक्षेपस्यानिवार्यत्वात् । तक्षणाष्टाश्रीकरणादिविशिष्टे यूपस्य दृष्टरूपे खदिरादीनां प्रकृतित्वयोग्यताया लोकतो ऽवधारितत्वात् । आधानं त्वाहवनीयादीनां दृष्टे ज्वलनाकारे न निष्पादकं किं तु तन्निष्ठापूर्वसंस्कारमात्र इति युक्तं तद्विधेः प्रोक्षणादिविधेरिवापूर्वविधित्वम् । तस्मात्प्राकृतखदिरादिनियमविधावतिव्याप्तिरप्यनिवार्यैव । एवमुद्देश्यगतविवक्षितरूपभेदाश्रयणेनाप्राप्तिसमर्थनस्यातिव्याप्तिदृष्टत्वात्तत्परिहाराय यथा वार्त्तिकं तत्तद्विधयभावे विधेयत्वाभिमतस्य प्राप्त्यप्राप्तिविवेचनेनैव नियमापूर्वविधिव्यवस्थोपपादनीया । तथा सति द्वादशाहे त्वनीकाविधयभावे ऽपि आद्ययोरह्नोस्तोदकादैन्द्रवायवशुक्राग्रते प्राप्तुतः । गवामयने चाद्ययोरह्नोः प्रातिस्विकविधयभावे ऽपि स्वस्थानविवृद्धिमत्वानीकाविधिबलादैन्द्रवायवाग्रते प्राप्तुतः इत्युदाहृताग्रताविधिचतुष्टयाव्याप्त्या सतिमात्रमीपक्षे प्रथमविकल्पो दुष्ट एवेत्यर्थः । अस्मिन्नव विकल्पे स्थलान्तरे ऽप्यव्याप्तिं रूपभेदविवक्षया निरसितुमशक्यामुदाहरति ।

अव्याप्तिः पौर्णमास्यामपि यजनविधावत्र कल्पे प्रसर्पेत् प्राप्तोद्देश्यस्य तेन ह्यधिगतफलतोपांशुयाजस्य लभ्या ॥ स्यात्किं

चैषा पराग्न्याहुतिषु फलसमायोजनार्थप्रवृत्तेर्निष्प्रत्यूहाग्निहोत्राहुतियुगलमिताधारसंकीर्तने ऽपि ॥५॥

दर्शपूर्णमासप्रकरणे श्रूयते । तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्निति । अत्र वाक्ये कीर्तितानां यागतदपेक्षिताग्नीषोमदेवताऽऽज्यद्रव्योपांशुत्वगुणपौर्णमासीकालानां मध्ये कालव्यतिरिक्तानां तत्तद्विध्यनुगुणशब्दाभावादन्यतः सम्भवत्प्राप्तिकानां तेषां पुनः श्रवणस्य निष्फलत्वाच्च कालस्यैव विधिः । न ह्यग्नीषोमवक्तृकवाक्यगतस्य यजन्नित्यस्य यागविधौ षष्ठीचतुर्थीसाधारणस्य नाविरुद्धस्य देवताभिधाऽऽवाज्यस्येति षष्ठ्यन्तस्य द्रव्यविधौ द्रागेवानुगुण्यमवगम्यते । सम्भवति चोपांशुयाजमन्तरा यजतीति स्पष्टविधिना यागस्य यष्टव्यदेवताप्रकाशनैकप्रयोजनकेनाग्नीषोमीयया-ज्यानुवाक्यायुगलेन देवतायाः सर्वस्मै वा एतद्यज्ञाय गृह्यत इत्यादिना द्रव्यापेक्षायां सर्वयागार्थताविधायकतया कृतेन ध्रौवाज्यविनियोजकवचनेन द्रव्यस्य प्राप्तिः उपांशुत्वस्यापि[1] यागोत्पत्तिवाक्यत एव प्राप्तिः सम्भवति । अतो ऽत्र पुराकल्पमरूपाऽर्थवादेन कथ्यः कालस्यैव विधिः तदनुगुणसप्तमीविभक्तिश्रवणात् । तद्विधानस्य फलत्वाच्च । तथा हि यद्यपि तद्विधानमुपांशुयाजस्य पौ

१ उपांशु याजमन्तरादर्शितेति क.ख. ।

र्णमासीकालसिद्ध्यर्थं न भवति तस्योपांशुयाजमन्तरा यजतीत्युत्पत्तिवाक्येनैव पौर्णमासीकर्तव्याग्नेयाग्नीषोमीययागद्वयान्तराले उपांशुयाजं विदधानेनार्थतः सिद्धत्वात्तथापि उपांशुयाजस्य दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यधिकारवाक्योद्देश्यफलसम्बन्धसिद्ध्यर्थं भवेदेव। एतदभावे विद्वद्वाक्यस्थेनाधिकारवाक्यस्थेन च दर्शपूर्णमासपदेन यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति अग्नीषोमीयमेकादशकपालं पूर्णमासि प्रायच्छदित्युत्पत्तिवाक्येनावगतपौर्णमासीकालयोगाग्नेयाग्नीषोमीययागयोरेव झटिति प्रवृत्तिनिमित्तावगत्या प्रथमगृहीतयोः फलसम्बन्धकरणाद्दर्शावगम्यपौर्णमासीसम्बन्धस्योपांशुयाजस्य विलम्बितप्रवृत्तिनिमित्तप्रतीतिकतया विद्वद्वाक्याधिकारवाक्यगतपौर्णमासीपदागृहीतस्य फलसम्बन्धो न सिद्ध्येदिति। यत्तु भवद्भिरेनास्य विधेः प्रयोजनमुक्तं यदन्तरालविध्यर्थं लब्ध एवोपांशुयाजे पौर्णमासीकालः स्यात्तदानीमाग्नेयो वै ब्राह्मणो देवतया स सोमेनेष्ट्वा अग्नीषोमीयो भवतीति श्रुतेः। असोमयाजिनोऽग्नीषोमीयपुरोडाशाभावेन तदीयायामेकपुरोडाशायां पौर्णमास्यां पुरोडाशद्वयान्तराभावादुपांशुयाजो न प्राप्नुयात् प्रातिस्विककालविधिसद्भावे त्वन्तरालानपेक्ष्यैव पौर्णमास्युपांशुयाजाहमितिसिद्धेस्तदनुसारेणान्तरालश्रवणमाग्नेयोत्तरकालमात्रोपलक्षणं भवेदित्येकपुरोडाशायामप्युपांशुयाजः प्राप्नोति। एतत्सिद्ध्यामुपांशुयाजप्राप्त्यर्थः पौर्णमासीविधिरिति। तदसारम्। उपलक्षणापाये ऽप्युपलक्ष्यानपायन्यायादेवैक-

पुरोडाशायामपि तत्प्राप्तिसम्भवेन तदर्थं विध्यन्तरानपेक्षणात्। उपलक्षणं हि पुरोडाशद्वयमुपांशुयाजाङ्गभूतस्य कालस्य न तु स्वयमुपांशुयाजाङ्गं येन तदभावे तद्वैगुण्यं स्यात्। न च तदभावे ऽन्तरालस्याङ्गस्यालाभाद्वैगुण्यम्। उपलक्षणापाये ऽप्युपलक्ष्यानपायस्य प्रतिदिनं शङ्खवेलायामागन्तव्यमित्यादौ प्रसिद्धत्वात्। न हि काले विशेषोपलक्षणतयोपात्ते शङ्खध्वनौ क्व चिद्दिवसे दैवादकृते सति तदुपलक्षितः कालो नास्तीति नावगम्यते। ननु द्विपुरोडाशायां स्यादन्तरार्थत्वादिति दाशमन्त्याधिकरणे ऽन्तरालश्रुतिबलाद्द्विपुरोडाशायामेवोपांशुयाज इति पूर्वपक्षे प्राप्ते उभयोस्तु विधानादितिसिद्धान्तसूत्रेणोपांशु पौर्णमास्यां यजन्निति पौर्णमासीविधानमेव हेतूकृत्य द्विपुरोडाशायामेकपुरोडाशायाञ्चोपांशुयाजः समर्थितः सत्यम्। उत्पत्तिशिष्टान्तरालकालवैगुण्ये सति हेतुरसाधक इत्यसारस्यादेव तदनन्तरमनपायो हि कालस्य लक्षणं हि पुरोडाशाविति सूत्रान्तरेण तथैव पूर्वहेतुस्वारस्यं वर्णयता तद्भाष्येण च लक्ष्यानपायन्यायमेव हेतूकृत्य कालवैगुण्याभावः समर्थितः। तन्न्यायापेक्षणे च तत एवैकपुरोडाशायामप्युपांशुयाजप्राप्तिर्भवतीति न सा पौर्णमासीविधानमपेक्षते। अयञ्च चोपलक्ष्यानपायन्यायमात्राद्विध्यन्तरमनपेक्ष्यैवोपलक्षणाभावे ऽपि प्राप्तिर्भवतीति त्वयापि स्वीकरणीयम्। अन्यथा पौर्णमासीविधिबलादेकपुरोडाशायां प्राप्नुवन्नप्युपांशुयाजो ऽग्नीषोमदेवत्यएव प्राप्नुयात्। विष्णुदेवत्यः प्रजापतिदेवत्यश्च न प्राप्नुयात्। पौर्णमासीविधौ तावन्नूतावग्नीषोमावितिश्रव-

णात् । एकपुरोडाशायामुपांशुयाजसामान्यप्रापकविध्यन्तराभावाच्च । तस्मात्तत्राग्नीषोमयोरुपलक्षणत्वाद्देवतान्तरवतोऽप्युपांशुयाजस्याग्नीषोमोपलक्षितयागत्वानपायादेवैकपुरोडाशायां प्राप्तिः समर्थनीयेति तत एव लब्ध्यानपायन्यायादुपांशुयाजमन्तरा यजतीति विधिनापेक्षितादेकपुरोडाशायामपि तत्प्राप्तिः सिद्धैतीति न पौर्णमासीविधेः प्रयोजनमिति प्रागुक्तोपांशुयाजस्य फलसिद्धिः प्रयोजनम् । तदेव प्रयोजनमुपांशुयाजाधिकरणे प्रायोवचनाच्चेति[1] सूत्रेण तद्वार्त्तिकेन च स्पष्टीकृतम् । तत्र ह्यधिकरणे "विष्णुरुपांशुयष्टव्योऽजामित्वाय" "अग्नीषोमावुपांशुयष्टव्यावजामित्वाय" "प्रजापतिरुपांशुयष्टव्योऽजामित्वायेति" त्रयाणां यागानां विधयः । अन्तरावाक्यं तु तत्समुदायानुवादो विवृद्वाक्यवदिति पूर्वपक्षनिराकरणार्थं सूत्रं प्रायोवचनादिति । शिरो वा एतद्यज्ञस्य यदाग्नेयः हृदयमुपांशुयाजः पादावग्नीषोमीय इत्युपांशुयाजस्य प्रधानप्रायपाठात्प्राधान्यावगते र्विष्ण्वादिवाक्यैस्त्रयाणां यागानामुपांशुयाजशब्दपरामृष्टानां विधावुपांशुयाजमात्रप्राधान्यावगतिबाधप्रसङ्गादन्तरावाक्यविधेय एकएवोपांशुयाजस्तदर्थवादा विष्ण्वादिवाक्यानीति सूत्रस्यास्य भाष्ये तात्पर्यमुक्तम् । कथं यागत्रयविधिपक्षे तत्प्राधान्यबाधः स्यादित्याशङ्क्योपपादितं वार्त्तिके । विष्णुप्रजापत्यग्नीषोमदेवत्ययागत्रयविधिपक्षे तावद्भूतावग्नीषोमावित्यादिनाग्नीषोमदेवत्यस्यैव यागस्य पौर्णमासीविधिरिति स्यात् । तथा च तस्यैव विवृद्वाक्यफलयान्य-

---

[1] दृष्टधर्मणीति २ पु० पा० ।

स्यपौर्णमासीपदगृहीतस्य फलसंबन्धेन प्राधान्यं सिद्ध्येत् न तु तदगृहीतयोर्विष्णुप्रजापतिदेवत्ययागयोः । अन्तरावाक्ये नैकस्यैव यागस्य विधिस्तत्रैव शाखाभेदेनाम्नातैर्याज्यानुवाक्यायुगलैः प्रापिता विष्ण्वादिदेवता विकल्प्यन्त इति । सिद्धान्तपक्षे तु विष्णुप्रजापतिदेवत्यस्याप्येकत्वेनाग्नीषोमोपलक्षितत्वानपायादुपांशुयाजसामान्यस्य पौर्णमासीकालसंबन्धलाभेन सिद्ध्यति प्राधान्यमित्यनेन पौर्णमासीविधिनैव लभ्यः फलसंबन्धो नान्तरालविधिलभ्य इत्याशयः स्पष्ट एव । अन्यथा विष्णुप्रजापतिदेवत्ययोराहत्य पौर्णमासीविध्यभावे ऽप्यन्तरालकालतयार्थप्राप्तपौर्णमासीसंबन्धेनैव फलविधिगृहीतयोः प्राधान्यं सिद्ध्येदिति तत्प्राधान्यावगतिबाधप्रसङ्गदूषणमसमञ्जसं स्यात् । नन्वन्तरावाक्यं यागत्रयसमुदायानुवादकमिति पूर्वपक्षे ऽन्तराले यागविधायकं किं चिद्वाक्यं नास्तीति विष्णुप्रजापतिदेवत्ययोः फलसंबन्धार्थं पौर्णमासीविधिरेव शरणीकरणीयः । अतो यागभेदे तस्याग्नीषोमीयमात्रविषयत्वेन तयो. फलसंबन्धो न सिद्ध्येदिति तद्दूषणासामञ्जस्यमिति चेत् । न । अन्तरावाक्यमनुवाद इति पक्षे ऽपि[1] दोषपरिहारार्थमन्तराश्रुतेरनालम्बनत्वपरिहारार्थं च तिष्वपि यागेष्वन्तरालप्राप्तेरवश्यवक्तव्यत्वात् । भवदेवेनैवोपांशुयाजाधिकरणपूर्वपक्षे कथमन्तरावाक्यस्य सर्वात्मनानुवादकत्वमन्तरालस्यैवा-

१ क्रोमितादोषपरिहारार्थमित्यर्थः तथा च क्रामितादोषोपक्रमोपसंहाराभ्यामिहान्तरालप्राप्त्यानवधारा पौर्णमासीसम्बन्धसिद्धौ न पौर्णमासीविधिः शरणीकरणीय इतिभाव एव च सत्यानपायन्याय प्राप्तप्रमाणस्यैव प्राधान्यावगतिबाधप्रसङ्गदूषणं वार्त्तिकोक्तं समञ्जसमिति द्रष्टव्यम्. अनालम्बनार्थकवाक्यस्यानुवादत्वानुपपत्तिरूपोदोषइत्यर्थः ।

ऽप्राप्तस्य विधेयत्वादित्याशङ्क्य जामितादोषोपक्रमेण विष्ण्वादिवाक्येषु प्रत्येकमनामित्वानुवादेन च तेष्वन्त-रालप्राप्तिरुक्ता भवति चानुवादतो ऽपि स्थाननियमो यथा न गिरागिरेति ब्रूयादिति गिरापदनिषेधानुवाद-त्वादिरापदस्य गिरापदस्थाननिवेशित्वम् इति सदृष्टा-न्तमुपपादितत्वात्। केचित्तु विष्ण्वादिवाक्यानि याग-विधय इति पक्षे तत्प्राधान्यबाधमन्यथा समर्थयन्ते। विष्ण्वादिवाक्येषु तव्यप्रत्ययात्प्रथमं गुणकर्मत्वधीर्भवति। कर्मान्तरानुपयोगानुसंधानेन तु प्रधानकर्मतावगन्तव्या। अतः शीघ्रावगतप्रधानकर्मणामेवाधिकारानुप्रवेशादुपां-शुयाजस्य तदननुप्रवेशेन प्रधान्यावगतिर्विहन्येत। अ-न्तरावाक्यं यागविधिरिति पक्षे तु तत्र तव्यप्रत्ययाभा-वेन गुणकर्मत्वधीकृतविलम्बाप्रसक्तेराग्नेयादिवदेवाधि-कारानुप्रवेशात्प्राधान्यावगतिर्न विहन्यतइति तेषाम-प्यधिकारानुप्रवेशोपयोग्यर्थप्रतीतिशैघ्र्यमान्द्यकृततदनु-प्रवेशाननुप्रवेशन्यायस्य संमतत्वादुपांशुयाजस्य आहत्य पौर्णमासीविध्यभावे तु श्रुतपौर्णमासीकालयोराग्नेया-ग्नीषोमीययोरेवाधिकारानुप्रवेशः स्यादित्युपांशुयाजस्य तदनुप्रवेशलाभफलक एव पौर्णमासीविधिः सिध्यति।

स्यादेतत्। यदि पौर्णमासीसंबन्धप्रतीतिशैघ्र्यमान्द्याभ्या-मधिकारानुप्रवेशाननुप्रवेशौ स्यातां तदोपांशुयाजस्यो-त्पत्तिवाक्यप्रवृत्तिसापेक्षेण वाक्यान्तरेण पौर्णमासीसंब-न्धलाभे ऽप्युत्पत्तिवाक्यावगतपौर्णमासीसंबन्धयोराग्ने-याग्नीषोमीययोरिव तदनुप्रवेशः स्यादिति स दोषस्त-दवस्थः। न च वाच्यमनन्यप्रयोजनः पौर्णमासीविधिर्वि-

लम्बितो ऽपि तस्याधिकारसंबन्धमापादयिष्यति । अन्यथा तद्वैयर्थ्यप्रसङ्गात् । एकपुरोडाशायामुपांशुयाजप्राप्तेर्लब्धानपायन्यायलभ्यतयैतद्विधिप्रयोजनत्वाभावादिति । अमावास्यायामुपांशुयाजव्यावर्तनेनापि पौर्णमासीविधेश्चारितार्थ्यात् । उपांशुयाजोत्पत्तिवाक्यपर्यालोचनया ह्यमावास्यायामपि स प्राप्नोति । यथा पौर्णमास्यामाग्नेयाग्नीषोमीयौ पुरोडाशौ तथा ऽमावास्यायामाग्नेयैन्द्राग्नौ स्त इति पुरोडाशद्वयान्तरालस्य द्वयोरपि सत्त्वादमावास्यायां सोमयाजिन ऐन्द्राग्नाभावेनेव पौर्णमास्याममसोमयाजिनो ऽग्नीषोमीयाभावेन पुरोडाशद्वयासार्वत्रिकत्वस्य तयोरविशिष्टत्वात् । तस्मात्पौर्णमासीविधिरमावास्याव्यावर्त्तनेन चरितार्थः स्यादेव । अत एव दशमे अपि वा पौर्णमास्यां स्यात्प्रधानशब्दसंयोगान्मन्त्री यथा प्रधानं स्यादितिसूत्रेण प्रधानस्योपांशुयाजस्योपांशु पौर्णमास्यां यजन्निति शब्देन पौर्णमासीकालसंयोजनात् पौर्णमास्यामेवोपांशुयाजः कार्य इति पौर्णमासीविधिबलादेवामावास्याव्यावर्तनं कृतमिति[1] चेत् । उच्यते उपांशुयाजमन्तरा यजतीति उत्पत्तिवाक्यं पौर्णमासीरूप एवान्तरालकाले उपांशुयाजं विदधाति । उपांशु पौर्णमास्यां यजन्निति प्रकृत्य जामि वा एतदित्याम्नानादिति दशमान्त्याधिकरणे भाष्यटुप्टीकयोरुक्तम् । अत उपांशुयाजस्योत्पत्तिवाक्यावगतपौर्णमासीकालत्वाविशेषान्न कश्चिदधिकारानुप्रवेशे ऽन्तरायः[2] । एवं च यद्यपत्र पौर्ण-

१ तस्मात्पौर्णमास्याविधिरितिमात्रं क्वचिद्दर्शितपाठः ।

२ क्रतुसंबन्धापि इति १ पु० पा० ।

मासीविधिरभावाद्व्यावर्त्तनेन परिसंख्यारूपस्तथापि
तदनन्तरामातीतपत्तिवाक्यश्रुतमन्तरालकालं पौर्णमा-
सीरूपतां नयन् उपांशुयाजस्य फलसंबन्धार्थो ऽपि भव-
तीति अपूर्वविधिरूपताप्यस्यावश्यं भाविनी । ततश्चा-
नुपादेयत्वेनोद्देश्ये पौर्णमासीकाले विधेयस्य यागस्य प्रा-
प्तिरेतदभावे ऽप्युत्पत्तिवाक्यपर्यालोचनयावगम्यतइति
तस्याः फलत्वाभावात्तां[1] विहाय विधेयस्य[2] अनुद्देश्याधि-
कारवाक्योपात्तस्वर्गप्राप्तिफलत्वेनोपाददाने ऽस्मिन्विधौ
रूपभेदविवक्षायामव्याप्तिरनिवार्या । न खलु पौर्णमा-
सीत्वोपस्थिते[3]उपांशुयाजस्याप्राप्तिरस्ति । अन्तरालविधि-
सामर्थ्येन तत्प्राप्तिमस्थापयान्वा तदन्येन केन चित् रूपेणो-
पस्थिते तत्र तस्याप्राप्तिमुपपाद्य तत्प्रापणार्थमिदं वचन-
मिति कल्पने किं चित्प्रयोजनमस्ति । पौर्णमासीत्वो-
पस्थितएव तद्विधानस्य फलसंबन्धसिद्ध्या प्रयोजनवत्त्वा-
त् । तस्मात् रूपभेदविवक्षायामप्युक्तविधावव्याप्तिः स्या-
देव । अपि च द्वे आहवनीये चतस्रो गार्हपत्ये चतस्रो
ऽन्वाहार्यपचने दश संपद्यन्ते दशाक्षरा विराडेव एवं
विद्वान्विराट्संपन्नमग्निहोत्रं जुहोतीत्यत्र द्वे आहवनीये
इत्यच्छन्दसोऽग्निहोत्राहुत्योर्यदाहवनीये जुहोतीतिसा-
मान्यशास्त्रप्रमिताहवनीयरूपाधारसंकीर्त्तने ऽप्यव्याप्तिः ।
इदं हि नाहवनीयस्याहुतिद्वयसम्बन्धमात्रं सामान्यशा-
स्त्रेणा[4]प्राप्तत्वात् । नापि तदन्यस्य यस्य कस्य चित्संब-

---

1 [illegible]
2 [illegible]
3 [illegible]
4 [illegible]

न्वप्राप्त्यर्थमनेन कस्यापि तत्संबन्धप्राप्त्यलाभात् । नापि विराट्संपत्तिवाक्यानुसारेण दशसंख्यानामग्निहोत्राहुतीनां मध्ये द्वे एवाहवनीये न त्वष्टावितरा इति परिसंख्यार्थमष्टानां गार्हपत्यान्वाहार्यपचनरूपाधिकरणान्तरविधानादेवाहवनीयव्यावृत्तिसिद्धेः । किं तु तासामष्टानामाहुतीनामाहुतिद्वयवदग्निहोत्रं जुहुयात्स्वर्गकाम इत्यधिकारवाक्यबोध्यफलसंबन्धप्राप्त्यर्थम् । तथा हि । द्वे आहवनीय इत्येतदभावे चतस्रो गार्हपत्ये चतस्रोऽन्वाहार्यपचन इति वाक्ये संख्याधिकरणविशिष्टकर्मविधायके स्याताम् । न त्वग्निहोत्रं जुहोतीत्युत्पत्तिवाक्यविहितकर्मानुवादेन गुणविधायके प्राप्ते कर्मणि संख्याधिकरणरूपानेकगुणविधाने वाक्यभेदापत्तेः । न च यथा यदग्नये च प्रजापतये च सायं जुहोति यत्सूर्याय च प्रजापतये च प्रातरिति वाक्ययोः कालदेवतारूपानेकगुणश्रवणे ऽप्यग्निहोत्रवाक्योत्पन्नहोमानुवादेन गुणमात्रविधानमिति तस्यैकस्यैव होमस्य सायंप्रातःकालयोरग्निप्रजापतिसूर्यप्रजापतिरूपदेवताभेदेन द्विर्द्विरभ्यास इत्यभ्युपगम्यते । एवमिहाप्यनेकगुणश्रवणे ऽपि तस्मिन् होमे गुणमात्रविधानमिति तस्यैवाधिकरणभेदेन चतुश्चतुरभ्यासो ऽप्यभ्युपगम्यतामिति वाच्यम् । सायं जुहोति प्रातर्जुहोतीतिविधिभ्यां सायंप्रातःकालयोरग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति तत्तत्कालाग्निहोत्रमन्त्राभ्यामग्निसूर्ययोश्च प्राप्तत्वेन यदग्नये यत्सूर्यायेतिवाक्ययोः कालद्वये ऽपि प्रजापतिमात्रविधिसंक्रान्ततया तयोर्गुणमात्रविधाने ऽपि वाक्यभे-

दोषप्रसङ्गात् । इह संख्याधिकरणयोर्द्वयोरप्यनन्यलभ्यत्वेन गुणमात्रविधाने वाक्यभेदानिवारणात् । एवं च गार्हपत्यान्वाहार्यपचनवाक्ययोः संख्याधिकरणविशिष्टहोमविध्यवश्यंभावे ऽष्टावपि होमा अग्निहोत्रवाक्यविधेयात्सायंप्रातःकालयोर्द्देवताभेदेन द्विर्हिरण्यमनीयाद्धोमादन्य एव स्वविहितस्य विधानायोगादिति न तेषामग्निहोत्रमिति नाम सिद्ध्यति किं त्वग्निहोत्रवाक्यविधेयस्यैकस्यैव होमस्य तन्नामेति प्राप्नोति तदुत्पत्तिवाक्यगतत्वात् । अग्निहोत्रवाक्यविहितस्य साध्यमस्य होमस्य गार्हपत्यान्वाहार्यपचनवाक्यविहितानां होमानामनुवादके विराट्सम्पत्तिवाक्ये तावत्साधारण्येनाग्निहोत्रशब्दप्रयोगसत्त्वे ऽपि तस्य छत्रिन्यायेन लक्षणयोपपत्तेः । अग्निहोत्रवाक्यविहिते कर्मणि प्रथमावगते शक्त्यवश्यम्भावेन तत्सम्बन्धादितरेषु लक्षणोपपत्तावनेकत्र शक्तिकल्पनस्यान्याय्यत्वात् । अत एव रथन्तरं पृष्ठं भवति बृहत्पृष्ठं भवतीत्युत्पत्तिवाक्ययोर्माहेन्द्रस्तोत्रनामत्वेन प्रथमावगतपृष्ठशब्दस्य सप्तदशानि पृष्ठानीत्यनुवादवाक्ये माहेन्द्रादिषु चतुर्षु स्तोत्रेषु प्रयोगो लाक्षणिक इति प्रकृतौ पृष्ठबहुत्वं नास्तीति प्रपञ्चितं सप्तमे विश्वजिति सर्वपृष्ठे तत्पूर्वकत्वात् ज्योतिष्टोमिकानि पृष्ठान्यपि च पृष्ठशब्द इत्यधिकरणे एवं चाधिकारवाक्यस्थेनाग्निहोत्रनाम्ना ऽग्निहोत्रवाक्यविहितस्यैव होमस्य ग्रहणात्तस्यैव फलसम्बन्धः स्यान्न तु यतस्तद्त्यादिवाक्यविहितानामष्टानां होमानां हे आहवनीये इति वाक्यसत्त्वे तु विरा-

---

१ सम्पर्णादिति १ पु॰ पा॰ ।

द्सम्पत्तिवाक्यानुसारेण दशधाऽभ्यसनीयस्याग्निहोत्रस्य दशानामभ्यासानां मध्ये द्वे आहवनीये इत्यनेन परिसंख्यातानामष्टानामपेक्षितमधिकरणमेवं चतस्र इत्यादिवाक्याभ्यां विधीयते । तयोस्तुःसंख्याश्रवणन्तु समं स्यादश्रुतत्वादिति न्यायप्राप्तानुवादकमिति लभ्यते एवम् अग्निहोत्रवाक्यविहितस्यैव होमस्य देवताभेदेनाधिकरणभेदेन च सायं प्रातश्च दशदशाभ्यासाः न तु तद्व्यतिरिक्तानि होमान्तराणि सन्तीति पर्यवसानेऽधिकारवाक्यगतमग्निहोत्रनाम सर्वविधाभ्याससहितस्याग्निहोत्रस्य समर्पकमिति सर्वसाधारण्येन फलसम्बन्धः प्राप्नोति । यथा सोमेन यजेतेति वाक्योत्पन्नस्यैन्द्रवाय्वादिदेवताभेदेनाभ्यसनीयस्य सोमयागस्य ज्योतिष्टोमपदं नामेति सर्वाभ्याससहितस्य सोमयागस्याधिकारवाक्येन[1] फलसम्बन्धः । न च द्वे आहवनीय इति वाक्याभावेऽपि विराट्सम्पत्तिवाक्यमग्निहोत्रहोमस्य दशधाभ्यासविधायकमभ्युपगम्यतां तथा सति तत्र त्वदुक्तरीत्याऽष्टानामभ्यासानामधिकरणमात्रविधायकयोर्गार्हपत्यान्वाहार्यपचनवाक्ययोः संख्याश्रवणं न्यायप्राप्तानुवादकं भविष्यतीत्यापराग्निकहोमानामग्निहोत्रहोमाभ्यासत्वेन फलसम्बन्धः सिद्ध्येदिति वाच्यम् । यदि ह्याहवनीयवाक्यं न स्यात्तदा गार्हपत्यान्वाहार्यपचनवाक्ययोस्तदधिकरणविधायकत्वे दशानामपि तद्ध्योमानामधिकरणविधायकत्वापत्त्या चतुःसंख्यानुवादासंभवेन तयोः संख्याधिकरणविशिष्टकर्मान्तरविधा-

[1] ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यनेन ।

यकत्वस्यावश्यंभावितया विराट्संपत्तिशक्यमग्निहोत्रा-नग्निहोत्रहोमानां प्रचयशिष्टसंख्यानुवादकमित्यकामे-नापि स्वीकरणीयम् । तस्मादाहवनीयवाक्यप्रदृष्ट्यधीन एवापराग्निकहोमानां फलसंबन्धः । एवं चास्मिन्द्रे आहवनीय इति विधौ अविधेयानामापराग्निकहो-माभ्यासानां तदनुद्देश्यस्वर्गसंबन्धप्रापणमेव फलमि-त्ययं विधिरुद्देश्ये विधेयस्य नियमप्राप्तत्वात्तस्यान्यव त-त्वान्यस्य वा प्राप्यस्य नियमस्य निवर्त्यस्य वा भावाच्च केवलं परफलसंबन्धबोधनार्थः । अत्राय संग्रहः ।
ह्रे आहवनीय इति श्रुतौ विधिर्ह्यग्निहोत्रमधिकृ-त्य परसंबन्धविधानं विनास्य न स्यात्फलं किञ्चित् ।
प्राप्तं तत्प्रापणीयं किल यदिह क्रियान्पूरणीयोऽस्ति नांशो नानिष्टं वा निवर्त्यं निजविषयतया दृश्यते किंचिदस्य ।
किं तु व्यापारमेव प्रथयति फलसंयोजनार्थं परेषां ।
प्राप्तः पुण्यैरगण्यैरिव विबुधगणो वेंकटचोणिपालम् ॥

तस्मादस्मिन्नपि विधावव्याप्तिरनिवार्येति भावः । अ-थान्यवाप्यव्याप्तिमुदाहरति ।

आकाङ्क्षयादर्थवादादुपनमति फले कर्मणो यद्विधानम् । त-त्राप्येषा तदङ्गीभवनकृति भवे-त्सन्निधानस्थतानाम् । यत्कि-ञ्चिद्यत्र क्वचाप्यनधिगतवती-

त्येव लक्षणस्थितिश्चेद्वन्त्याद्येषु प्रसिद्धो नियमविधिरपि स्यादपूर्वं विधानम् ॥ ६ ॥

वैश्वदेवीं सांग्रहणीं निर्वपेद्ग्रामकामो वैश्वदेवा वै सजाता विश्वानेव देवान्स्वेन भागधेयेनोपधावति त एवास्मै सजातान् प्रयच्छन्ति ग्राम्येव भवतीति श्रूयते। तत्र सांग्रहणीष्टेर्ग्रामफले यद्विधानं तत्र तस्यास्तत्प्राप्त्यर्थं रात्रिसत्रन्यायेन समनन्तरपठितार्थवादादेव तत्प्राप्तिसंभवात्। आकाङ्क्षो ह्यत्र विधिनार्थवादः स्तुतिलाभाय विशिष्य चात्र ग्रामशब्दो ऽयं बह्वर्थ इति महाभाष्योक्तेरनेकार्थस्य फलसमर्पकस्य ग्रामशब्दस्य विवक्षितार्थनिर्णयलाभाय किं तु सांग्रहण्यास्तदर्थवादात् फलकल्पनायामामनमस्यामनमस्य देवा इति तिस्र आहुतीर्जुहोति एतावन्तो वै सजाता ये महान्तो ये क्षुल्लका याश्स्त्रियस्तांस्तानेवावरुन्धे त एनमवरुद्धा उपतिष्ठन्तीति तत्सन्निधिपठितानामामनहोमानामपि तदर्थवादात्फलार्थत्वकल्पनाप्रसक्त्या तेषां सांग्रहण्यङ्गत्वं न प्राप्नुयादिति तत्प्राप्त्यर्थम्। एतत्सत्त्वे हि प्रत्यक्षेण विधिना सांग्रहण्याः शीघ्रं फलसम्बन्धे ऽवगते फलवत्फलन्यायादामनहोमानां तदङ्गत्वं प्राप्नोति। एवं चात्र विधेयायाः सांग्रहण्याः केनापि रूपेणोद्देश्यग्रामसंबन्धाप्राप्तिर्नाक्षीयत्वाप्यव्याप्तिरनिवार्या। ननु लक्षणे प्रकृतविध्युद्देश्यप्राप्ते सतीति न विशेष्यते किं तु विधिविषये ऽन्यस्मिन्वा

प्रकृतविध्युद्देश्यमन्यद्वा किञ्चिदप्राप्ते सतीति । तथा च नैतासामव्याप्तीनामवकाश इति चेत् । एवं व्रीहीनवहन्तीत्यादिषु प्रसिद्धो नियमविधिरप्यपूर्वविधिः स्यात् । दार्शपौर्णमासिके प्रयाजादौ सौर्यादिविकृतिमप्राप्ते सति तद्विधिप्रवृत्तेरतस्तथाविवक्षणौचित्याद्व्याप्तिः स्यादेवेति भावः । स्यादेतत् । विधिरत्यन्तमप्राप्त इत्यस्य तद्विध्यप्रवृत्तावप्राप्तिः प्रसक्तिमतीतिपर्यवसितोऽर्थस्तस्य श्लोकस्य व्याख्यानसमये सूचितस्तेन तस्य विधेस्तत्प्राप्तिफलकत्वमर्थाद्विभाति । अतो यस्मिन्कस्मिंश्चिद्यत्किञ्चिदप्राप्ते सतीति विवक्षायामपि तस्य तत्प्राप्तिफलक इत्यधिकांशस्य लक्षणे निवेशान्नावहनननियमविधावव्याप्तिप्रसङ्गः । तस्य मौर्यादिषु प्रयाजादिप्राप्तिफलकत्वाभावात् । एवं च वैकृताग्न्यतियाज्यविधिष्वविधेयानामपि गुणकामानां तत्तद्विध्युद्देश्यासु विकृतिषु प्राप्तेर्द्वादशाहिकगवामयनिकाच्यनीकान्तर्गततदनङ्गतयविधिषु[1]विधेयानामेवाग्रतानां तत्तद्विध्यनुद्देश्यासु द्वादशाहविकृतिषु प्राप्तेः । "उपांशु पौर्णमास्यां यजन्ति"ति विधौ अविधेयस्योपांशुयाजस्य तद्विध्यनुद्देश्ये स्वर्गे प्राप्तेः हृ आयवनीय इति विधानविधेयानामाघाराग्निकर्त्तृमानामनुद्देश्ये स्वर्गे प्राप्तेः सांयवनीफलविधायविधेयानां तत्सन्निधिपठितानामनुद्देश्य तद्विधेये कर्मणि प्राप्तेश्च फलस्य सद्भावान्न क्वाप्यव्याप्तिशङ्कावकाशोऽपीत्याशङ्क्याह ।

---

१ [illegible]

उद्देश्ये ऽन्यत्र वा यद्विधिपदमितरद्वापि न प्राप्तिमत्स्यात् तत्प्राप्तिं तत्रतन्वन्विधिरितिकरणे ऽप्येवमव्याप्तिरेव । ज्योतिष्टोमादिकानां त्रिदिवगतिफले सर्वकामोक्तिसिद्धे किं प्राप्यं धर्मजाते प्रकरणगमिते स्वर्गकामश्रुतिभ्याम् ॥ ७ ॥

"ज्योतिष्टोमेन स्वर्गकामो यजेत" "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते"ति श्रूयते । इदं वाक्यद्वयं ज्योतिष्टोमशब्दगृहीतस्य सोमयागस्य दर्शपूर्णमासशब्दगृहीतानामाग्नेयादियागानां च न स्वरूपप्राप्त्यर्थं "सोमेन यजेते"तिवाक्येनाग्नेयादिवाक्यैश्च तेषां प्राप्तत्वादिति तावत्स्पष्टमेव । नापि तेषां स्वर्गफलसंबन्धप्राप्त्यर्थम् । "एकस्मै वा अन्ये यज्ञक्रतवः कामायाह्रियन्ते सर्वेभ्यो ज्योतिष्टोमः", "एकस्मै वा अन्ये यज्ञक्रतवः कामायाह्रियन्ते सर्वेभ्यः कामेभ्यो दर्शपूर्णमासावि"ति वचनाभ्यां तेषां पश्वादिफलकत्ववत्स्वर्गफलकत्वस्यापि प्राप्तिसम्भवात् । नापि अङ्गसंबन्धबोधनार्थं प्रकरणपठितेन वाक्येन तत्प्राप्तिसम्भवात् । न हि स्वर्गकामवाक्ययोरङ्गसंबन्धबोधकत्वमपि तदुचितशब्दकल्पनां विना सम्भवति । तयोरङ्गसमर्पकशब्दाभावात् । न च दीक्षणीयादिसमि-

दादिवाक्यविशेषितयोस्तयोस्तत्संबन्धबोधकत्वं सम्भवतीति वाच्यम्। दीक्षणीयादिवाक्येष्वपि यच्छब्दोपबन्धरहितस्वतन्त्राख्यातसत्त्वेन स्वतस्तेषामन्यविशेषणत्वालाभात्। तस्मात्स्वर्गकामवाक्ययोरङ्गसंबन्धबोधकत्वाङ्गीकारे ऽपि तयोर्दीक्षणीयादिसमिदादिवाक्यानां चाप्रत्यक्षमप्येकवाक्यत्वं प्रकरणबलेनैकवाक्यतापादकशब्दकल्पनयोपपादनीयम्। तथा हि ज्योतिष्टोमेन दर्शपूर्णमासाभ्यां वा स्वर्गापूर्वं भावयेदित्युक्ते भवति प्रकाराकाङ्क्षा कथं तेन ताभ्यां वा तद्भावनीयमिति अनिर्ज्ञातप्रकारत्वात्। न हि गोधूमैर्मण्डकाः कार्या इत्युक्ते तत्प्रकारानभिज्ञस्य नियोज्यस्याकाङ्क्षा न भवति कथं गोधूमैर्मण्डकाः कर्त्तव्या इति कुठारेण वृक्षं छिन्धीत्युक्ते तत्प्रकारानभिज्ञस्य भवत्येव तदाकाङ्क्षा तं प्रतिहस्ताभ्यां कुठारं गृहीत्वा तदुद्यमननिपातनव्यापारावर्त्तनेनेतिवक्तव्यमेव। एतत्प्रकारस्य लोकप्रसिद्धतरत्वात्प्रायेण तत्र न भवत्याकाङ्क्षा। इह तु ज्योतिष्टोमादिभिः स्वर्गापूर्वसम्पादनस्यात्यन्तालौकिकत्वात्प्रकाराकाङ्क्षावश्यम्भाविनी। तथा दीक्षणीयादीनामप्यस्ति प्रयोजनकाङ्क्षा। तदिह परस्पराकाङ्क्षालक्षणं प्रकरणे सति रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेतिवत् दीक्षणीयादिवाक्यानां प्रत्यक्षे ज्योतिष्टोमादिवाक्यैकवाक्यत्वे चासति येन शब्देन दीक्षणीयादिव्यापाराणां ज्योतिष्टोमादिविशेषणतोच्यते तादृक्शब्दकल्पनेनाप्रत्यक्षमेकवाक्यत्वं प्रकरणबलेन कल्पनीयम्। यथा कीदृशं देवदत्तगृहमिति

प्रकाराकाङ्क्षायां द्वारोपान्तलिखितशङ्खपद्मनिधिवच्च-
म्पकालङ्कृतनिष्कुटं देवदत्तगृहमित्यभिधानतो विशेष-
णमनुक्त्वा इदं देवदत्तगृहं वर्त्तते द्वारोपान्ते लिखिते श-
ङ्खपद्मे स्तः निष्कुटे चम्पकाः सन्तीत्येतावत्युक्ते ऽपि गृहस्य
प्रकाराकाङ्क्षया प्रकारोपदेशस्य प्रयोजनाकाङ्क्षया
च तदुचितशब्दकल्पनया एकवाक्यत्वं कल्प्यत इत्येव-
मेवोपपादितं तन्त्ररत्ने। तथा च सर्वकामवाक्ययोरङ्गसंब-
न्धबोधकत्वानङ्गीकारेण प्रकरणबलात्तद्बोधकं वाक्यं
कल्पयितुं शक्यम्। तथा हि यद्यपि सर्वकामवाक्ययोरा-
ख्यातरहितयोर्यागभावना न श्रूयते तथापि चतुर्थ्या
ज्योतिष्टोमस्य दर्शपूर्णमासयोश्च सर्वकामार्थत्वप्रतिपा-
दनात् ज्योतिष्टोमेन दर्शपूर्णमासाभ्यां च स्वर्गपशुपुत्र-
हिरण्याद्यपूर्वं भावयेदित्यर्थतो लाभात्स्यादेव तत्प्रकारा-
काङ्क्षा दीक्षणीयादीनां समिदादीनाञ्च पूर्ववत्प्रयोज-
नाकाङ्क्षा स्थितैव एवमुभयाकाङ्क्षालक्षणेन प्रकरणेन
दीक्षणीयादिभिः समिदादिभिश्चोपकृत्य ज्योतिष्टोमेन
दर्शपूर्णमासाभ्यां च स्वर्गपश्वाद्यपूर्वं भावयेदिति वाक्यं
किमिति कल्पयितुं न शक्यम । एवं स्वर्गसंबन्धस्याङ्ग-
संबन्धस्य चान्यलभ्यत्वे ऽपि[1] केचन स्वर्गसंबन्धे सर्व-
कामवचनलभ्ये स्वर्गकामवाक्ययोरकृतार्थत्वं मन्यमा-
नास्तयो रङ्गसंबन्धबोधनार्थत्वमित्याहुः। अन्ये तु सर्व-
कामश्रुत्यविरोधेन स्वर्गकामवाक्ययोरेव स्वर्गसंबन्ध-
बोधनार्थत्वं सर्वकामवाक्ययोस्तु सामान्यसुखप्रवृत्तयोः
स्वर्गेतरसंबन्धबोधनार्थत्वमित्याहुः। उभयोरप्यन्यतः

---

१ सर्वेभ्यो दर्शेत्यादिना प्रकरणेन च।

प्राप्तिसम्भवात्तद्व्यतिरेकेण च क्वचित्कस्य चित्प्रापणीयस्यादर्शनात्स्वर्गकामवाक्ययोरुक्तलक्षणाव्याप्तिः सर्वथैवानिवार्येति भावः । अथ प्रकारान्तरेणोदाहृततदितरापूर्वविधिव्याप्तिमुदाहरति ।

नाना शाखाग्निहोत्रप्रभृतिवि-
धिषु चाव्याप्तिरेवं सति स्यात्
तत्तद्विध्यप्रवृत्तावपि तदधिग-
तिः स्याद्धि विध्यन्तरेण । सा सा
प्राप्तिस्तु नैवाभ्युदयफलवतो-
त्येवमप्राप्तिसत्त्वं ज्ञात्वाव्याप्ते-
र्निरासे नियमपरिसंख्यानुवृत्ते-
र्निवृत्तिः ॥ ८ ॥

अग्निहोत्रादिविधयस्तावन्नानाशाखासु श्रूयन्ते । तेन तत्तच्छाखाम्नातविध्यभावे नानाशाखासु विप्रकीर्णानामङ्गानामिवाग्निहोत्रादीनामपि शाखान्तरतः प्राप्तिस्यादेव । ततश्च तत्तद्विध्यभावे ऽन्यतः प्राप्यसम्भवरूपस्याप्राप्तविशेषणार्थस्याभावात्सर्वेष्वपि नानाशाखाम्नातापूर्वविधिष्वव्याप्तिरनिवार्या । ननु शाखान्तराधिकरणे तेषां तत्तच्छाखाध्यायिनं प्रति स्वस्वशाखाध्ययनप्राधान्येनाज्ञातज्ञापकत्वं समर्थितम् । सत्यम् । न त्वज्ञातज्ञापकत्वसिद्धिमात्रेणाप्राप्तविशेषणार्थो विवक्षितो

लभ्यते । न चाज्ञातज्ञमेवाप्राप्तशब्दार्थः । तथा सति नियमपरिसंख्ययोरपि यथोक्तेपमन्त्रलिङ्गाभ्यां प्रागेव प्रवृत्तयोरज्ञातज्ञापकत्वसत्त्वेन तयोरतिव्याप्त्यापत्तेः । नन्वभ्युदयशिरस्कप्राप्तिसम्भवराहित्यमप्राप्त इत्यनेन विवक्षितम् । ततश्च स्वाध्यायो ऽध्येतव्य इति नियमविधिबलादध्ययनगृहीतस्य स्वशाखान्तर्गतवाक्यजन्यतदर्थज्ञानस्यैवाभ्युदयकारित्वेन स्वशाखान्तर्गतवाक्यसद्भावे शाखान्तर्गतवाक्यजन्यज्ञानस्याभ्युदयकारित्वस्याभावात्तच्छाखाध्यायिपुरुषापेक्षया सर्वेषामग्निहोत्रादिविधीनामज्ञातज्ञापकत्वरूपप्राप्तप्राप्तिफलत्वमपि विवक्षितरूपमस्त्येवेति न नानाशाखाग्निहोत्रादिविधिष्वव्याप्तिर्नापि स्वर्गकामवाक्येष्वव्याप्तिस्तेष्वपि साप्तदश्यवाक्यन्यायेनाभ्युदयफलकप्राप्त्यभावसत्त्वात् । तथा हि सप्तदशसामिधेनीरनुब्रूयादित्यनारभ्य श्रूयते । अत्र विधीयमानस्य साप्तदश्यस्य न सामिधेनीद्वारा प्रकृतौ निवेशः प्राकरणिकतत्पाञ्चदश्यावरुद्धत्वात् । किं तु विकृतिष्वेव । तत्रापि श्रुतसाप्तदश्यासु मित्रविन्दादिष्वेव निवेशो न सर्वासु विकृतिषु । अनारभ्यश्रुतं हि साप्तदश्यं यावत्सामिधेनीद्वारा सकलविकृत्यङ्गं कल्प्यते तावत्प्राकरणिकैर्वाक्यैर्मित्रविन्दादिसंबन्धे कृते चीणार्थापत्तिर्न क्रत्वन्तरसंबन्धं कल्पयति । तेनानारभ्याधीतस्य साप्तदश्यस्योपसंहारार्थानि तत्प्रकरणाधीतानि साप्तदश्यवचनानि ततश्च प्राकरणिकवचनैः साप्तदश्यस्य क्रतुसंबन्धसिद्धिरनारभ्याधीतवाक्येन सामिधेनीसंबन्धसिद्धिरिति मीमांसकमर्यादा । अत्रानारभ्य विधानाभावे

ऽपि साप्तदश्यस्य क्रतुसंबन्धवत्सामिधेनीसंबन्धो ऽपि प्राकरणिकवचनैरेव सिद्ध्यतीति अनारभ्याविधानस्य वैयर्थ्यशङ्का प्राप्नोति। अत्रोक्तं तन्त्ररत्ने। यद्यपि प्राकरणिकेनैव क्रतुसंबन्धः सामिधेनीसंबन्धश्च सिद्ध्यति। तथापि वाक्यद्वयाम्नानादेवं विज्ञानमभ्युदयकारीति विज्ञायते अर्थवादप्ररोचितवदिति। ततश्चास्य न्यायस्य सार्वकाम्यवाक्यप्राप्त्यर्थस्वर्गकामवाक्यसाधारण्यात्तत्राप्यभ्युदयशिरस्कप्राप्त्यभावो वक्तुं शक्यत इति चेत्। तथा सति नियमपरिसंख्याविध्योरत्यन्तमप्राप्त इति विशेषणाभ्यां निवृत्तिर्न स्यात्। तत्रापि स्वाध्यायनियमविधिबलादेवार्थाक्षेपमन्त्रलिङ्गाभ्यामवघातादिप्राप्तेरभ्युदयकारित्वाभावस्य वक्तुं शक्यत्वात्। तस्मादन्यतः प्राप्त्यभावमात्रमिष्टाप्राप्तिरिति वक्तव्यमित्युदाहृतस्थलेऽव्याप्तिः सुदृढैवेति भावः॥ ७॥ नन्वस्त्वन्यतः प्राप्त्यभावमात्रमप्राप्तविशेषणार्थः। प्राप्त्यभावस्तु तत्तद्विधिमात्राप्रवृत्ताविति नेष्यते किं तु विध्यन्तराप्रवृत्तिसहितायां केवलायां वा तत्तद्विध्यप्रवृत्तौ यः प्राप्त्यभावः स सर्वो ऽप्यप्राप्तविशेषणार्थ इतीष्यते। तत्र तत्तच्छाखागताग्निहोत्रादिविध्यप्रवृत्तौ तदन्यसकलशाखागततत्तद्विध्यप्रवृत्तिसहितायां तदप्राप्तिरस्तीति न नानाशाखागताग्निहोत्रादिविधिष्वव्याप्तिः। नापि स्वर्गकामविध्योरव्याप्तिस्तदप्रवृत्तौ सार्वकाम्यविध्यप्रवृत्तिसहितायां ज्योतिष्टोमादीनां स्वर्गसंबन्धाप्राप्तिसत्त्वात्। "वसन्ते वसन्ते ज्योतिषा यजेते"ति "यावज्जीवं दर्शपूर्णमासाभ्यां यजेते"ति विधिभ्यां तेषां प्रत्यवायपरि-

ङ्गाराधित्वावगमेन तत एव फलाकाङ्क्षाभावेविश्वजिन्न्यायाविषयतया ततः स्वर्गसंबन्धप्राप्तेरनाशङ्कनीयत्वात् । अवश्यं च क्वचित्क्वचिन्नियमविधौ तत्तद्विध्यप्रवृत्तेर्विध्यन्तराप्रवृत्तिसाहित्यन्यायो ऽयमनुसरणीयः । अन्यथा व्रीहिभिर्यजेतेतिनियमविधौ तल्लक्षणाव्याप्तिः स्यात् । व्रीहिशास्त्राभावे यवशास्त्रेण यवानामेव नियतप्राप्त्या व्रीहीणां पक्षप्राप्त्यभावात् । एवं यवैर्यजेतेतिनियमविधावपि तदव्याप्तिः स्यात् । तदभावे व्रीहिशास्त्रेण व्रीहीणामेव नियतप्राप्त्या यवानां पक्षप्राप्त्यभावात् । तथा औदुम्बरो यूपो भवतीत्यादिवैकृतद्रव्यविधिष्वपि सर्वे द्रव्यविधयो नियमविधय इति मीमांसकमर्यादया नियमविधित्वेन समर्थनीयेषु तदव्याप्तिः स्यात् । वैकृतविध्यभावे प्राकृतेन खादिरो यूपो भवतीत्यादिशास्त्रेण चोदकतः खादिरादीनामेव नियतप्राप्त्या उदुम्बरतादीनां पक्षप्राप्त्यभावात् । ततश्च व्रीहियवशास्त्रयोर्द्वयोरप्यभावे पुरोडाशप्रकृतिद्रव्याकाङ्क्षया व्रीहियवनीवारादीनां पक्षप्राप्त्या प्राकृतवैकृतविधीनामभावे यूपादिप्रकृतिद्रव्याकाङ्क्षायां धवखदिरपलाशोदुम्बरादीनां पक्षप्राप्त्या च व्रीहियवोदुम्बरादीनां पक्षप्राप्त्या च व्रीहियवोदुम्बरादिशास्त्रेषु नियमविधिलक्षणं समर्थनीयम् । तथा परिसंख्यालक्षणे ऽपि न्यायो ऽयमनुसरणीयः । अन्यथा मित्रविन्दाध्वरकल्पायेमृधचातुर्मास्यपत्न्युपयमादिना नाकर्ममसामान्नातमाप्तदृश्यविधिव्यनारभाविहितगार्हस्थ्योपसंहारार्थत्वेन तदितरविकृतीनां माप्तद्रव्यसंबन्धव्यावृत्तिफलकतया परिसंख्याद्वपेषु

तल्लक्षणाव्याप्तिः स्यात् । मित्रविन्दागतविध्यभावे ऽध्वरकल्पागतविधेर्मित्रविन्दासाधारण्येनाध्वरकल्पेतरसकलविकृतीनां सान्नाय्यसंबन्धव्यावृत्तिफलकतया मित्रविन्दायामन्यतः सान्नाय्यप्राप्त्यभावात् । एवमुक्तन्यायेनाध्वरकल्पादिष्वपि तत्प्राप्त्यभावात् । तथा गृहमेधीयगतेष्वाज्यभागौ यजति अग्नये स्विष्टकृते समवद्यति इडामुपह्वयते इत्यादिप्रकृताङ्गपुनर्विधिषु चोदकलोपकत्वेन तदितराङ्गानां गृहमेधीयसंबन्धव्यावृत्तिफलकतया परिसंख्यारूपेषु तल्लक्षणाव्याप्तिः स्यात् । आज्यभागविध्यभावे स्विष्टकृद्विधेराज्यभागसाधारण्येन स्विष्टकृदितरसकलचोदकप्राप्याङ्गानां गृहमेधीयसंबन्धव्यावृत्तिफलकतया आज्यभागयोरन्यतो गृहमेधीये प्राप्त्यभावात्[1] । उक्तन्यायेनैव स्विष्टकृदादीनामपि तत्प्राप्त्यभावात् । ततश्च मित्रविन्दादिप्रकरणगतसकलसान्नाय्यविध्यभावेनारभ्याधीतसान्नाय्यविधिना प्रकृतितः प्राप्तसान्नाय्यावरोधाच्छिद्रत्वेनाविशेषात्सर्वासु विकृतिषु सान्नाय्यप्राप्त्या गृहमेधीयप्रकरणगतसकलप्राकृताङ्गपुनर्विध्यभावे चोदकात्सर्वेषामाज्यभागादीनां गृहमेधीये प्राप्त्या च तेषु परिसंख्यालक्षणं समर्थनीयम् । तद्वत्कालशाखागताग्निहोत्रादिविध्याद्यभावे ऽग्निहोत्राद्यप्राप्त्या तेष्वपूर्वविधिलक्षणं समर्थयितुं शक्यमेव । अतो न क्वाप्यव्याप्तिदोष इत्याशङ्क्याह ।

तत्तद्विध्यप्रवृत्तौ सुलभमितर-

---

१ संबन्धप्राप्त्यभावादिति २ पु० पा० ।

विध्यप्रवृत्त्या युतायाम् तेषामप्राप्तिमत्त्वं नियमपदयवव्रीहिपद्माप्तितावत्। नानाकर्मोपसंहृत्युचितनियतसत्सान्तदप्राप्तिवच्चेत्येवं सृष्टौ तु पृष्ठस्तुतिनियमसुखातिप्रसक्तिः प्रसर्पेत्॥६॥

एवमव्याप्तिपरिहारार्थमनियमेनैकानेकविध्यप्रवृत्तावप्राप्तेरपूर्वविधिलक्षणानिविष्टत्वकल्पनायामुपहव्यादिविकृतिषु प्रकृतितो विकल्पेन प्राप्तयोर्बृहद्रथन्तरयोरन्यतरनियमार्थं बृहत्पृष्ठं भवति रथन्तरं पृष्ठं भवतीति विधौ विकृत्यतिरात्रे प्रकृतितो विकल्पेन प्राप्तयोः षोडशिग्रहतद्वर्जनयोः षोडशिग्रहनियमार्थं उत्तरेऽहन् हिरावस्य गृह्णत इति विधौ गृहमेधीये प्रकृततः समुच्चित्य प्राप्ताज्यभागतदितराङ्गकलापमध्ये चोदकलोपकतया तदितराङ्गपरिसंख्यारूपे आज्यभागौ यजतीति विधौ चातिव्याप्तिः स्यात्। बृहद्रथन्तरपृष्ठयोः षोडशिग्रहस्याज्यभागयोश्च प्राकृतवैकृतविध्यभावे सर्वथैवाप्राप्तिमत्त्वात्। व्रीहियवविध्योर्वैकृतद्रवविधिषु प्राकरणिकमासद्वयविधिषु गृहमेधीयस्विष्टकृदादिविधिषु चानेकविधप्रवृत्त्यपेक्षया पाक्षिकीं नियतां च प्राप्तिं समाश्रित्य नियमपरिसंख्याविधित्वेन समर्थितेषु तत्तद्विधप्रवृत्त्यपेक्षया सर्वथैवाप्राप्तेरपि सत्त्वेन तेष्वव्याप्तिप्राप्तिः स्यात्।

न ह्यनेकविधाप्रहत्त्यपेक्षैवाप्राप्तिरपूर्वविधिलक्षणे निवे-
श्यत इति नियन्तुं शक्यते तथा सति व्रीहीन्प्रोक्ष-
तीत्याद्यपूर्वविधावप्राप्तेस्तद्विधिमात्राप्रहत्त्यपेक्षत्वेन तत्रा-
व्याप्तिः स्यादिति तत्परिहारार्थमनियमेनैकानेकविषय-
प्रहत्त्योस्तल्लक्षणे निवेशनीयत्वात् । तथा चतुर्जुह्वां गृह्णा-
ति अष्टावुपभृति चतुर्ध्रुवायामिति कार्यविशेषासंयुक्त-
योत्पन्नानां जौहवाज्यादीनां विनियोगविधिषु यज्जुह्वां
गृह्णाति प्रयाजेभ्यस्तत् यदुपभृति प्रयाजानुयाजेभ्यस्तत् ।
सर्वस्मै वा एतत् यज्ञाय गृह्यते[1] यत् ध्रुवायामाज्यमित्येवं
रूपेषु मध्ये जौहवौपभृताज्यविनियोगविध्योर्नियमवि-
धित्वेनाभ्युपगतयोर्नियमविधित्वं तथाणामेवैतेषां विधी-
नामप्रहत्त्यपेक्षया जौहवाज्यादीनां द्रव्याकाङ्क्षेषु प्रयाजा-
दिषु पक्षे प्राप्तिं सम्भाव्य समर्थनीयम् । तत्तद्विधाप्रहत्त्यपे-
क्षया विधेययोर्जौहवौपभृताज्ययोः प्रयाजानुयाजेष्वप्रा-
प्तिरपि सम्भवति । तथा सर्वयज्ञार्थध्रौवाज्यान्वयेन निरा-
काङ्क्षेभ्यः प्रयाजानुयाजेभ्यः पराहत्त्य तयोरयज्ञरूपे-
ष्वाज्यामेक्षणदनकरणादिकार्येष्वेव प्राप्तेरिति तयोरपि
विध्योरतिव्याप्तिः स्यात् एवमनियमेनैकानेकविधाप्र-
हत्त्यपेक्षया पाक्षिकनियतप्राप्त्योर्नियमपरिसंख्यालक्षण-
निविष्टत्वकल्पनायां तयोरपि लक्षणयोरतिव्याप्तिः
स्यात् । तथा हि ध्रौवाज्यविनियोगविधेर्द्रव्यविषयत्वे
ऽपि नियमविधित्वं न सम्भवति जौहवौपभृताज्ययोः
प्रयाजानुयाजार्थत्वे सति परिशेषादेव ध्रौवाज्यस्य तद-
तिरिक्तद्रव्यापेक्षसर्वयज्ञार्थत्वनियमसिद्धेः । न च स्थाल्या-

---

[1] द्रव्याकाङ्क्षयागापेक्षम् ।

जास्योपि तेषु पक्षप्राप्त्या परिशेषात्सिद्धे र्नियमविधित्वं सम्भवतीति वाच्यम्। नीवारान्नजस्य ग्रहणे विनियोगेन निराकाङ्क्षस्य स्वाध्यानास्य स्वतस्तेषु प्राप्त्यसम्भवात् तस्मात् द्रव्यापेक्षसर्वयज्ञेष्वयज्ञरूपेषु सदनकरणादिषु च नीवाराज्यस्य समुच्चित्य प्राप्तौ सदनकरणादिवारणार्थं तस्य परिसंख्याविधित्वमेव युक्तं तत्र चयाणामेतेषां विधीनामप्रवृत्तौ नीवाराजस्य तत्तद्विनियोगविधिसंग्राह्येषु चाजभागादिषु च पक्षप्राप्तिः सम्भवतीति तत्र नियमविधिलक्षणस्यातिव्याप्तिः। तथा रथन्तरं पृष्ठं भवतीति वैकृतो विधिनियमविधिरुस्य प्राकृतबृहद्रथन्तरविकल्पविधेयाप्रवृत्तौ प्रकृतितो बृहद्रथन्तरयोः समुच्चित्य प्राप्तिः सम्भवतीति तत्र परिसंख्यालक्षणस्यातिव्याप्तिः पृष्ठ्यः षडहो बृहद्रथन्तरसामा कार्यं इति। गवामयनिके षडहे रथन्तरबृहत्पृष्ठविधिरपूर्वविधिः तदन्तर्गतेषु तृतीयादिष्वहःसु तत्प्रकृतिभूतात् द्वादशाहिकान्नानापृष्ठषडहात् क्रमेण वैरूपवैराजशाक्वररैवतपृष्ठानामेव प्राप्तत्वेन तृतीये रथन्तरं चतुर्थे बृहत् पञ्चमे रथन्तरं षष्ठे बृहदित्यस्यार्थस्य कथं चिदपि प्राप्त्यभावात्। द्वादशाहिकनानापृष्ठविध्यभावे तस्मिन् गवामयनिकषडहे ज्योतिष्टोमात् बृहद्रथन्तरपृष्ठयोरनियता प्राप्तिः सम्भवतीति तत्र नियमविधिलक्षणस्यातिव्याप्तिः। आज्यभागपुनर्विधानेन गृहमेधीयवदपूर्वे ऽवभृथे प्रयाजानुयाजप्राप्त्यभावात् तत्रापबर्हिषः प्रयाजान्यजति अपबर्हिषो ऽनुयाजान्यजतीति बर्हिर्व्यतिरिक्तप्रयाजानुयाजप्राप्त्यर्थो ऽपूर्वविधिः। तत्राज्यभागपुनर्विधानाभावे

वर्हिः संज्ञकप्रयाजानुयाजयोस्तद्व्यतिरिक्तप्रयाजानुयाजानां च समुच्चित्य प्राप्तिः सम्भवतीति तत्र परिसंख्यालक्षणस्यातिव्याप्तिः । एवमतिव्याप्त्यावहत्वादनियमेनैकानेकविध्यप्रवृत्त्योरपूर्वविध्यादिलक्षणानुप्रवेशकल्पनमयुक्तमितिभावः ॥ ८ ॥ स्यादेतत् । वैरूपरथन्तरपृष्ठादिविधिष्वपूर्वविध्यादिलक्षणानुगतेर्नातिव्याप्तिर्नानालक्षणसमावेशानुसारेणानेकविधिरूपत्वाङ्गीकारे दोषाभावात् तावता रथन्तरपृष्ठादिष्वनुष्ठानभेदासाङ्कर्यात् उपधेयसङ्करेऽपि तत्तल्लक्षणोपाधीनामसाङ्कर्याच्च । एकैकस्मिन्वाक्ये विषयभेदेनापूर्वविध्यादिलक्षणानामुपजीव्योपजीवकभावेन तत्फलानां च साङ्कर्यस्य संप्रतिपन्नत्वेन तन्न्यायादेकानेकविध्यप्रवृत्तिभेदेनापि तदुभयसाङ्कर्याभ्युपगमसम्भवाच्च । तथा हि उपांशु पौर्णमास्यां यजन्निति वाक्ये उपांशुयाजप्राप्तफलसंबन्धप्रापकत्वेन तस्मिन्पौर्णमास्या सह प्राप्तामावास्यासंबन्धस्यावर्त्तकत्वेन चापूर्वविधिपरिसंख्याविधिलक्षणयोः साङ्कर्यं तावदङ्गीकृतं चतुर्थश्लोकव्याख्याने सायं जुहोति प्रातर्जुहोतीति विध्योर्नियमपरिसंख्याविधिलक्षणसाङ्कर्यं दृश्यते तौ खल्वग्निहोत्रं जुहुयात्स्वर्गकाम इति विहितकाम्याग्निहोत्रप्रयोगस्यानियतकालत्वप्राप्तौ सायंप्रातःकालविशेषनियमार्थौ । यावज्जीवमग्निहोत्रं जुहोतीति विहितनित्याग्निहोत्रप्रयोगस्य सातत्येन सार्वकालत्वप्राप्तौ सायंप्रातःकालावच्छिन्नमेव जीवनं निमित्तमिति निमित्तविशेषणसमर्पणेनान्यकालव्यावर्त्तकौ च । यद्वा अश्वः श्यावो दक्षिणेति उपहव्यदक्षिणाविधिरिहोदाहरणं स हि गौश्चाश्वश्चेत्या-

दिज्यौतिष्टोमिकदक्षिणाविधिनाप्रवस्य गवादिभिः समुच्चित्य प्राप्तौ गवादिपरिसंख्यार्थः। तस्यानियतत्वप्रमाप्तौ श्यावनियमार्थश्च। यद्योन्यां तदुत्तरयोर्गायतीति विधावपूर्वनियमविधिलक्षणमाक्ष्यं दृश्यते कथं क्रतौ स्तोत्रसाधनानां साम्नां यथाध्ययनमेकस्यामृचि गान प्राप्तौ एकं साम तृचे क्रियते स्तोत्रीयमितिवचनात् तृचे तानि गातव्यानीति स्थापितमेकर्चस्थानि यच्च सु.त्र स्वाध्यायवत्। तृचे वा लिङ्गदर्शनादिति पूर्वोत्तरपक्षसूत्राभ्यां दशमाध्याये। ततश्च तेषां स्वयोनिषु गीयमानानां क्रतुष्वन्ययोरपि ययोः कयोश्चिदृचोर्गेयत्वे प्राप्ते संशरविलेशपरिहारार्थं योनिसमच्छन्दस्कयोरेव गातव्यमितिनिर्णीतं तदभ्यासः समासु स्यादिति नावमिकाधिकरणे तत्रेदं वचनं प्रवर्त्तते यद्योन्यां तदुत्तरयोर्गायतीति। अत्र योनिग्रन्थपठितयोर्योन्युत्तरयोर्गानं न विधीयते किं तूत्तराग्रन्थपठितयोस्तदुत्तरयोस्तत्रैवोत्तराशब्दस्य पदान्तरसन्निधाननिरपेक्षया रूढ्या प्रसिद्धेरिति निर्णीतं नैमित्तिकं तूत्तरात्वमिति नावमिकाधिकरणे। उत्तराग्रन्थपठिते चोत्तरे रथन्तरादियोनीनां तद्विषमच्छन्दस्के वामदेव्यादियोनीनां तत्समच्छन्दस्के। एवं च रथन्तरादिसाम्नां संशरविलेशपरिहारार्थमुत्तराव्यतिरिक्तयोरेव कयोश्चिद्योनिसमस्छन्दस्कयोरृचोर्गानमाप्तावप्राप्तोत्तराप्रापणार्थम् उत्तराविधिः। वामदेव्यादिसाम्नामुत्तरयोरन्ययोर्वा कयोश्चिद्योनिसमच्छन्दस्कयोर्गानप्राप्तावुत्तरानियमार्थं इति। कौ पुनः संशरविलेशदोषौ। संशरः साम्नो हिंसा विलेशस्तस्य स्वरूपेक्षयाल्पत्वं यद्या-

ह्मणवत्य इति पञ्चमाध्यायसूत्रेण यां वै कां चन ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चितावुपदध्यादितिवचनबलेन प्रत्यक्षज्ञानवाच्यभिपूर्वज्ञानातिवशात्प्रत्यक्षब्राह्मणविहितानामिष्टकानां मध्यमचितावेवोपधानं न त्वन्ते तु बादरायण इति न्यायाच्चित्यन्तरे इतिनिर्णीतत्वादिति चेत्। नैतदपि युक्तम्। कासामिष्टकानां सृष्टिमन्त्रादिभिरुपधानमिति प्रागनवगततया सृष्ट्यादिशब्दोक्तानां सृष्टिशब्दादिवन्मन्त्रोपधेयाष्टकाविशेषाणां बुद्ध्यनारोहेण विधातुमशक्यत्वात्। तस्मात्तन्मन्त्रविशेषा एवेष्टकोपधाने विधीयन्त इति युक्तम् तेषां च विधिर्नोपधानप्राप्त्यर्थः प्रकरणादेव प्राप्तिसम्भवात्। नापि लिङ्गविनियोज्यमन्त्रान्तरपरिसंख्यार्थः। मन्त्रान्तराम्नानवैयर्थ्यापत्तेः। किं त्वेकया स्तुवते प्रजा अधीयन्त प्रजापतिरधिपतिरासीत्तिसृभिरस्तुवत ब्रह्म सृज्यत ब्रह्मणस्पतिरधिपतिरासीदित्यादीनामुपधानैकान्तिकलिङ्गविशेषरहितानां मन्त्राणामिष्टकाग्रहणादिष्वपि विनियोगप्रसक्तौ तत्परिसंख्यार्थः। प्रत्येकोपधाननियमार्थश्च। समुदितोपधाने तत्तदिष्टकोपधानस्य क्रमोच्चार्यव्यवस्थिततत्तन्मन्त्रकरणकत्वायोगात्। मध्यमचिति प्राप्त्यर्थश्च। मन्त्रव्यतिरिक्तेष्टकासु विशेषान्तरानिरूपणेन मन्त्रविनाकृतेष्टकानियमविधेरशक्यतया यां वै कां चनेतिविधेरपीष्टकाविशेषणमन्त्रविध्यवलम्बनत्वात् एवं तावदपूर्वविध्यादिलक्षणानामाश्रयभेदेन सङ्करो दर्शितः। तथैव तत्फलानामपि प्रथमचरमभावेन सङ्करो दृश्यते किं तु केषु चित्क्विचित्फलमनन्यल-

ध्यत्वे ऽप्यनुनिष्पादित्वादन्येष्वननुनिष्पादित्वे ऽप्यन्यलक्ष्यत्वादपरेष्वनन्यलक्ष्यत्वेऽप्यननुनिष्पादित्वे ऽप्यनुष्ठानविशेषालाभात् फलत्वेन न व्यपदिश्यते । तत्रानुनिष्पादिसङ्करो यथा । "अथातो ऽग्निष्टोमेनानुयजतो" ति विधितः प्रकृत्यग्निष्टोमे ऽग्निप्राप्तिस्तदनुनिष्पादिनी तस्मिन्नन्यत्राश्रितगुणकामानां प्राप्तिः । यद्यग्नेः सौमिकाङ्कलापसंवलितप्रयोगस्य सोमप्रयोगाद्बहिः सम्पादयितुमशक्यत्वेन तत्प्रयोगमध्यपातित्वावश्यम्भावान्निष्फलस्याग्नेः फलवत्सोमाङ्गत्वमनुष्ठानसादेश्यरूपेण स्थानप्रमाणेन सिध्यति तथा ऽपि तेनानारभ्याधीतस्य प्राकरणिकोत्तरवेद्यवरुद्धप्रकृतिव्यावृत्तस्य विकृत्यङ्गत्वमेव सिध्यति । अतः प्रकृतावप्राप्तस्याग्नेः प्रथमश्लोकव्याख्यानदर्शितरीत्यानेनैव वाक्येन प्राप्तिः । तत्प्राप्त्या च तदाश्रितानां[1] श्येनाकृत्यादि । फलार्थगुणानां[2] प्रकृतिमध्ये ऽनुष्ठानप्राप्तिः । ततो बहिरनुष्ठातुमशक्यत्वात् । चातुर्यणो "द्यावापृथिव्य एककपाल" इति विधित एककपालयागस्यप्राप्तिः । तदनुनिष्पादी प्रसूनबर्हिर्नियमः । प्रसूनं पुष्पितम् । लूनशेषान्मूलात्पुनरुत्पन्नं वा । एककपालविध्यभावे चातुर्यणे प्रसूनमप्रसूनं वा बर्हिरनियतमैन्द्राग्नादियागानुसारेण प्राप्नोति ऐन्द्राग्नादिषु प्रसूननियमाश्रवणात् । एककपालविधिसत्त्वे तु तस्य वैश्वदेविकैककपालप्रकृतिकत्वात् । ततो ऽतिदेशेन प्रसूननियमः प्राप्नोति । यद्यप्येककपालो जघन्यत्वेनैकत्वेन चैन्द्राग्ना-

---

१ तदाश्रितगुणकामानामि॰ २ पु॰ पा॰ ।

२ क॰ २ पु॰ ना॰ ।

द्यपेक्षया दुर्बलस्तथापि प्रसूनबर्हिर्ग्रहणे ऽप्यनियतबर्हिषा- मैन्द्राग्नादीनां विरोधाभावात्कांस्यभोजिन्यायेनैककपा- लानुवर्त्तनमुपपद्यत एव। यत्र शिष्यस्य कांस्यभोजननि- यमो ऽस्ति गुरोर्नास्ति तत्र तयोरेकपात्रभोजने क्वचित्प्र- सक्ते गुणभूतमपि शिष्यमनुसृत्य गुरुणापि हि कांस्यभो- जनमेवाद्रियते। "अतिहायेडोबर्हिः प्रतिसमानयति जुह्वा- मौपभृतमि"ति बर्हिःप्रयाजोपक्रमे जुह्वां प्रयाजार्थौपभृ- ताज्यसमानयनप्राप्तिः तदनुनिष्पादिनी। जौहवाज्य- मादिप्रयाजत्रयार्थमौपभृताज्यमुपरितनप्रयाजद्वितयार्थ- मिति परिसंख्या। यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तद्यदुपभृ- ति प्रयाजानुयाजेभ्यस्तदि"ति विधिभ्यां हि तयोरविशेषेण सर्वप्रयाजार्थत्वं प्राप्तम्। प्रथमप्रयाजोपक्रम एव प्रया- जार्थस्यौपभृताज्यस्य जुह्वां समानयनमपि प्राप्तं तस्य तस्मात्कालादाच्छिद्य बर्हिः प्रयाजोपक्रमकाले विधा- नादाज्यद्वयमपि प्रयाजविशेषविषयतया व्यवतिष्ठ- ते। एवं चात्र प्राप्तपरिसंख्याने ऽपि न त्रैदोष्य- मन्यानुष्पादित्वेन शब्दव्यापाराविषयत्वात्। "ऋत्वि- ग्भ्यो दक्षिणां ददाति अग्नीधे ददाति ब्रह्मणे ददा- ती"त्यादिविध्यधीनऋत्विगानमनार्थदक्षिणादाननिय- मानुनिष्पादिनी ऋत्विजां कर्मसु कर्तृत्वप्राप्तिः। स्व- र्गकामो यजेतेति सामानाधिकरण्यादात्मनेपदेन कर्त्तु- रेव फलावगमाच्च फलार्थिनो यजमानस्यैव साङ्गे ज्यो- तिष्टोमादिकर्मणि साक्षात्कर्तृत्वे प्राप्ते तत्राप्राप्तमृ- त्विजां कर्तृत्वं दक्षिणादाननियमेन प्रार्थ्यते। दक्षि- णादानविधिर्हि ऋत्विगानमनदृष्टदृष्टार्थत्वे सम्भवति-

र्थाकाङ्क्षायाश्च शान्त्या लिङ्गात्प्रयाजानामनियतद्रव्याक-ल्पनस्येव जौहवानामनियतकार्यकल्पनमप्राप्यप्रवृत्ते-स्तेन च कार्यं नियमेन परिसंख्यापि लभ्यते । प्रयाजानु-याजाज्यभागोपांशुयाजपार्वणहोमनारिष्टहोमानां द्रव्या-काङ्क्षाणामुपस्तरणाभिघारणकपालाञ्जनसदनकरणा-लङ्करणानां चाज्यकाङ्क्षायां कार्याकाङ्क्षेषु जौहवाना-दिषु त्रिष्वेव प्रवर्त्तमानानां मध्ये प्रयाजेषु जौहवाज्यं प्राप्नुवत्सु अन्येषामपि केषां चित्तैः समुच्चित्य प्राप्तेरव-श्यं भावात् । ननु एवं सति कार्यांशे यदि संख्यैव स्यात् उच्यते । समुच्चयः कार्यविशेषनियतो न भवति । न हि जौहवाज्ये एतेषां कार्याणां समुच्चितानां प्राप्तिः औ-पभृताज्ये एतेषामिति कार्यविशेषनियते समुच्चये किं चिन्नियामकमस्ति । अतो यान्येव यानि चित्कार्याणि जौहवाज्ये समुच्चित्य प्राप्नुवन्ति तान्येव ततोऽन्येषां केषां चित् कार्याणां तत्र समुच्चित्य प्राप्तौ न प्राप्नुवन्तीति । कस्यापि कार्यस्य प्रयाजाज्ये नियतप्राप्त्यभावात्तत्र प्रया-जानामप्राप्तांशपूरणं तावदवश्य कर्त्तव्यम । तस्मिन्कृते नै-राकाङ्क्ष्येण लैङ्गिककल्पनाप्रतिबन्धाद्रवन्तो पक्षे प्रया-जैः सह समुच्चित्य प्राप्तिमतामन्येषां कार्याणां निवृ-त्तिः नखविदलनादिनिवृत्तिवत्तदनुनिष्पादिनीत्यवहितेन मनसालोचनीयम् । आतिथ्यायां चतुर्गृहीतान्याज्यानि भवन्तीति विध्यर्थीना तत्र प्रकृतिप्राप्तौपभृतचतुर्गृही-तान्तरपरिसंख्यातदनुनिष्पादिनी प्रकृतौ बर्हिः प्रया-जोपक्रमे प्रयाजार्थमौपभृताज्यादर्धं समानेतव्यमित्य-स्यार्थस्य प्राप्तिः । तस्य विधेरभावे हि यदुपभृति प्रया-

जानुयाजेभ्यस्त्वादिति विधिवशादौपभृतानां सर्वमपि प्रयाजानुयाजसाधारणं स्यादिति समं स्याद्श्रुतत्वादिति न्यायेनौपभृते ऽनुयाजद्वयार्थमर्द्धाधिकमवशेषणीयमिति प्रयाजद्वयार्थमर्धान्न्यूनमेव समानेतव्यं प्राप्नुयात्। ननूभृत्यष्टगृहीतमेकहविर्न भवति किं तु चतुर्गृहीतं हविर्द्वयं तच्चतुर्गृहीतं जुहोतीति विधिना चतुर्ग्रहणसस्कृतस्याङ्गत्वावगमादिति निर्णीतं चतुर्थे तथा च यदुपभृतीतिविधिः प्रयाजार्थमेकं चतुर्गृहीतमनुयाजार्थमपरमित्यस्मिन्नर्थे पर्यवस्येदतः समानयनविधिनार्धमेव समानेतव्यमिति प्राप्नुयादिति चेत्। नैवम्। तथा व्यवस्थापकविध्यन्तराभावे यदुपभृतीत्यविशेषविधानेन चतुर्गृहीतद्वयस्यापि प्रयाजानुयाजार्थत्वप्राप्तेरनिवार्यत्वात्। न चैकस्मिन् यागे हविर्द्वयं नान्वेतीति शङ्क्यम्। वचनबलादेकैकस्य चतुर्गृहीतस्य हविषो ऽनेकप्रयाजार्थत्ववदनेकानुयाजार्थत्ववच्चतुर्गृहीतद्वयरूपस्य हविर्द्वयस्यैकैकयागार्थत्वस्याप्युपपत्तेः। पशुयागएकस्मिन् हृदयजिह्वाद्येकादशहविरन्वयदर्शनाच्च। चतुर्गृहीतान्याज्यानि भवन्तीत्यनुयाजरहितायामातिथ्यायां विधेः सत्त्वे तु तेन चतुर्गृहीतान्तरपरिसंख्यावलात्तदुपभृति प्रयाजार्थमेकं चतुर्गृहीतमनुयाजार्थमपरमिति व्यवस्थावगत्यार्धमेव समानेतव्यमिति सिध्यति। ननु चतुर्गृहीतवचनमातिथ्यायां प्रयाजार्थमेव चोदकाच्चतुर्गृहीतद्वयप्राप्तौ तन्नैकमेव चतुर्गृहीतं हविरिति प्रयाजार्थे हविषि वैकृतविशेषवचनतयाप्युपपन्नं नोक्तव्यवस्थां गमयेदिति चेत्। सत्यमुभयथाप्युपपन्नस्य तस्य न ह्यत्रानुयाजा इज्यन्त

इतिवाक्यशेषवशात् व्यवस्था भविष्यति । अनेन हि वाक्यशेषेणोपभृति द्वितीयचतुर्गृहीताभावे ऽनुयाजानामभावो हेतूकृत: । ततश्च तत्रैव हेतौ साध्यभूतायामातिथ्यायामुपभृति द्वितीयचतुर्गृहीतस्य परिसंख्यामुपनयन् विधिस्तस्य केवलानुयाजार्थत्वं प्रथमचतुर्गृहीतस्य केवलं प्रयाजार्थत्वं च व्यवस्थापयति । अतस्तदनुनिष्पादिन्यर्द्धसमानयनप्राप्तिर्भवति । एवं "त्रीणि हवै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप्च त्रत्रावपन्त्यत एवोद्वपन्ती"त्यत्र परिसंख्यानुनिष्पादी नियम: । कथं सति विहृतस्तोमका: क्रतव: एकविंशेनातिरात्रेण प्रजाकामं याजयेदित्यादिभिर्विहिता: तेषु क्रतुषु बहिष्पवमानादिषु सर्वेष्वपि स्तोत्रेषु एकविंशादिस्तोमविहृतिसिद्ध्यर्थं प्राकृतेभ्यो ऽधिकावापे प्राप्ते ऽत्र त्रावपन्तीत्युदाहृतवाक्येन पवमानगायत्र्यादिभ्यो ऽन्यत्रावाप: परिसंख्यायते । तेनावापस्य पवमानातिरिक्तेभ्य: स्तोत्रेभ्यो ऽनिवर्त्तितत्वात्तद्व्यतिरिक्तेष्वाज्यपृष्ठादिस्तोत्रेष्वगत्याभ्यासेनैव संख्यापूरणं कार्यमिति सिध्यति । अनया चावापसामान्यस्य स्तोत्रान्तरेभ्य: परिसंख्यया येषु विहृतस्तोमकेषु क्रतुषु प्रत्यक्षश्रुतिविहितान्यपि कानि चित्सामानि सन्ति तेषामपि स्तोमविहृतये सर्वस्तोत्रेषु सामान्तरावापे कर्त्तव्ये प्रत्यक्षश्रुतिविहितानां साम्नामनियमेन यत्र क्वचित्स्तोत्रे प्राप्ताश्चावाप: पवमानविषयो व्यवतिष्ठते । तथा ऽविहृतस्तोमकेषु क्रतुषु प्रत्यक्षश्रुतिविहितानां साम्नां स्तोमाधिक्यपरिहाराय प्राकृतसामोद्वापेन तत्स्थानेत्वावप्तव्यानामनियमेन यत्र क्वचित्स्तोत्रे प्राप्त: आवा-

पक्षद्विषयो व्यवतिष्ठत इत्येवमत्र परिसंख्यानुनिष्पादी नियमः "हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस" इत्यादिविधिषु परिसंख्यानुनिष्पादिनी परिसंख्या । तथा हि पशुना यजेतेति श्रुतं पशोर्यागसाधनत्वं विशसनादिवाक्यबलादवयवद्वारेणेति तावद् व्यवतिष्ठते । यथा सोमेन यजेतेति श्रुतं सोमस्य यागसाधनत्वमभिषवादिवाक्यबलाद्रसद्वारेणेति व्यवतिष्ठते । ततश्च पश्ववयवानां सर्वेषामविशेषाद्धविष्ट्वेनावदानप्राप्तौ हृदयादिभ्योऽन्येषामवयवानामवदानपरिसंख्यार्थानि हृदयस्याग्रेऽवद्यतीत्यादीनि । तया चावदानपरिसंख्ययावयवान्तराणां हविष्ट्वपरिसंख्यापि लभ्यते । एवं यदुपभृतीति सामान्यविधिना चतुर्गृहीतद्वयस्याप्यविशेषेण प्रयाजानुयाजार्थत्वप्राप्तावातिथ्यायामुपभृति चतुर्गृहीतान्तरपरिसंख्ययार्थवादसमर्पितानुयाजाभावहेतुसमभिव्याहृतया लभ्या प्रथमं चतुर्गृहीतं प्रयाजार्थं द्वितीयमनुयाजार्थमिति व्यवस्थापि परिसंख्यानुनिष्पादिनी परिसंख्यैव । तत्र तदनुनिष्पादिनी समानेतव्यस्यार्थत्वप्राप्तिरप्यस्तीति सैव प्रागुदाहृता । एवमनुनिष्पादिफलस्याप्यनुनिष्पादिफलान्तरमन्यत्राप्यूहनीयम् । इत्थमनुनिष्पादिफलसङ्करो दर्शितः । अन्यलभ्यफलसङ्करो यथा । सांग्रहण्यां राविसन्न्यायलभ्यफलप्राप्तिमूला तत्सन्निधिसमाम्नातानामामनहोमानां तदङ्गत्वप्राप्तिरन्यथा तेषामपि राविसन्न्यायेनैवार्थवादिकफलकल्पनया नैराकाङ्क्ष्येण तदङ्गत्वं न सिद्ध्येत् । "उरु प्रथस्वेति पुरोडाशं प्रथयती"त्यत्रान्यलभ्यप्रथनप्राप्तिमूलस्तस्याध्वर्युकर्तृक-

त्वनियमः। अप्रथितं हि पिष्टं स्वयमेव पुरोडाशाकृतिशालितया न प्रथते। अतः पुरोडाशान्यथानुपपत्तिलभ्यमेव प्रथनं। तत्राध्वर्युकर्तृकत्वनियमः परं न लभ्यः। तस्मादाध्वर्यवसमाख्यालभ्यमानेन प्रथने कर्तृनियमसिद्ध्यर्थो ऽपि प्रथनविधिः। वाग्वा एषा यदैन्द्रवायवाग्रा ग्रहा गृह्यन्ते वाचमेवानुप्रयन्तीत्यत्रान्यलभ्याप्राप्तिपूर्विका परिसंख्या। अत्र ग्रहाणामैन्द्रवायवाग्रता न विधीयते। सा हि विधीयमाना धाराग्रहाणामेव विधीयेत न त्वधाराग्रहयोरुपांश्वन्तर्यामयोरपि। "अपघ्या धारया गृह्णाति" इत्येतत्सन्निधौ श्रवणेन धारागृहाणामेव गृह्णाति नोपादानात्। तेषां च पाठत एव प्राप्ता ऐन्द्रवायवाग्रता। किं त्वत्र पाठप्राप्ताग्रतानुवादेनैन्द्रवायवादयो ग्रहा एव विधीयन्ते। यद्यपि ते ऽथैन्द्रवायवं गृह्णाति मैत्रावरुणं गृह्णातीत्यादिक्रमेण पठितैः प्रातिस्विकविधिभिर्लभ्यास्तथापि तेषामिह पुनर्विधानं परिसंख्यार्थं। कथमेतत्सन्निधौ शुक्राग्रान् गृह्णीत प्रतिष्ठाकामः मन्थ्यग्रानभिचरन्नित्यादिवाक्यैर्ग्रहानाश्रित्य शुक्राग्रतादयो गुणाः कामाय विधीयन्ते। तेषां गुणानां धारगृहवदधारागृहावप्याश्रयत्वेन माभुत इति तत्तत्कामनायां शुक्राद्य उपांश्वन्तर्यामाभ्यामपि प्रागपकृष्याः स्युः। यस्मिन्विधाने सति तु कामाय विधीयमाना गुणा अनेन विधिना प्राकृतानैन्द्रवायवादिग्रहानेवाश्रित्य विधीयेरन्निति तयोराश्रयत्वव्यावृत्त्या शुक्रादयः कामनायामैन्द्रवायवादेव प्रागपकृष्या इति लभ्यते। तदेतत्सर्वं दशमे ऐन्द्रवायवास्याग्रवचनादादितः प्रतिकर्षः स्यादिति पे-

टिकायां निरूपितम्। ननु नैतदुदाहरणं युक्तं। ग्रहाणां क्रत्वर्थत्वस्यान्यतः प्राप्त्यसम्भवात्। न चैन्द्रवायवमैत्राव-रुणादिग्रहविधीनां ज्योतिष्टोमप्रकरणाम्नातत्वात्प्रकर-णेनैव तेषां तदर्थत्वप्राप्तिः "ऐन्द्रवायवाग्रान् गृह्णीयाद्यः कामयेत यथा पूर्वं प्रजाः कल्पेरन्नि"तिवाक्येन प्रकरणं बाधित्वा तेषां पुरुषार्थत्वस्यैव प्रापणात्। न च शुक्रा-ग्रादिवाक्येष्विवाग्रताया एव फले विधानमिति शङ्क्यम्। शुक्राग्रतादीनां पाठतो ऽप्राप्तत्वादनुवादासम्भवेन वि-धेयत्वे ऽप्यत्र पाठप्राप्तैन्द्रवायवाग्रतानुवादेन धात्वर्थभू-तानां ग्रहाणामेव फले विधानात् स्तुत्यर्थविधानसम्भवे वाक्यार्थविधानाङ्गीकारस्यायुक्तत्वात्। कामसंयोगे तु व-चनादावृत्तिः प्रतिकर्षः स्यादिति दाशमिकाधिकरणे तथैव निर्णीतत्वाच्च। तथा चेतद्विध्यभावे प्रातिस्विक-विधिभिरुत्पन्नानामैन्द्रवायवादिग्रहाणां प्राकरणिकं क्र-त्वर्थत्वं बाधित्वा कामसंयुक्तं वाक्यं पुरुषार्थत्वमेव प्राप-येदित्यप्राप्तक्रत्वर्थत्वमापणार्थो ऽयं वाग्वा एषेत्यादि-विधिस्तथा च वाक्यद्वयबलादैन्द्रवायवादीनां खादिरा-दिवदुभयार्थता भवति। एवं चानेनविधिना ग्रहाणां बाधकबाधनेन क्रत्वर्थत्वे प्राप्यमाणे कामसंयुक्तवच-नोपक्रमे समाम्नानबलात्तदाश्रयान्तरपरिसंख्याप्यनुनि-ष्पद्यतद्भत्यनुनिष्पादिपक्षर एवैतदुदाहरणं युक्तं न त्वयलभ्यमङ्कुरे। तत्रापि वा नोदाहरणम्। धा-रायहाधिकारादेवाश्रयान्तरपरिसंख्यालाभादिति चे-त्। एवं तर्हि माभूत्तद्विशेदाहरणम्। कपालेषु श्रपयतीत्येतदुदाहरिष्यामः। अत्र न तावत्कपालवि-

धिर्यदाग्नेयो ऽष्टाकपाल इत्याद्युत्पत्तिवाक्यत एव तत्प्राप्तेः अष्टसु कपालेषु संस्कृतो ह्यष्टाकपालशब्दार्थः । उक्ततद्धितार्थविवक्षया कपालशब्दस्याष्टशब्देन तद्धितार्थोत्तरपदसमाहारे चेति समासे कृते ऽष्टाकपालप्रातिपदिकात्संस्कृतमित्यर्थे विहितस्याणुप्रत्ययस्य द्विगोर्लुगनपत्यइति लुक्स्मरणात् । नापि श्रपणविधिः । अपश्यन् पुरोडाशं कूर्मभूतं सर्पन्तमित्यादिवाक्यशेषेण कपालेषु संस्कार्यस्य पुरोडाशत्वावगत्या ऽपूपविशेषरूपस्य पुरोडाशस्य श्रपणं विना निष्पत्त्यसम्भवेन स्वरूपेण श्रपणस्यार्थसिद्धत्वात् । नापि श्रपणस्य क्रत्वङ्गप्राप्त्यर्थो विधिः प्रयोजनाभावात् । न च पुरोडाशविकारेषु चरुकरम्भादिषु श्रपणस्यातिदेशेन प्राप्तिः प्रयोजनम् । तेषामपि श्रपणं विना निष्पत्त्यसंभवेनार्थतस्तल्लाभसंभवात् । ननु श्रपणस्य प्रयोगमध्ये ऽनुष्ठानलाभार्थो विधिः स्यात् । विधाने हि सति प्रकरणगृहीतत्वेनाङ्गस्य सतस्तस्य प्रयोगमध्ये ऽनुष्ठानं लभ्यते । अन्यथा ह्याज्यवत्पुरोडाशोऽपि बहिःश्रपणसिद्ध एव गृह्येत । न च कपालेषु संस्कारविधानादन्तः श्रपणसिद्धिः बहिःश्रपणसिद्धस्यैव पुरोडाशस्याजस्य गार्हपत्याहवनीययोरिव कपालेष्वधिश्रपणस्यादृष्टार्थत्वोपपत्तेः । न चाङ्गाराध्यूहनादिविधिभिस्तत्सिद्धिः तेषामप्यदृष्टार्थत्वोपपत्तेः । तथापि व्रीहीन्निर्वपति व्रीहीन्प्रोक्षति व्रीहीनवहन्तीति व्रीहीणां निर्वापादिसंस्कारविधानात्तेषां प्रयोगमध्ये पुरोडाशप्रकृतितयोपादानं लभ्यत इति तत एव तन्मध्ये श्रपणस्याप्यनुष्ठानं लभ्यत इति चेत् । न । तेषां व्रीहिसाधनकनि-

वीपादार्थकर्मविधायकत्वेनाप्युपपन्नतया नान्यथासिद्ध-प्रकृत्युपादानालम्भकविध्यभाव पुरोडाशस्याप्याज्यदार्श-पूर्णमासिकजाघन्यादिवत्स्वरसतो यथासिद्धस्यैव हवि-ष्ट्वेन प्राप्तत्वप्राप्तेः। अत एव पशुसोमाधिकरणे "ऐन्द्र-वायवं गृह्णाती"त्यादयो यागविषयस्तेषु गृह्णातिकर्मभूतं हविरपव्याधारया गृह्णातीति सन्निहितं वाक्ये स्रुतं धारासमर्थं द्रवद्रव्यं तच्च सोमं क्रीणाति सोममभिषु-णोति सोमं प्लावयतीत्यादिसोमसंस्कारवाक्यपर्यालोच-नया सोमप्रकृतिकमवसीयते। "अतः सोमेन यजेते"त्य-त्र सोमशब्दस्तत्प्रख्यन्यायेन तेषां यागानां नामधेयम्। ·यजेतेति तत्समुदायानुवाद इति पूर्वपक्षे अपव्याधारया गृह्णातीत्यनेनोदकादिसाधारणस्य यथासिद्धद्रवद्रव्य-मात्रस्य हविष्ट्वप्राप्तेरनन्यथासिद्धप्रकृत्युपादानलम्भकवि-ध्यभावेन क्रयादिवाक्यान्यर्थकर्मविधायकान्येव स्युर्न तु संस्कारकर्मविधायकतया हविषः सोमरसत्वापादकानि। अतस्तत्प्रख्यन्यायो ऽत्र नावतरतीति दूषणसङ्गतम्। तथा-पि व्रीहिभिर्यजेतेतिविधिना प्रकृत्युपादानं लभ्यतइति तत एव प्रयोगान्तःप्रपणं सिद्धेदिति चेत् न। तस्य या-गद्रव्यविधायकतया पुरोडाशप्रकृतिद्रव्यविधायित्वाभा-वात्। तस्मात्कपालेषु श्रपयतीतिविधिः श्रपणस्यान्तःप्र-योगकर्त्तव्यतासिध्यर्थः स्यादिति चेन्नैवम्। यागोद्देशेन द्रव्यविधायकस्यापि व्रीहिभिर्यजेतेतिवाक्यस्य पुरोडाशा-वरुद्धे यागे व्रीहीणां साक्षात्करणत्वासम्भवेन तत्प्रकृति-त्वविषयत्वपर्यवसायितया निर्वापप्रोक्षणादिविधीनामपि तद्विषयत्वलाभेन तत एव श्रपणस्य प्रयोगमध्यकर्त्तव्य-

तासिद्धेः । नन्वेवं सति तस्य श्रपणस्य कपालाधिकरणसिध्यर्थो विधिः स्यात् । न स्यात् । उक्तरीत्या श्रपणस्य प्रयोगमध्यकर्त्तव्यतासिद्धावुत्पत्तिवाक्यावगतस्य कपालेषु संस्कारस्य श्रपणरूपतासिद्धेः । दृष्टासंभवे हि तस्यादृष्टार्थाधिश्रपणमात्ररूपता प्राप्नुयात् । ननु तथापि श्रपणस्य समाख्यावललभ्याध्वर्युकर्तृकत्वनियमार्थस्तद्विधिः स्यादिति चेत् न । अविदहन्तःश्रपयतेतिप्रैषबलादध्वर्योरिष्टिकहविःश्रपणेषु प्रयोजककर्तृत्वेन प्रैषेषु च पराधिकारादितिन्यायेन प्रेषितुरध्वर्योरन्यस्यैव पुरोडाशश्रपणे ऽपि साक्षात्कर्तृत्वात् । प्रयोजककर्तृत्वस्य च मन्त्रवर्णादेव लाभात् । तस्मादन्यलभ्यश्रपणविधानेन प्रकृत्युपादानमात्रिध्याज्ञिप्तोपादानापेक्षितप्रकृतिद्रव्यनियममात्रपरत्वं व्रीहिशास्त्रस्यापाद्य तद्द्वारा चित्रेष्टिगततण्डुलद्रव्यकयागात्प्रकृत्युपादाने व्रीहिनियमव्यावर्त्तनार्थो ऽयं विधिः । असति ह्यस्मिन्विधौ व्रीहिशास्त्रस्यैव जात्यवस्थाविशेषविशिष्टप्रकृतिद्रव्योपादानपर्यन्तमिति तण्डुलयागादर्थलोपेन श्रपणनिवृत्तावपि व्रीहिशास्त्रस्य श्रपणमुखप्रवृत्तिकत्वाभावेन चोदकादङ्गान्तरैः सह व्रीहिरूपप्रकृतिद्रव्योपादानमपि प्राप्नुयात् । सति त्वस्मिन्विधौ विहितस्य श्रपणस्य प्रयोगमध्ये ऽनुष्ठेयतया तत्र तत्प्रकृत्युपादाने तत एवार्थतः सिद्धेः । व्रीहिशास्त्रं प्रकृतिद्रव्ये जात्यवस्थाविशेषनियममात्रार्थं भवति । प्रयोगमध्ये श्रपणार्थं प्रकृतिद्रव्याण्युपादद्वीतेति यत्तद्व्रीहिजातीयानि सतुषावस्थानीति । तथा च व्रीहिशास्त्रस्य प्रकृत्युपादानमात्रयं श्रपणविध्यपेक्षत्वे सत्येवं व्यवस्था सिध्यति ।

वैकृते यत्र हविषि अपणमपेक्षितं तत्र तस्य प्रयोगमध्ये ऽनुष्ठानं यत्र च तत्तत्र प्रकृत्युपादानं यत्र प्रकृत्युपादानं तत्र व्रीहिनियमः । एवं च सति तण्डुलयागादर्थलोपेन अपणनिवृत्तौ तन्मूलकं व्रीहिनियमपर्यन्तं निवर्त्ततएव तदाहुः ।

> तण्डुलेभ्यो ऽर्थलोपेन अपणं विनिवर्त्तते ।
> अपणस्य निवृत्तस्य स्वयं कार्त्तकता कथम् ॥
> तदधीनमुपादानं प्रकृतेः स्यात्कथंतराम् ।
> तद्वशाद्व्रीहिनियमस्तदभावे कथंतमामिति ॥

नन्वस्त्वेवं कपालेषु अपयतीतिविधिरेवोदाहरणम् । अत्र यदुक्तं तदाक्षिप्तप्रकृत्युपादानापेक्षितव्रीहिनियमार्थं व्रीहिशास्त्रमिति । तदयुक्तम् । व्रीहिनियमस्य निर्वापादिसंस्कारविधिभिरेव लाभसंभवात् । प्रकृत्युपादानलक्षकविध्यभावे हि प्रकृतिद्रव्यानपेक्षणेनानपेक्षितसंस्कारायोगात् निर्वापादीन्यर्थकर्माणि स्युरिति ततः प्रकृतिद्रव्यनियमो न सिध्यति । कपालेषु अपयतीति विधिनाक्षिप्ते प्रकृत्युपादाने सत्युपादेयप्रकृतिद्रव्यविशेषाकाङ्क्षायां निर्वापादिसंस्कार्यत्वेन श्रुतानां व्रीहीणां च क्वचिद्विनियोगाकाङ्क्षायां कथं व्रीहीणामेवापेक्षितप्रकृतिद्रव्यत्वेनान्वयात्तन्नियमो न सिद्ध्येत् । संस्कार्यद्रव्यापेक्षस्य हि कस्य चिदभावे वरं सक्तून् जुहोतीतिवत् द्वितीयादावगतगुणकर्मत्वपरित्यागेनार्थकर्मत्वाङ्गीकारः प्राप्नुयात् । तत्सत्त्वे तु नार्थकर्मत्वप्राप्तिः । अत एवोपनयनसंस्कृतस्य माणवकस्य विनियोगाका-

ङ्क्षायासुपनयनप्रक्रमाधीतस्वाध्ययनस्य कर्त्रपेक्षासत्त्वा-त्तत्कर्तृत्वेनान्वय इत्युपनयनस्य नार्थकर्मत्वप्राप्तिः । उक्तं ह्यपशूद्राधिकरणे । स्वाध्यायविधिरनिर्दिष्टकर्तृक-त्वेन कर्त्तारमपेक्षमाणः प्रकृतोपनयनसंस्कृतान् किमर्थं वयमाचार्यनिकटं नीता इत्येवं प्रयोजनमपेक्षमाणान् ब्राह्मणादीनेव कर्तृत्वेन स्वीकुर्वन् तेषामेवाध्ययनं वि-धत्ते न शूद्रस्येति । अपि च अवघातविध्याक्षेपतः प्रकृत्यु-पादाने प्रसक्ते सत्यनियतप्रकृतिद्रव्योपादानप्राप्तौ "तस्मि-न्सीदामृते प्रतितिष्ठ व्रीहीणां मेधः सुमनस्यमान" इति पुरोडाशप्रतिष्ठापनमन्त्रवर्णादेव छागो वा मन्त्रवर्णा-दिति न्यायेन व्रीहिजातीयं प्रकृतिद्रव्यमित्ययमर्थो ल-भ्यते । किं तु लाघवासम्य पिष्टावस्थायामुपादानं प्राप्नो-तीति सक्तुपाक्यौपादानं परं सतो न प्राप्नुयात्तदपि प्रागुक्तरीत्या निर्वापादिसंस्कारकैमर्थ्याकाङ्क्षया ल-भ्यत इति न का चिदनुपपत्तिः । ननु यवैर्यजेतेत्याहत्य विहितैर्यवैः प्रकृतिद्रव्याकाङ्क्षाशान्तेर्मन्त्रप्रकाश्यत्वसं-स्कार्यत्वान्यथानुपपत्त्या व्रीहीणां प्रकृतिद्रव्यत्वं न सिध्ये-दतस्तत्सिध्यर्थं व्रीहिशास्त्रमपेक्षितमिति चेत् । नैवम् । न खलु यवानामपि साक्षात्प्रकृतित्वं श्रुतं किं तु श्रुत-पुरोडाशायकृद्ययागकरणत्वान्यथानुपपत्त्या कल्पनीयम् । व्रीहीणां तु मन्त्रप्रकाश्यत्वसंस्कार्यत्वान्यथानुपपत्त्येति को विशेषस्तस्मादनर्थकं व्रीहिशास्त्रमिति चेत् । उच्यते । व्रीहिशास्त्राभावे व्रीहिगतापूर्वीयत्वरूपाप्रतिपत्तेः संस्का-रशास्त्रगतेषु व्रीहिपदेष्वपूर्वीयत्वलक्षणा न लभ्येतेति सं-स्काराणां यवसाधारण्यं न स्यात् । सति व्रीहिशास्त्रे

तेन व्रीहीणां यागापूर्वीयत्वावगतिस्तल्लक्षणायाः संभवात्संस्काराणां यवसाधारण्यं सिध्यति । एवं च यद्यपि व्रीहिशास्त्रं व्रीहिनियमार्थं न स्यात् तस्यान्यलभ्यत्वात्तथाप्यन्यलभ्यनियमद्वारा यवेषु प्रोक्षणादिप्राप्त्यर्थं सवहननादिनियमार्थं च स्यादित्यनन्तरप्रदर्शनीययोरन्यलभ्यनियममूलकप्राप्त्यन्यलभ्यनियममूलकनियमयोरिदमुदाहरणं भविष्यतीति । ननु नैतदपि युक्तम् । व्रीहिशास्त्रप्रवृत्त्यधीनव्रीहिपदगतापूर्वीयत्वलक्षणाभावेऽपि यवसाधारण्यलाभसम्भवात् । द्वितीयाश्रुत्या प्रोक्षणावहननादिसाध्यत्वेन श्रुतानां व्रीहीणां प्राक्सिद्धेन स्वरूपेण तत्साध्यत्वासंभवात्तत्क्रियाजन्यदृष्टादृष्टसंस्कारविशिष्टतया तत्साध्यत्वसंभवेऽपि तावता फलपर्यवसानाभावादानर्थक्यापत्तेः । फलपर्यवसायिनो रूपान्तरस्य च प्रोक्षणादिसाध्यतार्हस्य व्रीहिष्वनुपस्थितेः प्रोक्षणादिभिरेव स्वतन्त्रफलकल्पनागौरवापत्तेः श्रुतविनियोगभङ्गापत्तेश्च । प्रोक्षणादिसाध्यत्वनिर्वाहार्थमेव संस्कृतानां व्रीहीणां अपूर्वविध्याक्षिप्तप्रकृत्युपादानापेक्षितप्रकृतिद्रव्यतयान्वयः कल्प्यते । एतावतापि तन्निर्वाहः कथं स्यादिति कल्प्यमानपुरोडाशप्रकृतिभावलभ्यापूर्वसाधनत्वाकारेण व्रीहीणां प्रोक्षणादिसाध्यत्वमित्येतावत्पर्यन्तं न कल्पयेत । तथा कल्पने च प्रोक्षणादीनां यवसाधारण्यं तत एव लभ्यते । इयांस्तु विशेषो व्रीहिशास्त्रप्रवृत्तौ लक्षितापूर्वसाधनत्वेन यवसाधारण्यं तदप्रवृत्तौ कल्पितापूर्वसाधनत्वेन उभयथापि यवसाधारण्यं लभ्यत एवेति चेत् । न लभ्यत इति ब्रूमः । व्रीहि-

शास्त्रसद्भावे संस्कारवाक्यश्रुततत्क्रियासाधारत्वनिर्वाहाय व्रीहिपदानां व्रीहिशास्त्रसमर्पितापूर्वसाधनत्वलक्षणया प्रवृत्तावपूर्वसाधनत्वस्यावहनननानपेक्षस्रुवादिसाधारण्येन स्रुवादिव्यावर्त्तनाय तस्मिन् विशेषणीये व्रीहिगतत्वेन तद्विशेषणे व्रीह्यंशे शक्तिरपूर्वसाधनत्वांशे लक्षणेति वृत्तिद्वयविरोधप्रसङ्गात्तण्डुलप्रणालिकात्वेन तद्विशेषणीयम् । तण्डुलप्रणाड्यापूर्वसाधनत्वं च यवानुगतमिति तद्रूपोद्देशेन विधीयमानानां संस्काराणां यवसाधारण्यं लभ्यते । व्रीहिशास्त्राभावे तु व्रीहीणामपूर्वसाधनत्वस्य प्रागनुपस्थितत्वेन तत्तत्क्रियासाधारत्वानुपयोगिनापि व्रीहित्वेनैवोपरक्तेषु व्रीहिषु भाविविनियोगमूलकतत्तत्क्रियासाधारत्वोपयोगित्वसम्भावनया संस्कारवाक्येषु प्रवृत्तेषु तन्निर्वाहार्थं पुरोडाशप्रकृतिद्रव्यत्वकल्पनया यद्व्रीहीणामपूर्वसाधनत्वमवगम्यते तत्स्रुवादिष्वतिप्रसङ्गवारणायोपस्थितेन व्रीहिगतत्वेनैव विशेषयितुं शक्यम् । शब्दसमर्पणीयद्रव कल्पनीये तस्मिन् वृत्तिद्वयविरोधाभावात् । तद्विशेषितं च स्रुवादिभ्य इव यवेभ्यो ऽपि व्यावृत्तमिति संस्काराणां यवसाधारण्यं न लभ्यते । तथा वैकृतेषु नीवारादिषु तेषामतिदेशेन प्राप्तिरपि न लभ्यते व्रीहिरूपद्वाराभावादतो व्रीहिशास्त्रमन्यलभ्यनियमद्वारा यवेषु प्रोक्षणादिप्राप्त्यर्थमवहननादिनियमार्थं च पर्यवस्यतीति समनन्तरप्रदर्शनीययोर्द्वयोरपि तदुदाहरणमितियुक्तमेव । अपि चास्ति व्रीहिशास्त्रस्यान्यदपि प्रयोजनम् । अष्टाशफपरिमाणाय शेषकार्यभक्ष्यापर्याप्तानां पुरोडाशजातिमात्रसम्पादनस-

मर्थानामल्पानां व्रीहीणां लाभे तत्पर्याप्तानपि व्रीहिप्रतिनिधीन्नीवारानपहाय मुख्यानां व्रीहीणामुपादानं तदभावे हि पुरोडाशश्रपणव्रीहिसंस्कारविधिसामर्थ्यात्पुरोडाशप्रकृतित्वेन कल्प्यमाना व्रीहयः पुरोडाशाङ्गत्वमेव प्रतिपद्येरन्न यागाङ्गत्वम् ततश्चाक्षुण्णफलपरिमाणस्विष्टकृदिडाप्राशित्रचतुर्धाकरणभक्षणादीनां व्रीहीणां च पुरोडाशाङ्गत्वाविशेषेण तावत्पर्याप्तव्रीहिलाभे बहूनां तेषामङ्गानां बाधाद्वरमेकस्य व्रीहिरूपाङ्गस्य बाध इति नीवारोपादानं प्रसज्येत। व्रीहिशास्त्रसद्भावे तु तेन व्रीहीणां यागाङ्गत्वे बोधिते पुरोडाशावरुद्धे यागे हविष्ट्वेन साक्षाद्यागसाधनत्वमलभमानानां तेषामरुणाधिकरणन्यायेन अपूर्वविध्याक्षिप्तप्रकृत्युपादानापेक्षितप्रकृतिद्रव्यतया पार्ष्णिकान्वयकल्पने ऽपि यागाङ्गत्वमेवावतिष्ठते न तु तदपहाय पुरोडाशाङ्गत्वं श्रुतयागाङ्गत्वनिर्वाहायैव पार्ष्णिकान्वयकल्पनात्। अत एवारुण्यस्य पार्ष्णिकान्वयकल्पने ऽपि क्रयाङ्गत्वं न तु द्रव्यमिति प्रतिपादितमरुणाधिकरणे *ततश्च बहुभ्यो यागाङ्गभूतेभ्योऽक्षुण्णफलपरिमाणोपकार्येभ्यो व्रीहीणां प्रधानाङ्गतयाऽङ्गगुणविरोधाधिकरणन्यायेन भाष्यकारोक्तगुणमुख्यव्यतिक्रमाधिकरणन्यायेन च प्राबल्यात्तद्बाधनमनुचितमित्यल्पानामपि व्रीहीणामुपादानं प्रतिनिधिपादान्त्याधिकरणोक्तं लभ्यते एवं च व्रीहिशास्त्रसमुत्पत्तिशिष्टपुरोडाशेन निराकाङ्क्षयागे प्राप्तिरहितानां व्रीहीणां प्राप्तिं कुर्वत् तन्निर्वाहायान्यलभ्यपुरोडाशप्रकृतिद्रव्यनि-

* अत एव बहुभ्योऽयागाङ्गभूतेभ्यो इ० १ पृ० पा०।

यमावतरणे ऽपि यागाङ्गत्वापरित्यागात् । श्रौषीणां पुरोडाशपरिमाणशेषकार्यापर्याप्तावयुपादानं प्रापयतीति प्राप्यनुनिष्पादिन्यां प्राप्तावप्येतदुदाहरणं भविष्यतीत्यलं प्रसक्तानुप्रसक्त्या । प्रकृतमनुसरामः । उपांशु पौर्णमास्यां यजन्नित्यत्रान्तरालविधिसामर्थ्यलभ्यपौर्णमासीकालनियमपूर्विकामावास्यापरिसंख्या । तत्र हि पौर्णमासीकालविधिनोपांशुयाजस्य फलसंबन्धप्राप्तिवदमावास्यापरिसंख्यापि लभ्यतइति समर्थितं चतुर्थश्लोकव्याख्याने हे आहवनीय इत्यत्रान्यालभ्यपरिसंख्यामूला पराग्निकहोमानां फलसंबन्धप्राप्तिः । इयमपि तत्रैव समर्थिता । एकादशपशोरवदानानि तानि हिर्हिरवद्यतीत्यत्रान्यलभ्यपरिसंख्यामूलो नियमः । कथं दर्शपूर्णमासयोर्हिर्हविषो ऽवद्यतीति तावत्परिसंख्या । तदभावे हि चतुरवत्तं जुहोतीतिविधिबलाद्धोतव्याद्धविष एव चतुरवदानं प्राप्नुयात्तत्सद्भावे तु हविषो द्विरेवावदानमित्युपस्तरणाभिघारणाद्यवदानविधिप्राप्तप्रचयशिष्टसंख्यानुवादश्चतुःशब्दः सिद्ध्यति । इदं च द्यवदानं पाशुकेषु हृदयादिष्वपि चोदकतः प्राप्नोत्येव तथापि तानि द्विर्द्विरवद्यतीति श्रवणमनियमप्राप्तौ नियमार्थं पशुप्रकरणे हि यद्यपि चतुरवत्ती यजमानः पञ्चावत्तैव वपा कार्येत्यपि श्रूयते तत्र पाशुकावदानमात्रमुद्देश्यं न तु वपावदानमेव हविरार्त्यधिकरणन्यायेन उद्देश्ये वपाविशेषणस्याविवक्षितत्वात् । ततश्च सर्वेष्वपि पाशुकावदानेषु हविरवदानवित्वेनोपस्तरणद्वयाभिघारणद्वया वपायामिव हिरण्यशकलेन वा पञ्चसंख्या सम्पादनीयेति प्राकृतस्य द्य-

वदानस्यानियमः प्राप्तस्तत्र नियमः क्रियते । हवींषि यथाप्रकृति द्विर्वावदेयानि पञ्चसंख्या तु प्रकारान्तरेण सम्पादनीयेति । "अग्निहोत्रं जुहुयात्स्वर्गकाम" इत्यत्रान्यन्यपरिसंख्यापूर्विका परिसंख्या । इदं हि नाग्निहोत्रस्य स्वर्गार्थत्वप्राप्त्यर्थमेतदभावेऽपि तत्त्वार्थमनादेशादिति विश्वजिदधिकरणपूर्वपक्षन्यायेनानिर्दिष्टफलस्याग्निहोत्रस्य विनिगमनाविरहेण सर्वफलार्थत्वं प्राप्नुवतः स्वर्गार्थत्वस्यापि प्राप्तिसम्भवात् । नापि स्वर्गेतरफलपरिसंख्यार्थः तस्या अपि सः स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वादिति तत्सिद्धान्तन्यायलभ्यत्वात् । अतोऽग्निहोत्रस्यान्यलभ्यस्वर्गसंबन्धबोधनद्वारा तत्संनिधिसमाम्नातानामनिर्दिष्टफलानां कर्मणां फलवत्फलन्यायेन तदङ्गत्वप्राप्त्यर्थमेतदभावे हि अग्निहोत्रस्य विश्वजिन्न्यायेन फलकल्पने विनिगमनाविरहात्तेषामपि तेनैव न्यायेन फलकल्पना स्यादिति तेषामग्निहोत्राङ्गत्वं न प्राप्नुयात् । एवं चानेन विधिनाग्निहोत्रस्यान्यलभ्यस्वर्गार्थत्वप्राप्तिनान्तरीयकतया विश्वजिदधिकरणपूर्वपक्षन्यायप्रसक्तस्य फलान्तरस्य परिसंख्या तत्सिद्धान्तन्यायलभ्या प्राप्यते अग्निहोत्रसन्निधिसमाम्नातकर्मणामन्यलभ्यतदङ्गत्वप्राप्तिनान्तरीयकतया तेषामपि स्वर्गफलार्थत्वस्य तत्सिद्धान्तन्यायप्रसक्तस्य परिसंख्यानन्यलभ्या च प्राप्यत इत्येवमत्रान्यलभ्यापरिसंख्यापूर्विकानन्यलभ्या परिसंख्या यद्यग्निहोत्रस्य यावज्जीवशास्त्रेण प्रत्यवायपरिहारार्थत्वावगत्या तस्य तत्सन्निधिसमाम्नातानां कर्मणां च फलाकाङ्क्षानिवृत्ति-

जिदधिकरणपूर्वपक्षसिद्धान्तन्याययोरुभयोरपि तत्र तेषु चानवतारोदिदं वाक्यमग्निहोत्रस्य स्वर्गसंबन्धप्राप्त्यर्थमेव न त्वन्येषां तदङ्गत्वप्राप्त्यर्थम्। नापि तदनुनिष्पादिन्यचानन्यलभ्या तेषां स्वर्गार्थत्वपरिसंख्यास्तीति मतम्। तदा केवलकाम्यकर्मणोर्यत्स्वर्गसंबन्धविधानं तद्विश्वजिन्न्यायलभ्यस्वर्गसंबन्धमतिक्रम्य तत्संनिधिपठितकर्मणां तदङ्गत्वप्राप्तिपर्यवसायीति तत्रान्यलभ्यानन्यलभ्यपरिसंख्याफलसंकर उदाहर्त्तव्यः। एवमन्यलभ्यफलसंकरो दर्शितः। अप्रवृत्तिविशेषकरफलसंकरोऽपि दिङ्मात्रेणोदाह्रियते। द्वादशाहिकयोस्त्र्यनीकान्तर्गतयोर्गवामयनिकयोस्त्र्यनीकास्थानगतयोश्चादिमाग्रताविध्योरप्रवृत्तिविशेषकरप्राप्तिपूर्विका प्राप्तिः। तैर्विधिभिः परमापूर्वसाधनत्वावच्छेदेनावान्तरापूर्वसाधनत्वावच्छेदेन च अग्रतानां प्राप्तिरनन्यलभ्या क्रियते न तया प्रवृत्तिविशेषः कश्चित् द्वादशाहगवामयनयोरनन्यलभ्यः प्राप्यते तैः प्रापणीयस्य द्वादशाहिकदशरात्रान्तर्गतयोराद्ययोरह्नोरैन्द्रवायवशुक्राग्रत्वानुष्ठानस्य चोदकात् गवामयनिकयोराद्ययोरह्नोरैन्द्रवायवाग्रत्वानुष्ठानस्य त्र्यनीकाविधानाच्च लाभसम्भवात्। किं तु तया तया प्राप्त्या तत्तद्विकारेषु प्रवृत्तिविशेषपर्यवसायिनी प्राप्तिः क्रियते। एतच्च प्रथमश्लोकव्याख्याने स्पष्टमुक्तम्। साम्ना स्तुवीतेत्यत्राप्रवृत्तिविशेषकरप्राप्तिपूर्वको नियमः कथम् ऋगक्षरारूढगीतिक्रियारूपस्य साम्नः केवलम् ऋगक्षराभिव्यक्त्यर्थत्वमेव प्राप्तं न तु प्रकृतसाध्यगुणिनिष्ठगुणाभिधानात्मकस्तुत्यर्थत्वमपि। तदनेनैव विधिना प्रा-

प्यते । तत्प्रापणेन च तत्र कश्चिदनुष्ठाने विशेषो लभ्यते गीतिक्रियया स्तुतेः साक्षान्निर्वर्त्तयितुमशक्यत्वादतः क्रमप्रकरणाभ्यां स्तोत्राङ्गत्वेनावगतानामृचामभिव्यक्तिं कुर्वत्साम तद्वारा स्तुतिं निर्वर्त्तयितुं शक्तमिति ऋतस्तुत्यर्थत्वनिर्वाहकानुष्ठानविशेषलाभाय पार्ष्णिकान्वयन्यायेन स्तुत्यर्थासु ऋक्षु अवतरति ऋगभिव्यक्त्यर्थत्वं तु साम्नः प्रत्यक्षावगतमिति न तत्राप्राप्तप्रापणं विधिना कार्यमपि तु ऋचामभिव्यक्तौ सामवच्चातुःस्वर्याद्युपायान्तराण्यपि सन्तीति पक्षे ऽप्राप्तस्य साम्नो नियमः कार्यः अतो ऽत्रापहत्तिविशेषकरस्तुत्यर्थत्वप्राप्तिपूर्वकः स्तुत्यर्थऋगक्षराभिव्यक्त्युपायत्वेन साम नियमः । यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयादित्यत्राप्रवृत्तिविशेषकरप्राप्तिपूर्विका परिसंख्या दृष्टं हि न तावद्रथन्तरसाम्नि ज्योतिष्टोमे ऐन्द्रवायवाग्रत्वस्य माप्त्यर्थं पाठक्रमादेव तत्र तत्प्राप्तेः सिद्धत्वात् नापि बृहत्साम्नि ज्योतिष्टोमे तन्माभूदित्येवमर्थं यदि बृहत्सामा शुक्राग्रानिति बृहत्सामत्वपक्षे शुक्राग्रत्वविधानादेव ततो व्यावृत्तिसिद्धेः । किं तु नैमित्तिकत्वार्थं तस्येद पुनर्विधानम् । पाठादैन्द्रवायवाग्रत्वमनैमित्तिकं प्राप्नोति तदेव रथन्तरसामत्वनिमित्तकं क्रियते एव प्रकृतौ पाठप्राप्तस्यैन्द्रवायवाग्रत्वस्यानेन विधिना नैमित्तिकीकरणादेव द्वादशाहे व्यनीकायामाद्यस्याह्नस्तोदकप्राप्यमनैमित्तिकमैन्द्रवायवाग्रत्वं नास्तीति तत्र तद्विधानं विकृतयपेक्षितं विध्यन्तरेण कृतं तेन च नैमित्तिकीकरणेन ज्योतिष्टोमेन कश्चिदनुष्ठाने विशेषो लभ्यते किं तु तस्मिन्पाठप्राप्तस्यैन्द्रवाय-

वायत्वस्याविशेषेण सर्वासु विकृतिषु चोदकाप्राप्तौ द्व्यन्तरान्यसामभ्यस्तदुभयसामभ्यश्च विकृतिभ्यो निमित्ताद्विहितत्वेन तद्याहृत्तिर्लभ्यत इत्येवमप्रवृत्तिविशेषकरनैमित्तिकत्वप्राप्तिपूर्वकैन्द्रवायवायत्वस्य निमित्तरहितविकृतिभ्यः परिसंख्या । अप्रवृत्तिविशेषकरनियमपूर्विकाः प्राप्तिनियमपरिसंख्याः यथा । यस्य ऋग्वेदयजुर्वेदयोः श्रूयमाणस्य सोमविकारस्यान्यतरत्राङ्गभूयस्त्वाभावेन भूयस्त्वेनोभयश्रुतौ व्यक्तविनिगमनाविरहादुभयत्रापि विधिः स्वीकर्त्तव्यस्तत्र "उच्चैरृचा क्रियते" "उपांशु यजुषे"ति विहितयोर्वेदस्वरयोर्विकल्पे प्राप्ते तस्मिन्प्रकृतितः प्राप्नुवन् यत्किञ्चित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्तीति यज्ञभागस्वरविधिर्नियमविधिरापद्यते । स च कर्मणि साक्षात्स्वरस्यानुष्ठातुमशक्यत्वात् पार्ष्णिकान्वयेनोपांशुत्वस्य कर्माङ्गत्वं निर्वोढुं तदङ्गमात्रेष्ववतरतीति । तेन ये केवलमृग्वेदे सामवेदे वा विहितास्तन्मन्त्रास्तेषूच्चैस्त्वस्यैव प्राप्तत्वेनाप्राप्तस्योपांशुत्वस्य प्राप्तिर्भवति । ये तु मन्त्रा यजुर्वेदेऽपि विहितास्तेष्वनियतप्राप्तस्योपांशुत्वस्य नियमोऽपि भवति । तेनैवोपांशुत्वनियमविधिना दीक्षणीयादिषु चोदकप्राप्तानामैष्टिकानां मध्ये मन्द्रमध्यमोत्तमस्वराणां परिसंख्यापि लभ्यते इत्येवमप्रवृत्तिविशेषकरनियमपूर्वकप्राप्तिनियमपरिसंख्यानां तिसृणामपि विकृतिविशेषप्राप्तयज्ञभागस्वरविधिरेवोदाहरणम् । इदं च सर्वमनुपदमेव स्फुटीकरिष्यते । अप्रवृत्तिविशेषकरपरिसंख्यापूर्विकाः प्राप्तिनियमपरिसंख्याः यथा दीक्षाः सोमस्य दक्षिणाः सोम-

स्येति कर्तृसंस्काररूपाया दीक्षाया: कर्तृद्वारा प्रयोगाङ्गत्वाद्दक्षिणायाः साक्षात्प्रयोगाङ्गत्वाच्च। प्रयोगान्तर्गते प्रधाने सोमयागे तदङ्गकलापे च ज्योतिष्टोमप्रकरणविहितस्य दीक्षादक्षिणस्य प्रोषिणि प्राप्ते वचनद्वयमिदमङ्गकलापस्य तच्छेषित्वव्यावर्त्तनार्थमिति तावदुभयत्र परिसंख्या निर्विवादा सा च न ज्योतिष्टोमे प्रवृत्तिविशेषकरी। दीक्षादक्षिणस्याङ्गप्रधानार्थत्वे केवलप्रधानार्थत्वे च क्रत्वङ्गभूतयमनियमसंकल्परूपदीक्षानुष्ठाने "आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाण" इति तदर्थविहितदीक्षणीयानुष्ठाने दण्डेन दीक्षयतीत्यादिवचनविहिततदभिव्यञ्जकदण्डधारणाद्यनुष्ठाने द्वादशशतदक्षिणादाने च विशेषाभावात्। न च दक्षिणाङ्गप्रधानार्थत्वेऽङ्गप्रधानकर्तृभ्यो देया केवलप्रधानार्थत्वे प्रधानकर्तृभ्य एवेति विशेषो वक्तुं शक्यते। यतः केवलप्रधानार्थत्वेऽप्यङ्गकर्तृभ्य ऋत्विग्भ्य एव देया न तु प्रधानकर्त्रे यजमानाय तस्य स्वत एव फललाभाय प्रधानानुष्ठाने प्रवृत्तस्य दक्षिणादानेनाऽऽनामयितव्यत्वात्। यजमानेनात्मनि संकल्प्यमानस्य दक्षिणाद्रव्यस्य स्वत्वत्यागासम्भवाच्च। किं तु सोमाङ्गविकारेषु काम्यपश्वादिष्वतिदेशेन दैक्षपशुधर्मातिदेशप्राप्तौ दीक्षा दक्षिणाकेभ्यो व्यावर्त्तयन्ती तेष्वेवानुष्ठानविशेषोपयोगिनी। अतोऽप्रवृत्तिविशेषकरी सोमाङ्गेषु दीक्षादक्षिणपरिसंख्या सुत्याक्रत्य प्रवृत्ता सोमाङ्गविकारेषु तत्परिसंख्या। नन्वत्र सोमाङ्गविकारेषु दक्षिणापरिसंख्योक्तिरनुपपन्ना सोमाङ्गस्याग्नीषोमीयपशो-

विकारेष्वनुक्तदक्षिणेषु काम्यनैमित्तिकादिषु पशुषु ऋत्विगानमनाय दक्षिणापेक्षायां स्वप्रवृत्त्यङ्गभूतदक्षिणायां चासत्यां तत्र प्रसङ्गादुपकारकत्वं प्रतिपन्नायाः सोमाङ्गदक्षिणाया एव ग्राह्यत्वादिति चेत् । नैवम् । तथा सति दक्षिणाः सोमस्येत्यस्यात्यन्तवैयर्थ्यप्रसङ्गात्। साक्षात्प्रकृतावदृष्टमपेक्षितं मूलप्रकृतितो ग्राह्यमिति अतोऽश्वत्थादिषु दृष्टत्वेन तद्दृष्टितोऽन्वाहार्यदक्षिणाग्रहणोपपत्तेश्च । एवं चानुक्तदक्षिणकाम्यादिपशुभ्यः सौमिकदक्षिणापरिसंख्यया प्राकृतोऽन्वाहार्यनियमः प्राप्यते। ततश्च दृष्टादृष्टोपकारार्थं तदीयं धर्मजातमपि प्राप्यतइति अप्रवृत्तिविशेषकरपरिसंख्यामूलप्राप्तिनिनियमयोरप्येतदेवोदाहरणम् । ननु विधीनामप्रवृत्तिविशेषकरे फले न पर्यवसानमिति ततोऽन्यत्फलं यदि मृग्यं तदोपांशुपौर्णमास्यां यजन्नित्याद्युदाहरणेषूपांशुयागादीनां स्वर्गसंबन्धादिना प्राधान्यप्राप्तिः फलं न स्यात्। तेषां प्राधान्ये पराङ्गत्वे चानुष्ठाने विशेषाभावादिति चेन्नैवम् । प्राधान्ये सति तदपचारे प्रधानविस्मरणादिप्रायश्चित्तप्राप्तिर्विकृतिषु चातिदेशनिवृत्तिरित्यादिफलान्तरपर्यवसानस्य तदापि वक्तुं शक्यत्वात् । एवमाश्रयभेदेन विधिनियमपरिसंख्यालक्षणानामाश्रयभेदे प्रथमचरमभावाभ्यां तत्फलानां च संकरो दर्शितः। विनैव त्वाश्रयभेदं तत्रैवोद्देश्ये तस्यैव विधेयस्याप्राप्तिपक्षप्राप्तिभ्यामपूर्वविधिनियमविधिलक्षणसांकर्यमपि ज्योतिष्टोमगते यज्ञभागस्तरविधौ दृश्यते । तथा हि । यद्यपि ज्योतिष्टोमस्य याजुर्वैदिकत्वात्साङ्गस्य तस्य

यजुर्वेदविहितत्वोपाधिना उपांशुस्वरत्वमुपांशु यजुषेति वेदस्वरविधिनैव सिद्धं तथा ऽप्यग्नीषोमीयात्प्राचीनेषु तदङ्गेषु यजुर्वेदविहितत्वोपाधिमनपेक्ष्य स्वरूपेणोपांशुत्वस्य प्राप्त्यर्थो ऽयं यज्ञभागस्वरविधिस्ततश्च ऋग्वेदेन सामवेदेन वा विहितं ज्योतिष्टोमविकारं प्राप्नुवत्स्वपि तेष्वयं विधिः प्रवर्त्तते न तु याजुर्वैदिकस्वरविधिरिव न प्रवर्त्तते । यजुर्वेदविहितत्वोपाध्यनपेक्षत्वात्तेषु च प्रवर्त्तमानोऽयमपूर्वविधिः सम्पद्यते । ऋग्वेदसामवेदविहितकर्माङ्गभावमापन्नेषु तेषु तत्तद्वेदविहितत्वोपाधिकोच्चैस्त्वस्य प्राप्त्या कथं चिदप्युपांशुत्वस्य प्राप्त्यभावात् यजुर्वेदेन वेदान्तरेण च विहितं ज्योतिष्टोमविकारं प्राप्नुवत्सु तु तेषु प्रवर्त्तमानो ऽयं विधिर्नियमविधिः सम्पद्यते । तेषु यजुर्वेदविहितत्वोपाधिकस्योपांशुत्वस्यापि पक्षे प्राप्तिमत्त्वात् । तदेवमस्मिन् यज्ञभागस्वरविधौ विकृतिविशेषप्राप्ते सत्यन्तरेणैवाश्रयभेदमपूर्वनियमविधिसङ्करो जायते यद्यप्ययं विधिरग्नीषोमीयात्प्राचीनेष्वपि प्रवर्ग्यतदङ्गेषु न प्रवर्त्तते "उच्चैः प्रवर्ग्येण चरन्ती"ति तेषामुच्चैस्त्वविधानात् । दीक्षणीयादिप्रधानेष्वपि न प्रवर्त्तते । "यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयान्मन्द्रं प्रायणीयायां मन्द्रतरमातिथ्यायामि"ति तेषामपि स्वरान्तरविधानात् तथापि प्रवर्ग्यतदङ्गेभ्यो दीक्षणीयादिप्रधानेभ्यश्च व्यतिरिक्तेष्वग्नीषोमीयात्प्राचीनेष्वङ्गेषु प्रवर्त्ततएव । ननु प्रवर्ग्याङ्गवद्दीक्षणीयादीनामङ्गानि किमिति न पर्युदस्तानि । उच्यते । प्रवर्ग्येणेति तृतीयासंयोगात्प्रवर्ग्यकरणिकायां भावनायामुच्चैस्त्वस्य

विधिस्तदन्तर्गतानि चाङ्गानीत्युच्चैस्त्वस्याङ्गप्रधानार्थता। यथा ऽवभृथेन चरन्तीत्यवभृथकर्मकार्यां भावनायां विधीयमानानामपां न तथेह तृतीयासंयोगो ऽस्ति अतो यथा "यज्ञाथर्वणं वै काम्या इष्टयस्ता उपांशु कर्त्तव्या" इत्यत्र श्रुतमुपांशुत्वं काम्यशब्दोक्तानां प्रधानानां विधीयमानं तेषामेव भवति. एवं दीक्षणीयादीनां विधीयमानः स्वरो ऽपि दीक्षणीयादिशब्दोक्तानां प्रधानानामेव भवति। इयांस्तु विशेषः वैशेषिके स्वरे प्रधानमात्रविषये सति काम्येष्ट्यङ्गेषु दर्शपूर्णमासयोः प्राक् स्विष्टकृतः प्रथमस्थानेन मध्यमेनेडायाः शेषं तृतीयस्थानेनेति विहितं स्वरवैचित्र्यं चोदकात्प्राप्नोति दीक्षणीयाद्यङ्गेषु तु तदपि बाधित्वा वैशेषिको यज्ञभागस्वरविधिः प्राप्नोतीति। एवं च प्रवर्ग्यतदङ्गदीक्षणीयादिप्रधानव्यतिरिक्तेष्वग्नीषोमीयात्प्राचीनेष्वङ्गेषु प्रवर्त्तमानो यज्ञभागस्वरविधिः प्रकृतिविकृतिरूपयाजुर्वैदिकक्रतुगतेषु याजुर्वैदिकत्वोपाधिना प्राप्तमप्युपांशुत्वं स्वरूपेण प्रापयन्नपूर्वविधिर्भवति ऋग्वेदसामवेदविहितक्रतुगतेषु तेषु कथमप्यप्राप्तं तत्प्रापयन्नपूर्वविधिर्भवति। यजुर्वेदतदितरवेदविहितक्रतुगतेषु पक्षप्राप्तं नियच्छन्नियमविधिर्भवतीति वक्तव्य एवात्रापूर्वनियमविधिसंकरः। स्यादेतत् दीक्षणीयादीनामङ्गेषु चोदकानीतनैष्टिकस्वरेण तदपनोविप्रयोगवचनाग्न्यस्य वेदस्वरस्यापवादे प्रसक्ते तत्प्रतिप्रसवार्थो यज्ञभागस्वरविधिः। न तु याजुर्वैदिकत्वानपेक्षोपांशुत्वविधानार्थः। अत्यन्ताप्राप्तविधानात्प्राप्तप्रतिप्रसवविधानस्य लघु

स्यात्। अत एव कपाले श्रपणविधिः प्राकृतश्रपणस्य चोदकात् प्राप्यमाणस्य प्रयोजनाभावान्निवर्त्तमानस्य प्रतिप्रसवार्थः न त्वत्यन्ताप्राप्तश्रपणविधानार्थो विधिः गौरवापत्तेरिति प्राकृतश्रपणधर्माणां तत्र प्राप्तिरुक्ता तन्त्ररत्ने। नन्वेवं सति यज्ञभागस्वरविधिरैष्टिककर्ममात्रविषयः स्यात्तत्रैवापवादप्राप्तेरग्नीषोमीयप्राचीनसमस्ताङ्गविषयो न स्यादिति चेत्। माभूद्विधिलाघवानुसारेण तन्मात्रविषयो ऽस्तु। अङ्गीकृतं हि निगदाधिकरणे नियमविधिलाघवानुसारात् उपांशु यजुषेति वाक्यं निगदातिरिक्तयजुर्विषयमिति। अङ्गीकृतं च पत्नीसंयाजाधिकरणे पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्त इतिद्वादशाहिकं[1] वाक्यं नियमविधिलाघवानुसारात्प्राग्वत्तमादह्नः पत्नीसंयाजान्तत्वविधायकमिति। तस्माद्यज्ञभागस्वरविधिरैष्टिककर्मव्यतिरिक्तेषु प्राप्त्यभावात्तेषु प्रवर्त्तमाने तस्मिन्विधिनियमलक्षणसांकर्यमित्युक्तमयुक्तमिति चेदुच्यते। यत्किञ्चिदिति यदादितिशब्दवद्वीप्सायां प्रसिद्धः वीप्सा च व्याप्तुं साकल्येन सवङ्गुमिच्छा तथा च यत्किञ्चिदित्यनेनाग्नीषोमीयप्रागभाववर्त्तिनः सकलस्याप्यङ्गस्योपांशुत्वसंबन्धे तात्पर्ये ऽवसीयमाने कथं किंचिद्विषयतया सङ्कोचः क्रियेत। यद्यप्युच्चैः प्रवर्ग्येण चरन्तीत्यादिनिरवकाशविध्यन्तरबलात्सङ्कोचो ऽस्ति तथापि लाघवमात्रानुसारात्स न युक्तः। न हि लाघवमस्तीति श्रुतं हातुं शक्यम्। ननु यत्किञ्चिच्छब्दो वीप्सितार्थे इवाङ्गाते ऽपि प्रागभवीयप्रत्ययवत्प्रसिद्धः

---

१ द्वादशाहेन प्रजाकामं याजयेदिति विहितद्वादशाहयागभवम्।

अस्मिंश्चाव प्राग्भागवर्त्तिनामङ्गानां विशिष्याम्नातत्वं प्राचीनमिति शब्देन प्राग्भागस्यैव तद्वर्त्तिनामङ्गानामनिर्द्दिष्टत्वात् । तथा च यत्किञ्चिदित्यस्याम्नातार्थकत्वोपपत्तेर्नाव वीप्सानिश्चय इति चेत् । मैवम् । किमिदमित्यादिप्रश्नोत्तरे यत्किञ्चिदित्यवाम्नातत्वानादरणीयत्वादिबोधनद्वावाम्नातत्वबोधने प्रयोजनाभावेन प्रवृत्तिविशेषकरस्य साकल्यार्थकत्वस्यैव ग्राह्यत्वात् । यत्किञ्चिदादीनां साकल्यार्थकत्व एव"यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयते ऽपि वा"प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययमित्यादौ तत्पदेन प्रतिनिर्द्देशस्य दर्शनाच्च अविशेषम्नातविशेषानादरणादिमात्रपरत्वे यत्किञ्चिदिदं यत्किञ्चिदानयेत्यादौ तदो ऽप्रयोगात् अतः प्रवर्ग्यतदङ्गदीक्षणीयादिव्यतिरिक्तसकलप्राग्भागवर्त्यङ्गसाधारणयाजुर्वैदिकत्वानपेक्षोपांशुत्वविधिरेवात्र स्वीकर्त्तव्यः। नन्वस्त्वेतदेवं तथाप्यस्य विधेः प्रकृत्यन्वयप्रयुक्तमपूर्वविधित्वमेव भवति न तु विकृतिविशेषान्वयप्रयुक्तं नियमविधित्वमपि प्रकृतिप्रकरणाम्नातस्यास्य प्रकृतिविकृतिसाधारणत्वाभावात् इति चेत् । सत्यमुपदेशतस्तथैव अतिदेशतस्तूपकारमुखेनाङ्गवदङ्गधर्माणामपि विकृतिप्राप्तौ विकृतिविशेषं प्रतिपद्यमानस्यास्य विधेर्नियमविधित्वमापतत्केन वार्यते । यो हि सौर्यादिषु विकृतिष्वितिकर्त्तव्यताकाङ्क्षया प्रकृतिवच्छब्दः कल्प्य इत्युच्यते स एवातिदेशाद्वैकृतवाक्यशेषतामापन्नः प्राकृताङ्गधर्मसमूहः स एव लाघवार्थं प्रकृतिवदितिसंग्रहेण निर्दिश्यते । तस्य स्वरूपतः क्लृप्तत्वे ऽपि तत्तद्दृष्टादृष्टोप-

कारवाचिपदप्रयोगस्य वैकृतविधिवाक्यशेषतयास्य कल्प्यत्वेन कल्प्यत्वव्यपदेशः। अतएवोक्तं तन्त्ररत्ने समिधो यजति व्रीहीनवहन्तीति प्रकृतावयमर्थः समिदुपकृतोवघातवितुषीकृतव्रीहिसम्पादितपुरोडाशसाधनकश्च दर्शः कार्य इति ततश्च सौर्यो ऽपि तद्वत्कर्त्तव्य इत्युक्ते समिदुपकृतोवघातवितुषीकृतव्रीहिसम्पादितचरुसाधनकश्च सौर्यः कार्य इत्युक्तं भवति। ततश्च समिदादिशास्त्रं सौर्यशास्त्रस्य वाक्यशेषः सम्पद्यते। अनेनाभिप्रायेण भाष्यकारेण पौरोडाशिकं ब्राह्मणं सौर्यादीनां वाक्यशेष इत्युक्तमध्याहाराद्व्यवहितकल्पना ज्यायसीति। यद्येवमपि प्रकृतिवच्छब्दः प्राकृताङ्गशास्त्रसमूहादन्य एव समानार्थकः कल्प्यः शब्दो न तु स एवा ऽन्यत्र निबद्धस्य शब्दस्य कार्यमुखेनाप्यन्यत्रान्वयासम्भवादिति विचिकित्स्येत तदा यजुर्भागस्वरविधिराश्रयभेदरहिते ऽपूर्वनियमविधिलक्षणसाङ्कर्येण भवत्युदाहरणम्। किं त्वाश्रयभेदपौर्वापर्यसहितापूर्वनियमविधिसाङ्कर्ये[1] तथा हि प्रकृतौ दीक्षणीयादीनामङ्गेषु बाधकबाधनेन प्रवृत्तिविशेषकरो ऽपि यजुर्भागस्वरविधिस्तद्व्यतिरिक्तेषु प्राचीनपदार्थेषु प्रकृतौ न प्रवृत्तिविशेषकरः याजुर्वेदिकत्वोपाधिकेन वेदस्वरविधिनैव तेषु उपांशुत्वानुष्ठानसिद्धेः। किं तु वेदान्तरविहितविकृतिगतेषु उपांशुत्वप्रापणेन यजुर्वेदवेदान्तरविहितविकृतिगतेषु तन्नियमेन च सफल इति अप्रवृत्तिविशेषकरप्राप्तिपूर्वक-

[1] आश्रयभेदस्यापि पौर्वापर्यसहितो योऽपूर्वनियमविधिसाङ्कर्ये।

[2] यदक्षरस्य बाधकमीदृक् तेस्वयं महाधनेन।

प्राप्तिनियमयोरिदमुदाहरणं स्यात्। ननु विकृतिगतेष्वपि कर्मसु स्वरप्राप्तिनियमनाभ्यां न प्रवृत्तिविशेषलाभः कर्मसु साक्षात्स्वरस्यानुष्ठातुमशक्यत्वात्। सत्यम्। तत्राप्यन्ततस्तदङ्गमन्त्रावतरणेन सफलता। अत एव प्राक् ऋग्वेदयजुर्वेदविहितासु विकृतिषु निगमविधिरूपयक्षभागस्वरविधिमुदाहृत्य तत्राप्रवृत्तिविशेषकरनियमपूर्वकप्राप्तिनियमपरिसंख्याः प्रदर्शिताः। तदेवमाश्रयभेदे सत्यमति च विधिलक्षणानामाश्रयभेदपौर्वापर्ययोश्च सतोरसतोस्तत्फलानां साङ्कर्यस्य बहुलमुपलम्भात्। तथैव प्रागुदाहृतेषु रथन्तरादिविधिषु एकानेकविध्यप्रवृत्तिभ्यां विधिनियमादिलक्षणसङ्करो न दोषायेत्याशङ्क्याह।

यद्येकानेकविध्यप्रसृतिमुखभवः
सङ्करो लक्षणानामिष्येता
न्याश्रयत्वं प्रथमचरमताद्युक्
थसाङ्कर्यरीत्या। दैक्षादन्योऽपि
दण्डः प्रकृतिजुषिभवेत्प्रैषकार्ये
प्रशास्तुः स्यात् पक्षे स्तोत्रसा
म्नां क्रतुनिकरजुषामुत्तरास्वेव
गानम्॥ १४॥

सत्यमेकानेकविध्यप्रवृत्तिभ्यां लक्षणसङ्करोपगमे रथन्तरपृष्ठादिनियमविधिष्वनिष्टं नापद्यत इतिकश्चि-

कञ्चिदनिष्टमथापद्यते तथा हि दण्डी प्रैषानन्वाहेत्यत्र तद्विधिमात्राप्रवृत्तौ परिसंख्यालक्षणं प्रवर्त्तते तदा हि क्रीते सोमे मैत्रावरुणाय दण्डः प्रयच्छतीतिविधिना मैत्रावरुणार्थत्वेन सिद्धस्य दीक्षितदण्डस्य प्रयोजनाकाङ्क्षायां तदीयानि दण्डापेक्षाणि सर्वाणि कार्याणि समुच्चित्य प्राप्नुवन्ति क्रीते सोमइत्यादिविधेरप्यप्रवृत्तौ न तल्लक्षणं प्रवर्त्तते तदा दीक्षाव्यञ्जकस्य दण्डस्य यावद्दीक्षानुवृत्ति दीक्षितेनैव धारणीयतया प्राप्तेः । किं तु तदा नियमविधिलक्षणं प्रवर्त्तते स्थित्वोच्चैरनवानं कर्त्तव्ये प्रैषानुवचने किं चिदालम्बनं सौकर्यापेक्षायामनियमेन यस्य कस्यचिदालम्बनस्य प्राप्तेः । ततश्च तत्र तद्विधिमात्राप्रवृत्त्यपेक्षया परिसंख्यालक्षणानुगमने दीक्षितदण्ड एव प्रैषानुवचने योजनीयः क्रीते सोमइतिविधेरप्यप्रवृत्त्यपेक्षया नियमविधिलक्षणानुगमने निरूढपशाविव दीक्षपशावपि दीक्षितदण्डादन्य एव कश्चिद्दण्डो योजनीयः । न चैतदुपपद्यते । न चोभयमपि विकल्पेन योजयितुं शक्यमिति वाच्यम् । वस्तुतः क्रीते सोम इति विधेः सत्त्वेन तद्वशान्मैत्रावरुणार्थत्वेन सिद्धस्य प्रयोजनाकाङ्क्षस्य दीक्षितदण्डस्यैव तत्र योजनीयत्वात् । अतस्तत्र तद्विधिमात्राप्रवृत्त्यपेक्षया परिसंख्यैव केवलमेष्टव्येति । तत्र क्रीते सोमइतिविधेरप्यप्रवृत्त्यपेक्षया समापतन्नियमविधिलक्षणसादृश्यमनिष्टमेव । तथा स्वयोनिषु गीयमानानां बहुसाम्नामेकं साम तृचे क्रियते स्तोत्रीयमिति विध्यनुसारेण कयोश्चिदन्ययोरप्यृचोर्गाने कर्त्तव्ये प्राप्ते यद्योन्यां तदुत्तरयोर्गायतीतिवचनं कयोश्चिदुत्तरयोः प्रापयत् कश्चि-

त्तरयोर्नियमार्थमिति प्रागुक्तम् । तत्रैकं साम्नेति विधेरप्रवृत्तौ यद्योन्यामिति वचनं क्रतुमाम्नां तद्योनेराच्छिद्योत्तरयोरेव गानप्राप्त्यर्थमिति प्रसज्येत । न चैतदिष्टम् । वस्तुतस्तत्त्वगानप्रापकविधिबलाद्यद्योन्यामिति विधानस्य योनेरनाच्छिद्य क्रतुसाम्नामुत्तरयोरपि प्राप्तिनियमार्थत्वात् ; इदमुपलक्षणम् । व्रीहियास्वश्रयणविध्याद्यप्रवृत्त्यपेक्षायामवहननादिविधयो ऽर्थकर्मविधयः प्रसज्येरन्नित्यादीन्यपि दूषणानि द्रष्टव्यानि । तस्मादाश्रयभेदेन प्रथमचरमभावेनान्यथा वा विधिनियमपरिसंख्यालक्षणफलसाङ्कर्यवदेकानेकविध्यप्रवृत्त्यपेक्षया तल्लक्षणसाङ्कर्यं न युक्तमभ्युपगन्तुमिति तत्तद्विध्यप्रवृत्त्यपेक्षयैव लक्षणान्युपपादनीयानि । ननु तथा सति नियमपरिसंख्यालक्षणयोर्व्रीहियवसाप्तदश्यादिशास्त्रेष्वव्याप्तिः स्यादित्युक्तमिति चेत् किं कुर्मस्तत्संग्रहार्थमेकानेकविध्यप्रवृत्त्यपेक्षायां हि बलवन्त्यनिष्टानि दर्शितानि । तस्मादपूर्वविधिलक्षणस्य स्वर्गकामवाक्याद्यव्याप्तिवन्नियमपरिसंख्यालक्षणयोरपि तदव्याप्तिरनिवार्यैव । अतः सति सप्तमीपक्षो ऽपि न युक्त इति भावः । किं चाप्राप्ते इत्यस्य सतिसप्तमीपक्षे परिसंख्यानिवर्त्तकत्वं न लभ्यत इति दूषणान्तरमाह ।

किं चाप्राप्ते सतीति प्रभवति परिसंख्यानिवृत्तिं न कर्तुम् नित्याप्राप्तां निवृत्तिं घटयति खलु

सा ऽप्यत्र को वा विशेषः ॥ भावाप्राप्तिनिषेधात्मकविधिनिकरव्यापकाव्याप्तिदुष्टा सत्यप्येवं निषेधश्रुतिमुखपरिसंख्यासु चातिप्रसक्तिः ॥ ११ ॥

अप्राप्ते सतीतिविशेषणं परिसंख्यानिवृत्तिं कर्त्तुं न प्रभवति । यतः परिसंख्याप्यत्यन्तमप्राप्तामितरनिवृत्तिं प्रापयत्येव । तथा च "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त" इति परिसंख्याविधिः प्राप्तविषयो ऽपि गर्द्दभरशनातो निवृत्तौ मन्त्रमप्राप्तायाः तस्यास्त्वप्राप्तिफलको भवतीति कथं विषयसप्तमीपक्षइव सतिसप्तमीपक्षे तद्व्यावृत्तिरप्राप्तिविशेषणेन लभ्येत । न ह्यपूर्वविधितः परिसंख्याविधेरप्राप्तप्राप्तिफलकत्वे ऽस्ति कश्चिद्विशेषः । नन्वयमस्ति विशेषः । यत्परिसंख्याविधौ निवृत्तिरूपस्याभावस्याप्राप्तस्य प्राप्तिः फलम् । अपूर्वविधौ तु भावस्येति भावाप्राप्तिरेव चेहाप्राप्तिरित्यनेन विवक्षिता । लोके प्राप्तिशब्दस्य निवृत्तिप्रतिभटवाचित्वेन प्रसिद्धतया भावशब्दाप्रयोगे ऽपि तद्विषयत्वलाभादिति चेत् । एवं सति निषेधात्मकेषु "दीक्षितो न जुहोति" "न तौ पशौ करोति" "नातिरात्रे षोडशिनं गृह्णाति" इत्यादिसर्वेष्वप्यपूर्वविधित्वव्याप्तिः स्यात् । तेषां दीक्षामध्यपक्षतिरात्राद्यप्राप्तपुरुषार्थहोमाद्यभावो-

डर्शिनिवृत्त्यादिरूपाभावप्राप्तिफलकत्वात् । न च निषेधस्य विषयो न भवन्तीति वाच्यम् । दर्शपूर्णमासिकि "नानृतं वदेदि"ति निषेधे सूत्रकृतैव विधित्वस्य व्यवस्थापितत्वात् । नन्वनुवादप्रतियोगिविधित्वं तत्र तस्य व्यवस्थापितम् । तत्र हि तस्य दर्शपूर्णमासप्रकरणे श्रुतस्य "नानृतं वदेदि"तिनिषेधस्य स्मृतिदृष्टपुरुषार्थनिषेधानुवादकत्वमाशङ्क्य क्रत्वङ्गत्वेनानृतवदनवर्जनविधिरयं तेन क्रतुमध्ये ऽनृतवदने पुरुषार्थनिषेधातिक्रमात् प्रत्यवायवत् क्रत्वर्थनिषेधातिक्रमात् क्रतुवैगुण्यं च भवतीत्युक्तम् । इह तु निषेधप्रतियोगिविधित्वं लक्ष्यरूपम् । अतो न तदव्यापनं दोष इति चेत् । नैवम् । इहाप्यनुवादप्रतियोगिविधेरेव लक्ष्यत्वात् । अपूर्वविध्याद्युदाहरणेषु विधित्वसमर्थनाय प्राप्त्यप्राप्तिविवेचनवद्भावाभावविवेचनादर्शनात् । भवतु वा विधिमुखप्रवृत्तापूर्वविधीनामेवात्र लक्ष्यत्वाङ्गीकारेण कथं चिदव्याप्तिपरिहारस्तथाप्युक्तविवक्षायां निषेधमुखप्रवृत्तपरिसंख्यातिव्याप्तिरनिवार्या तत्राप्राप्तत्वेन मापणीयाया इतरनिवृत्तेर्भाव्यरूपत्वात् । यथा गृहवन्तो प्रायणीयासन्तिष्ठते न पत्नीः संयाजयतीति अत्र प्रायणीयायाः शंख्वन्तमापनविधानात्तत उदीच्यानां सर्वेषामङ्गानामकरणे प्राप्ते न पत्नीः संयाजयतीतिवचनं पत्नीसंयाजानेव न कुर्यादङ्गान्तराणि तु कुर्यादितिपरिसंख्यारूपेण प्रायणीयायामङ्गान्तरप्राप्त्यर्थं यथा वा शङ्खस्मृतौ तैजसद्रव्यशुद्धिप्रकरणे ।

सूतिकोच्छिष्टभाण्डस्य सुरामद्याहृतस्य च ।
निःसृतमार्जनाच्छुद्धिर्नं तु कांस्यस्य तापनम् ॥

इति अत्र मार्जनवत्तापनस्य विधानाभावात्सर्वेषां तैजसान्तराणां तापनाकरणे प्राप्ते न तु कांस्यस्येति वचनं कांस्यस्य च तापनं न कार्यमन्यस्य तु कार्यमिति परिसंख्यारूपेण तैजसान्तराणां तापनप्राप्त्यर्थं तथैव व्याख्यातमपरार्केण तैजसानां सूतिकोच्छिष्टादिके स्वल्पोपघाते यवचूडादिभिरेकविंशतिकृत्वो मार्जनाच्छुद्धिर्न तु कांस्यस्य तापनमथोत्कांस्यव्यतिरिक्तस्य तापनमपि कार्यमिति गम्यतइति यद्यप्येतद्योदाहरणे वस्तुतः परिसंख्या नेष्यते शंय्वन्तसंस्थायाः परिसंख्यायाश्च विधिद्वयेन वाक्यभेदस्य तुल्यबलविधिद्वयप्राप्तयोः शंय्वन्तसंस्था पत्नीसंयाजवर्णं कृत्स्नसंस्थयोर्विकल्पस्य प्राप्तविषयत्वेन निर्दोषायाः परिसंख्यायाश्च परिहाराय न पत्नीः संयाजयन्तीति शंय्वन्तसंस्थाविधेरर्थवादः पत्नीसंयाजाननुष्ठानलाघवेन तत्प्रशंसार्थ इति शंखिडान्तत्वे विकल्पः स्यादिति दाशमिकाधिकरणे निर्णीतत्वात्। तथापि पूर्वपक्षरीत्या तदुदाहरणं यद्येवं विध्यन्तरशेषत्वं न सम्भवति तत्र तदधिकरणपूर्वपक्षरीत्या परिसंख्यावतिष्ठतइति तथाभूतमुदाहरणमिहान्वेषणीयम्। प्रसिद्धा चान्यत्रापि न निष्ठीवनं धार्यं न भूपालैरनुरमेदित्यादिषु स्मृतिषु यज्ञदत्तदेवदत्तविष्णुमित्रा न भोजनीयाः सत्स्वेष्वपि विष्णुमित्रो न भोजनीय इत्यादिलोकव्यवहारेषु च विशेषनिषेधः शेषाभ्यनुज्ञापर इति निषेधमुखपरिसंख्या। अतस्तत्रातिव्याप्तिः स्यादेवेतिभावः। एवमप्राप्तविशेषणाविचारमुखेन लक्षणस्य दोषा दर्शिताः। अथाव्यक्ता-

विशेषणार्थविचारमुखेनापि तस्य दोषान्दर्शयति।

येनातिव्याप्तिभङ्गः किलनियमविधौ किं तदात्यन्तिकत्वम्
सर्वोद्देश्यानुवृत्तिर्यदि पुनरुदिता व्याप्तयः स्युर्विकल्पे। प्राप्तोद्देश्यैकदेश्या अपि खलु क्वचिच्चारितार्थ्यं भजन्तः श्रूयन्ते सार्वकाम्यप्रभृतिषु विधयस्तेषु चाव्याप्तयः स्युः॥ १२॥

येन विशेषणेन नियमविधौ लक्षणस्यातिव्याप्तिनिरासो ऽभिमतस्तदप्राप्तेरात्यन्तिकत्वं किं नाम यदुच्यते सर्वोद्देश्यानुवृत्तिरप्राप्तेरात्यन्तिकत्वम् अवघातस्य च न सर्वेषु व्रीहिष्वप्राप्तिः केषु चिद्दर्शपूर्णमासप्रयोगगतेषु व्रीहिष्ववघातस्य स्वत एव प्राप्तेरन्येषु विदलनप्राप्तिस्तेष्वेव तदप्राप्तिसत्त्वादिति एवं तर्हि प्रथमश्लोकोद्भाविताऽव्याप्तयः प्राक् समाहिताः पुनरपि विकल्पमुखेनोन्मज्जेयुस्तथा हि सर्वोद्देश्यानुवृत्तिरित्यत्रोद्देश्यपदेन प्रायणीयोद्देश्यं विवक्षितं, प्रकृतविध्युद्देश्यं वा, आद्ये विषयसप्तमीपक्षोद्भावितवैकृताग्न्यादिविध्यव्याप्तेर्द्वितीये सतिसप्तमीपक्षोद्भाविताग्नताविध्यव्याप्तेश्च पुनरुन्मज्जनापातः।"श्ये-

नचितं चिन्वीत स्वर्गकाम" इत्यादिवाक्यैः स्वस्वोद्देश्येषु स्वर्गादिषु श्येनाकृत्यादिगुणानां प्राप्तौ सत्यामेव स्वर्गोद्देशेन तेषामनुष्ठानं वैकृतप्रयोगमध्ये परं न प्राप्तमिति विकृतिष्वग्न्यादिपुनर्विधीनां तत्प्रापणं फलमित्युपेयते एवमप्रताविध्युद्देश्येषु द्वादशाहिकगवामयनिकेषु आद्यद्वितीयेष्वहःसु प्राप्तानामेवाग्रतानां तद्विकृतिषु प्राप्तिर्विधिफलमित्युपेयते। तत्र विकृतिषु प्रापणीयानां श्येनादिगुणानां स्वस्वोद्देश्येषु स्वर्गादिष्वग्रतानां च विध्यन्वितोद्देश्य द्वादशाहिकगवामयनिकेष्वहःसु काचित्क्वचित्प्राप्तिर्नास्ति कथं सा सार्वत्रिकी समर्थ्येत अपि चोद्देश्यैकदेशे प्राप्तिमन्तोऽपि तदेकदेशान्तरे चरितार्थी विधयो दृश्यन्ते यथा "एकस्मै वा अन्ये यज्ञक्रतवः कामायाक्रियन्ते सर्वेभ्यो ज्योतिष्टोमः सर्वेभ्यो दर्शपूर्णमासावि"ति अत्र ज्योतिष्टोमदर्शपूर्णमासानां स्वर्गार्थत्वं प्रातिस्विकविधिना प्राप्तमिति फलान्तरेष्वेव विधिचारितार्थ्यं यथा वाभ्युदयेष्ट्यां तण्डुलान्विभजेदिति तण्डुलदधिश्रितानां पूर्वदेवतासम्बन्धयो वक्ष्यमाणदेवताभ्यां विभागो वा मध्यमादिवाक्यैस्तेषां देवतान्तरविधानेनैव प्राप्त इति उपांशुयाजाज्यएव विधिचारितार्थ्यं तथा हि "विवा एत प्रजया पशुभिरर्द्धयति वर्द्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति स त्रेधा तण्डुलान्विभजेद्ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधञ्चरुं ये ऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुमिति श्रूयते अत्र चतुर्दश्याममावास्याभ्रान्त्या दर्शोपक्रमं कृतवतस्त-

त्रायश्चित्तविधाने त्रेधा तण्डुलानां मध्यमादिभावेन त्रेधा विभागो न विधीयते ये मध्यमा इत्यादिवाक्यैस्तत्सिद्धेः किं तु सर्वेषां दार्शिकहविषां पूर्वदेवताभ्यो ऽपनयो विधीयते विभजेदित्युक्ते ह्ययमर्थो ऽवगम्यते यानि संयुक्तानि तानि विभजेदिति। तण्डुलादीनि हवींषि च देवताभिः संयुक्तानि अतस्तण्डुलशब्दो विभागकर्मत्वेनार्थप्राप्तदार्शिकहविर्मात्रोपलक्षक इति तेषां पूर्वदेवतापनयो विधीयतइति युक्तम्। अथ वा मनुः पुत्रेभ्यो दायं व्यभजेदिति प्रयोगदर्शनादिह दार्शिकहविषां वक्ष्यमाणदातृत्वादिगुणकाग्न्यादिदेवताभ्यो विभजनं विधीयते पूर्वदेवतापनयस्त्वर्थसिद्ध इत्येवमस्य वाक्यस्यार्थद्वयं भाष्यटुप्टीकयोर्दर्शितम्। तत्रार्थद्वये ऽपि तण्डुलदधिशृतेषु न विधेयारिताथ्यं देवतान्तरसंयोजनेन पूर्वदेवतापनयस्य विशेषतो विभजनेन सामान्यविभागस्याप्यर्थप्राप्तत्वात्। किं तु तण्डुलशब्देन दार्शिकहविर्मात्रोपलक्षकेन लक्ष्यमाणे उपांशुयाजाज्ये तस्य चारितार्थ्यम् उपांशुयाजाज्यस्याग्रे देवतान्तरसंयोजनाभावेन पूर्वदेवतापनयस्य सामान्यविभजनस्य चार्थप्राप्त्यभावात्। अत एव पूर्वदेवतापनयपक्षे उपांशुयाजाज्यस्य पूर्वदेवताया अपनयात् देवतान्तरस्य चाविधानात् देवतान्तरेण यष्टुमशक्यत्वात् उपांशुयाजस्य लोपः। सामान्यविभजनपक्षे उपांशुयाजाज्यस्यापि सामान्येन वक्ष्यमाणदेवताभ्यो निर्दिष्टत्वादग्रे देवतान्तरविशेषस्य चानिर्देशाद्वक्ष्यमाणाभ्यः सर्वाभ्यो देवताभ्यो विभज्य दातव्यमिति भाष्यटुप्टीकयोरुपांशुयाजे वचनाद्यथाप्रकृतीत्येतदधिकरणे बहृच-

ब्राह्मणानुसारेणामावास्यायामुपांशुयाजसत्तामभ्युपेत्य निरूपितम् । ननु तण्डुलमृतसान्नाय्येष्वपि पूर्वदेवतापनयसामान्यविभागौ नार्थसिद्धौ त्रेधा तण्डुलानित्यत्र तदन्यतरविध्यभावे दार्शिकहविषां प्रकृतदेवतातिरिक्तदेवताविशेषाकाङ्क्षाविरहेण मध्यमादिवाक्यानि तेषां अपूर्वदेवताविशेषसंयोजनपराणीत्यत्र निर्णायकाभावात् न हि तदा मध्यमादिशब्दानां प्रकृततण्डुलादिपरत्वे नियामकमस्तीति चेत्। न। यच्छब्दोपबन्धबलात् तण्डुलानां प्रकृतानां ग्रहणे तत्समभिव्याहाराद् दधिशृतयोरपि प्रकृतयोर्ग्रहणमित्युपपत्तेः । न चानपनीतपूर्वदेवातानां तेषां देवतान्तराकाङ्क्षाविरहेण तत्संयोजनानुपपत्तिः । पूर्वदेवतापनयाकाङ्क्षाविरहेऽपि तदपनयवद् देवतान्तरसंयोजनस्याकाङ्क्षाविरहे तत्संयोजनस्य वचनबलादुपपत्तेः । सामान्यतो विभजनपक्षे विनैव पूर्वदेवतापनयं देवतान्तरसंयोजनस्य तत एव पूर्वदेवतापनयस्यार्थसिद्धतायाश्च संप्रतिपत्तेश्च । अतस्त्रेधा तण्डुलानिति विधेरप्युद्देश्यैकदेशएवचारितार्थ्यं तस्मात्सर्वोद्देश्यानुवृत्तिप्राप्तिरर्हितपूर्वाद्दतविधित्वव्याप्तिः स्यादित्यर्थः । स्यादेतत्सर्वोद्देश्यानुवृत्तिरिह न सर्वासूद्देश्यव्यक्तिष्वप्राप्तेरनुवृत्तिर्विवक्षिता किंत्वेकस्याप्युद्देश्यव्यक्तौ सर्वात्मनानुवृत्तिस्तद्व्यापित्वरूपा एवं च सार्वकाम्यविध्यादिषु नाव्याप्तिः तेषु स्वर्गातिरिक्तफलोपांशुयाजद्रव्यादिरूपकिंचित्किंचिदुद्देश्यव्यापकाप्राप्तेः सत्त्वात् । नापि नियमव्याहत्यलाभः नियमविधौ क्वचिदुद्देश्ये व्यापिकायाप्राप्तेरभावात् सर्वेष्वपि दर्शपूर्णमासिकेषु व्रीहिषु चैघादवहननस्य पाक्षिक

प्राप्तिसत्त्वात् न । हि व्रीहीनवहन्तीति नियमविध्यभावे केषुचिद्व्रीहिष्ववहननं केषुचिद् विदलनादिकं च व्यवस्थितमाक्षेपतः प्राप्यते येन क्व चिदप्युद्देश्ये तदप्राप्तिर्व्यापिका स्यात् किं तु सर्वेष्वपि व्रीहिष्ववहननेन वा वैतुष्यं कार्यं विदलनादिना वेति तदुभयमपि पक्षे प्राप्यते नचैकत्रोभयानुष्ठानस्य विरुद्धत्वादुभयोः प्राप्तिर्नास्तीति शङ्कनीयं न हि प्राप्तिर्नामानुष्ठानमेव तथा सति क्वचिद्दर्शपूर्णमासप्रयोगे विदलनस्याप्यनुष्ठाने नियमविधिविरोधापत्तेः । किं तु नियमविध्यभावे लोकसिद्धवैतुष्यकारणत्वात्तदर्थमवहननं विदलनादिकं वानुष्ठीयेतेत्येवमनुष्ठानतर्कणामात्रं प्राप्तिः तच्चैकत्रापि न विरुद्धं न ह्यविरोधे ऽपि नियमविध्यभावे क्वचित्प्रयोगे ऽवहननं प्रयोगान्तरे विदलनादिकं चानुष्ठीयेतेत्येव तर्कः प्रवर्त्तत इति नियन्तुं शक्यते कं चित्प्रयोगविशेषमेवाधिकृत्य नियमशास्त्राभावे इहावहननं विदलनादिकं वानुष्ठीयेतेत्येवमपि तर्कप्रवृत्तिसम्भवात् तस्मादुक्तविवक्षायां न कश्चिद्दोष इत्यत आह ।

उद्देश्यव्यापिका सा यदि भवति तदा ऽप्यादिमाव्याप्तिवन्धः स्याद्व्याप्तिश्च गावामयनिकषडहे पृष्ठसाम्नोर्विधाने । अन्यार्थप्रापणोद्यन्नियमस्त्वरणयोरप्य-

तिव्याप्तिरित्थम् तच्चेत् त्रैकालिकत्वं न विधिरपवादापवादस्तथा स्यात् ॥ १३ ॥

एवं विवक्षायामपि प्रथमश्लोकोक्ताग्निविध्याद्यव्याप्तिपुनरुक्तञ्जनरूपः प्रागुक्तदोषः स्यादेव तदुदाहरणेषु क्वचिदपि तत्तदुद्देश्ये प्राप्तेरभावात् अन्यच्च चाव्याप्तिरधिका स्यात् तथा हि द्वादशाहे पृष्ठ्यः षडहः उत्पन्नः स च क्रमेण रथन्तरबृहद्वैरूपवैराजशाक्वररैवताख्यपृष्ठस्तोत्रसाधनसामवतां षण्णामह्नां समाहारः गवामयने पुनः श्रूयते पृष्ठ्यः षडहो बृहद्रथन्तरसामा कार्य इति तेन गवामयनिकषडहस्य बृहद्रथन्तरे एव पृष्ठसामनी इति वैरूपादीनि निवर्त्तन्ते। ततश्च षडहोद्देशेन बृहद्रथन्तरविधौ आद्यस्याह्नो रथन्तरसामत्वं द्वितीयस्य बृहत्सामत्वं च द्वादशाहिकषडहे क्लृप्तमिहापि प्राप्तमित्युद्देश्यव्यापकाप्राप्तेरभावादव्याप्तिः । नन्विहैकैकस्याह्नो बृहद्रथन्तरसामत्वं विधीयते संभव उभे कुर्यात् गोसव उभे कुर्यादित्यादौ यथा तत्तु क्वचिदप्यहनि न प्राप्तमिति चेत् । न । प्रकृतौ बृहद्रथन्तरयोः परस्परनैरपेक्ष्येण पृष्ठस्तोत्रसाधनत्वात्तथैव प्राकृतनैरपेक्ष्याबाधेन क्वचित् बृहत् क्वचिद्रथन्तरमिति विधानोपपत्तौ तद्बाधनायोगात् । न च वाच्यं बृहच्च रथन्तरं च बृहद्रथन्तरे बृहद्रथन्तरे सामनी यस्येति बृहद्रथन्तरसामेति द्वन्द्वगर्भो ऽयं बहुव्रीहिस्ततश्च द्वन्द्वावगतसाहित्यबलादेकैक-

स्याह उभयसामत्वं विधेयमिति श्रक्तत्वैव द्वन्द्वसमासं वृहत्सामास्य रथन्तरं सामास्येत्यनेकपदबहुव्रीहिस्वीकारसम्भवात् । न च द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनमिति कात्यायनवचनादिह द्वन्द्वसमासो नियत इति वाच्यम् । यत्र द्वन्द्वतत्पुरुषयोः सतोरन्यच्छब्दरूपमसतोश्चान्यद्भवति तत्र समासक्रतरूपनियमार्थं तद्वार्त्तिकप्रवृत्तेः । यथा वाक्त्वचप्रियः पञ्चगवधन इति । अत्र हि द्वन्द्वतत्पुरुषयोरकरणे द्वन्द्वाच्चुदषहान्तात्समाहार इति गोरतद्धितलुकीति समासान्तप्रत्यययोरप्राप्तेर्वाक्त्वक्प्रियः पञ्चगोधन इतिरूपं सिद्ध्येत् इह तु द्वेधापि रूपस्याभेदान्न्यायतोऽर्थे निर्णेतव्ये प्रत्येकप्राप्तिचोदकानुग्रहायानेकपदबहुव्रीह्याश्रयणमेव युक्तम् । यद्यपि द्वन्द्वगर्भ एवात्र बहुव्रीहिः स्यात्तथापि प्रकृतितः प्राप्तं नैरपेक्ष्यं न बाधितव्यम् । षडहापेक्षया साहित्यस्यार्थप्राप्तस्य तद्विषयत्वोपपत्तेः । अन्यथा वृहद्रथन्तरयोः षडहसंबन्धस्य तयोरेकैकस्मिन्नेवाहनि साहित्यस्य च विधेयत्वे वृहद्रथन्तरे एवास्य षडहस्य सामनी ते चैकैकस्मिन्नहनि परस्परसहिते कर्त्तव्ये इत्यनेकार्थविधानेन वाक्यभेदप्रसङ्गात् । न ह्यत्र सप्तदशादिवच्चोदकप्राप्तयोर्वृहद्रथन्तरयोः साहित्यमात्रविधानं शक्यम् । तृतीयादिष्वहःसु तयोरपि प्रापणीयत्वात् तस्मादिह नोभयसामत्वविधानं तत्रैव व्यवस्थापितं पृष्ठस्य युगपद्विधेरेकाहवद्द्विसामत्वमिति दाशमिकाधिकरणे । नन्वस्त्वेकैकस्याह्न एकैकसामविधानं तथाऽपि वृहद्रथन्तरसामेति पाठक्रमादाद्यस्याह्नो वृहत् द्वितीयस्य रथन्तरमित्यनेन क्रमेण वृह-

द्रथन्तरसामत्वं विधेयं तत्तु क्वचिदपि न प्राप्तमित्युद्देश्यव्यापिकाप्राप्तिरस्तीति चेत् न । प्राकृतप्राप्त्यबाधेनाद्यस्याह्नो रथन्तरं द्वितीयस्य बृहदित्यनेन क्रमेण विधाने सम्भवति अत्याचतरपूर्वनिर्दृदेशार्थतया अन्यथासिद्धेन बृहद्रथन्तरपाठक्रमेण प्रकृतिप्राप्तबाधनायोगात् जगती वै छन्दांसि प्रत्यवरोहन्ति आग्रयणं ग्रहा बृहत्पृष्ठानीति गवामयनस्योत्तरे पक्षसि षाडहिकस्य पञ्चमस्याह्नो बृहत्पृष्ठत्वलिङ्गेनाद्यस्य रथन्तरं द्वितीयस्य बृहदित्यादिक्रमस्यैव निर्णयाच्च । बृहद्रथन्तरसामा कार्य इत्यादिविषयो हि गवामयनस्य पूर्वस्मिन्पक्षस्यवान्तरप्रकरणे न निविशन्ते पूर्वस्मिन्पक्षस्यनुष्ठिताश्च छन्दोनीकपृष्ठसामस्तोमगणा उत्तरे पक्षसि प्रातिलोम्येनानुष्ठेयाः । प्रत्यवरोहिणो मासा भवन्ति उत्तरे पक्षस्यावृत्ता गणा इत्यादिदर्शनात् । ततश्च यदि पूर्वस्मिन्पक्षसि अयुग्मस्याह्नो रथन्तरं युग्मस्य बृहदिति नियमः स्यात्तदैवोत्तरे पक्षस्ययुग्मस्य पञ्चमस्याह्नो बृहत्पृष्ठतादर्शनमुपपद्यते तस्मात् बृहद्रथन्तरसामा कार्य इत्यवाद्यस्याह्नो रथन्तरं द्वितीयस्य बृहदित्यादिक्रमेणैव षडहोद्देशेन बृहद्रथन्तरसामत्वं विधीयते तस्य च षडहरूपोद्देश्यव्यापिका प्राप्तिर्नास्तीति अव्याप्तिरनिवार्या । अपि च यैर्विधिभिः स्वोद्देश्ये विधेयस्याप्राप्तस्य प्रापणं क्रियमाणमपि तत्प्रवृत्तिविशेषकरत्वादन्यार्थत्वं वाच्यमिति । तेन कस्य चित्प्रापणं नियमनं परिवर्जनं वा मसुदेति तेषां नवमश्लोकावतारिकोदाहृतानां मध्ये यावदन्यार्थप्रापणोद्यन्नियमपरिवर्जनविधी-

साम्ना स्तुवीत यदि रथन्तरसामा सोमः स्यादिति तयोर्विध्योरतिव्याप्तिरप्येवं स्यात् । विषयशुद्ध्यर्थमन्यदपि नियमविधिरूपमतिव्याप्तिस्थलमुदाह्रियते । प्रजापतिर्वा इदमेक आसीदित्यादिना प्रजापतेः सृष्टाग्निवाय्वादित्येभ्योत्पन्नत्वेन वेदानां प्रशंसयोपक्रम्य श्रूयते तस्मादुच्चैरृचा क्रियते उपांशु यजुषा उच्चैः साम्नेति अत्रोपक्रमे वेदानां प्रशंसया वेदविषये किं चिद्विधास्यत इत्यवगमात्तदनुरोधेन ऋगादिशब्दा ऋगादिप्रायऋग्वेदादिपराः । तथा च ऋग्वेदेन यत् क्रियते विधीयते तदुच्चैरित्यादिप्रकारेण ऋग्वेदादिविधेयकर्मोद्देशेनोच्चैस्त्वादिविधय । इति स्थितसुपक्रमाधिकरणे । कर्मसु च साम्यान्निवेशमुच्चैस्त्वादयो न लभन्ते अतस्ते तदङ्गमन्त्रेष्ववतरन्त ऋग्वेदादिविधेयकर्माङ्गमन्त्राणामनियतस्वरप्राप्तौ स्वरविशेषनियमार्था एते विधयः पर्यवस्यन्ति । ततश्चैतेषु विधिषु विधेयानामुच्चैस्त्वादीनां पार्ष्णिकान्वयविषयेषु मन्त्रेषु पाक्षिकप्राप्तिसत्त्वे ऽप्युद्देश्येषु कर्मसु कथमपि प्राप्त्यभावात्तेष्वपि लक्षणस्यातिव्याप्तिः स्यात्। ननु कर्मोद्देशेनोच्चैस्त्वादिविधयो ऽप्राप्तविषयत्वादपूर्वादिविधय एव युक्ताः कथमतिव्याप्तिरिति चेत् । उच्यते । यत्र यदनुष्ठानं यस्य विधेः फलं तत्र तदनुष्ठानप्राप्त्यप्राप्तिविवेचनेनैव नियमापूर्वविधित्वव्यवस्था कार्या । ननु यत्र यच्छेपत्वं विधिशेष्यम् तत्र तच्छेपत्वप्राप्त्यप्राप्तिविवेचनेन तथा सत्यवघातगतापूर्वीयत्वशेषत्वाप्राप्त्या तद्विधेरप्यपूर्वविधित्वप्रसङ्गात्। न हि तत्रोद्देश्यतावच्छेदकावच्छेदेनाप्राप्तिरिष्टोद्देश्यस्वरूपपर्याप्रा

सिरित्येतावता कश्चिद्विशेषो ऽस्ति विवक्षितरूपभेदेनात्यन्ताप्राप्तेरुभयत्राप्यविशिष्टत्वात् । न च केनापि रूपेण प्राप्त्यभाव एवात्यन्ताप्राप्तिः स्वर्गादिगतयागकार्यत्वादेरपि सामान्यतो दृष्टानुमानात्प्राप्तिसम्भवेन तत्रापूर्वविध्यभावापत्तेः । ततश्च यथापूर्वीयोद्देशेनावघातविधाने ऽपि व्रीहिष्ववघातानुष्ठानमेव विधेः फलं तत्तु पक्षे प्राप्यत इतिनियमविधिराश्रितः । एवमिह ऋग्वेदादिविधेयकर्मोद्देशेन स्वरविशेषविधाने ऽपि तदङ्गमन्त्रेषु स्वरविशेषानुष्ठानमेव विधेः फलं तत् पक्षे प्राप्यत इति नियमविधिरेवाश्रयितुं युक्तः । अनेनैव न्यायेन पूर्वोदाहृतविध्योरपि नियमपरिसंख्यात्वमुपपादनीयम् ननु गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग इत्यधिकरणे भाष्यकारेण याजुर्वैदिकस्याधानस्य सामवेदे वारवन्तीयमङ्गं विहितं तत्र वारवन्तीयस्य किं स्वविधिनिबन्धनं सामवैदिकमुच्चैस्त्वं कार्यमुत प्रधानविधिनिबन्धनं याजुर्वैदिकमुपांशुत्वमिति सन्देहे प्रधानविधिनिबन्धनस्य स्वरस्य प्रधानैकवाक्यतापेक्षित्वेन विलम्बितत्वात्तदनपेक्षतया शीघ्रं प्रतीयमानमुच्चैस्त्वं कार्यमिति प्राप्य राद्धान्तितम् विलम्बितप्रतीतिकमप्युपांशुत्वं प्रधानधर्मत्वाद्बलीयः प्रधाने साक्षान्निवेशमलभमानतयाङ्गावतीर्णमपि हि तत्प्रधानस्यैव धर्मः अतो ऽङ्गधर्मे उच्चैस्त्वं बाधित्वा प्रधानधर्मे उपांशुत्वं कार्यमन्यथा प्रधानवैगुण्यापत्तेरिति । एवं च प्रधानकर्मोद्देशेन स्वरविशेषविधानानां न केवलं तदङ्गमन्त्रेष्वनियतस्वरप्राप्तिमत्सु प्रधानस्वरनियममात्रं फलं किं तु नियतस्वविधिनिबन्धनस्वरप्राप्ति-

मस्तु वारवन्तीयादिषु तद्यावर्त्तनेनाप्राप्तप्रधानस्वरप्रापणमपि फलम् । अतश्चापूर्वविधित्वं युक्तमिति चेत् । अस्तु नामैवं तथापि अनियतस्वरप्राप्तिमन्मन्त्रांशे नियमविधित्वमपि वक्तव्यं विनिगमनाविरहादित्यतिव्याप्तिरनिवार्यैव । न ह्यवहनने नियमविधिरेव न परिसंख्येत्यत्रावहनननियमस्य विदलनादिनिवृत्तिं प्रत्युपजीव्यत्वमिव रशनादानमन्त्रविधिः परिसंख्यैव न नियमविधिरित्यत्र गर्दभरशनानिवृत्तेरनन्यलभ्यत्वमिव चेह विधिरेव न नियम इत्यत्र किं चिद्विनिगमकमस्ति इह तयोरुपजीव्योपजीवकभावाभावात् द्वयोरप्यनन्यलभ्यत्वाच्च । न चैकस्यैव विषयभेदेन विधिनियमरूपत्वे कश्चिद्दोषः विधित्रैरूप्याभावेन पूर्वश्लोकोदाहृतसार्वकाम्यादिवाक्यानां विध्यनुवादरूपत्ववदेतेषां विधिनियमरूपत्वस्याप्युपपत्तेः । अत एव मागाश्रयविषयभेदेन विधिनियमपरिसंख्यानां संकरो दर्शितः ॥ स्यादेतन्माभूत्सर्वपूर्द्देश्येष्वनुवृत्तिरूपा वा सर्वात्मना क्वचिदप्युद्देश्ये ऽनुवृत्तिरूपा वा सर्वोद्देश्यानुवृत्तिरात्यन्तिकत्वं किं तु त्रैकालिकत्वं त्रिकालायामप्राप्तौ विधिरिति प्रसिद्धेरिति चेदेव सति अपवादापवादविधिर्न स्यात् । तस्य प्राप्तापोदितपुनः प्राप्त्यर्थत्वात् । तथा हि कृष्णलचरौ श्रपणं श्रूयते इते श्रपयतीति । नेदमपूर्वश्रपणं विधीयते किं तु दार्शपूर्णामासिकश्रपणं विक्लित्तिरूपप्रयोजनाभावान्निवर्त्तमानं प्रतिप्रसूयते अतः प्राकृताः श्रपणधर्माः कर्त्तव्या इति स्थापितं दशमे । ननु तत्र प्रतिप्रसवरूपस्य श्रपणविधेरपूर्वविधित्वं नास्तीत्यङ्गीकृतं टुप्टीकायां तत्र ह्युक्तं त-

सात्याकान्तरं नैतदपूर्वविधिदोषता प्राप्तिप्रसवमात्रं तु लाघवाद्विहितं वरमिति । सत्यमुक्तं तस्य अपणान्तरं न विधेयमत्यन्तमबुद्धिस्थस्य विधौ तस्य बुद्ध्यारोहणक-ल्पनागौरवात् । किं तु चोदकानीततया स्वत एव बु-द्ध्यारूढमर्थाभावान्निवर्त्तमानं प्राकृतमेव अपणं विधेय-मित्यत्र तात्पर्यं न तु न प्रतिप्रसवविधिरपूर्वविधिरित्यत्र तात्पर्यं तदभावे अपणस्यापोदितस्य प्राप्त्यसम्भवेन त-स्यापूर्वविध्यन्तर्भावौचित्यात् । अन्यथा नियमपरिसं-ख्यानन्तर्भूतस्य विध्यन्तरत्वापत्त्या विधित्रैविध्यभङ्गप्रस-ङ्गात् । एवं पूषा प्रपिष्टभाग इति पौष्णचरौ चोदकतः प्राप्तस्य प्राकृतस्य पेषणस्य प्रयोजनाभावान्निवर्त्तमा-नस्य विधिरपि प्रतिप्रसवविधिः । एतादृशाप्राप्तस्या-पवादे प्रसक्ते तदपवादार्थो विधयः एतेषु प्राक्प्राप्ति सत्त्वात् त्रैकालिकाप्राप्तिर्नास्तीत्यव्याप्तिः। किं चित्पुनः प्रसक्तप्राप्तिकस्य प्रागेवापवादे प्रसक्ते सन्ति विधयः अपबर्हिषः प्रयाजान्यजति अपबर्हिषो ऽनुयाजान्यज-तीत्यादयः । तथा हि अवभृथस्तावद्दृष्टमेधीयवदपूर्वः त-त्राप्सुमन्तावाज्यभागौ यजतीत्याज्यभागपुनःश्रवणेनाव-भृथप्रयोगविधेः क्लृप्तोपकारमोक्ताज्यभागनैराकाङ्क्ष-तया चोदकस्याकल्पनीयत्वात् । न च तदप्सुशब्दोपेत-स्याप्सु मे सोमो ऽब्रवीदित्यादियाज्यानुवाक्यामन्त्रद्वयस्य विधानार्थम् । लिङ्गक्रमाभ्यामेव मन्त्रप्राप्त्या तदनुवादेन तस्याज्यभागविधिपरत्वात् । एवं चाज्यभागविधिना चोदककल्पनाप्रतिबन्धेन ततः प्रसक्तायां प्रयाजादिप्राप्तौ निवारितायां बर्हिर्व्यतिरिक्तप्रयाजादिप्राप्त्यर्थमपबर्हि-

प इति श्रवणम् । एतादृशेषु नियमविध्यभावे ऽवहननं विदलनादीनामाक्षेपादिवापूर्वतापराज्यभागादिविध्यभावे प्रयाजादीनां चोदकात्प्राप्तिर्भवेदिति भविष्यत्प्राप्तिसत्त्वेन त्रैकालिकाप्राप्त्यभावादव्याप्तिः । एवमथातो ऽग्निमग्निष्टोमेनानुयजन्तीत्यादिविधिष्वव्याप्तिः दर्शितं हि नवमस्त्वलोकावतारिकायामथातो ऽग्निमित्यादिविधेरर्थवादापवादत्वम् । तस्मात्त्रैकालिकत्वमात्यन्तिकत्वमित्यपि न युक्तमिति भावः । ननु तर्ह्यपाक्षिकत्वमात्यन्तिकत्वमस्तु युज्यते च नियमविधिव्यावृत्त्यर्थस्य तस्य तथा निर्वचनम् । नियमः पाक्षिके सतीति नियमविधिलक्षणादित्याशङ्क्याह ।

युज्येतापाक्षिकत्वं तदिति यदि निरुच्येत तत्पाक्षिकत्वं प्राप्त्या किर्मीरितत्वम् कथिततदधिकाव्याप्तिदुष्टं न युक्तम् । त्यक्तावच्छेदभेदं तदति तु नियमातिप्रसक्त्या निरास्यं ततोपायान्तरं तद्विरह इति तयोर्ह्यस्त्यवच्छेदभेदः ॥ १४ ॥

युज्येत तथा निर्वचनं यदि तत्प्रतियोगिपाक्षिकत्वं निरुच्येत । प्राप्तिशबलत्वं पाक्षिकत्वमिति न युक्तं पूर्व-

श्लोकयोर्दर्शिताभिः सार्वकाम्यादिविधिषु बृहद्रथन्तरसामत्वविधौ वाज्योप्तिभिस्ततो ऽधिकाभिः प्रागुदाहृतेषूपदेशाभ्यां प्रकृतिविकृतिसाधारणेषु द्वादशाहिकगवामयनिकान्तुतयज्ञभागस्वरविधिषुव्याप्तिभिश्चाक्रान्तत्वात् स्यादेतत् अवच्छेदभेद विना प्राप्तिशबलत्वमप्राप्तेः पाक्षिकत्वं सार्वकाम्यादिविधिषु स्वर्गत्वाद्यवच्छेदेन प्राप्तिस्तदितरफलत्वावच्छेदेनाप्राप्तिरित्यवच्छेदभेदसत्त्वान्नाव्याप्तिरिति चेत् एवं तर्हि विशेषणफलं नियमविधिव्यावर्त्तनं न लभ्यते एकस्मिन्नपि व्रीह्यादिद्रव्ये ऽवहननादीनामुपायान्तरप्राप्त्यवच्छेदेन प्राप्तिः तद्विरहावच्छेदेनाप्राप्तिरिति प्राप्त्यप्राप्त्योरवच्छेदभेदसत्त्वादित्यर्थः । ननु तर्ह्यवच्छेदभेदे उपायान्तरप्राप्तितद्विरहभिन्नत्वं विशेषणं निवेश्यते तथा चोपायान्तरप्राप्तितद्विरहभिन्नावच्छेदभेदं विना प्राप्तिशबलत्वं पाक्षिकत्वमिति पर्यवसानादपाक्षिकत्वविशेषणेनावहननादिनियमविधिव्यावृत्तिलाभः तत्र निरुक्तपाक्षिकत्वसत्त्वात् सार्वकाम्यादिविध्यनुगमश्च तत्रोपायान्तरप्राप्तितद्विरहभिन्नस्वर्गत्वतदितरफलत्वाद्यवच्छेदभेदेनैव प्राप्त्यप्राप्त्योः कल्पिततया निरुक्तपाक्षिकत्वाभावमत्त्वादतो नात्र कश्चिद्द् दोष इत्याशङ्क्याह ।

तद्भिन्नत्वं निवेश्यं यदि खलु
तदवच्छेदभेदे ततो न व्यावृत्तिः
कार्य्यषोडश्यनुगमनबृहत्संश्रि-

ताया नियत्याः ॥ स्थाने वैकल्पिकोक्तिः क्रियतइति मतं यद्यपापान्तराणाम् तद्वाच्यं पाक्षिकत्वव्यतिकररहितं किन्तु वैकल्पिकत्वम् ॥ १५ ॥

एवं विवक्षया उपायविषयनियमविधिव्यावृत्तिलाभे ऽपि कार्यादिविषयतद्व्यावृत्तिर्न लभ्यते । तथा हि । यद्योन्यां तदुत्तरयोर्गायतीति विधिर्योनिसमच्छन्दस्कयोरुत्तरयोर्नियमार्थ इत्युपपादितं नवमश्लोकावतारिकायाम् । अयं च कार्यनियम एव । ऋचोः सामसंस्कार्ययोः तत्कार्यत्वात् । ततश्चोपायान्तरप्राप्तितद्विरह‑भिन्नकार्यान्तरप्राप्तितद्विरहरूपावच्छेदभेदेनैव प्राप्तिमत्त्वमिति विशेषणाभावप्रयुक्तविशिष्टाभावरूपापाक्षिकत्वसत्त्वात्तेन विशेषणेनास्य व्यावृत्तिर्न लभ्यतइति तत्रातिव्याप्तिः स्यात् । तथा प्रकृत्यतिरात्रे विकल्पितस्य षोडशिग्रहस्योत्तरे ऽहन्यतिरात्रस्य गृह्यत इति विकृतिविशेषे नियमो ऽप्युपायद्वयप्राप्तौ नियमो न भवति । षोडशिग्रहाभावे ऽपि क्रतोरवैगुण्ये षोडशिग्रहोपदेशो निरर्थकः स्यादिति तत्सार्थकत्वाय षोडशिग्रहसाध्यतया कल्पनीये फलभूम्नि तदभावस्योपायान्तरत्वाभावात् अतस्तत्रापि पूर्ववदतिव्याप्तिः स्यात् । ऋतावुपेयादिति ऋत्वनुगमननियमे कदाचिदृतावनिच्छया अनुपगमन-

मपि प्राप्नुयादिति तदर्थं प्रवृत्ते ऽनुपगमनस्योपगमन-
साध्यं पुत्रोत्पादनं प्रत्युपायान्तरत्वाभावादतिव्याप्तिः स्य-
ष्टैव। तथा ज्योतिष्टोमे "बृहत्पृष्ठं भवति" "रथन्तरं पृष्ठं
भवती" ति बृहद्रथन्तरसाधनके पृष्ठाख्ये द्वे स्तोत्रे विहिते
तयोः स्तुतशस्त्राधिकरणन्यायेनादृष्टार्थतया प्रयाजानु-
याजवद्भिन्नकार्ययोरपि वचनबलाद्विकल्पो न तु व्रीहिय-
वादिवदेककार्यत्वात्। अत एव व्रीहिधर्माणामवघा-
तादीनां यवेष्विव बृहद्धर्माणां बृहति प्रस्तूयमाने समुद्रं
मनसा ध्यायेदित्यादिना विहितानां रथन्तरे वा रथ-
न्तरधर्माणां रथन्तरे प्रस्तूयमाने नेवे संमीलयेदित्या-
दिना विहितानां बृहति वा न सङ्करः। तदेतदेकार्थ-
त्वादविभागः स्यादिति च नावमिकाधिकरणे प्रपञ्चेन
व्यवस्थापितम्। ज्योतिष्टोमविकृतिषु चोपहव्यादिषु बृ-
हत्पृष्ठनियमः श्रूयते तत्रापि तत्कार्यमदृष्टं प्रति रथन्तर-
पृष्ठस्योपायान्तरत्वाभावादतिव्याप्तिः। स्यादेतत् उपाया-
न्तरस्थाने वैकल्पिकविशेषणं निवेशयिष्यामः। तथा च
वैकल्पिकप्राप्तितद्विरहभिन्नावच्छेदभेदं विना प्राप्तिप्रब-
लत्वं पाक्षिकत्वमिति पर्यवसानादुदाहृतनियमविधिषु
चाप्राप्तेरुक्तरूपपाक्षिकत्वबत्त्वान्नातिव्याप्तिरिति चेत्। एवं
हि वैकल्पिकत्वं पाक्षिकत्वानुप्रवेशरहितं निर्वक्तव्यम्।
अन्यथात्माश्रयादिदोषापत्तेः तत्तु न सम्भवति विधि-
त्सितेन सह पाक्षिकत्वं विधित्सितस्य पाक्षिकत्वापाद-
कत्वमित्यादिरूपेणैव तस्य निर्वक्तव्यत्वादितिभावः। स्या-
देतत्। अवच्छेदभेदं विनेतिस्थाने आश्रयभेदं विनेति
करिष्यामः। ततश्च नियम्याप्राप्तेरेकस्मिन्नाश्रये प्राप्ति-

करम्बितत्तया पाक्षिकत्वान्न नियमविधिष्वतिव्याप्तिः । नापि सार्वकाम्यादिविधिष्वव्याप्तिः, तेषु सर्वेष्वपि स्वर्गाद्याश्रयव्यक्तिभेदेनैव प्राप्त्यप्राप्त्योः करम्बितत्वादित्याशङ्क्याह ।

यद्युच्येतान्तरेण त्वधिकरणभिदा प्राप्तिसंमेलनं तत् तच्चापि प्राप्तु पक्षेष्वपि समुदयते तावदव्याप्तिरेका कार्त्स्न्येनैवोपहव्यप्रभृतिभृतिहविःशेषयोर्ब्राह्मणोक्तौ पूतीकाधारमन्त्रान्तरसुखनियमातिप्रसक्तिस्तथा स्यात् ॥ १६ ॥

इत्थं विवक्षायामव्याप्तिरेको दोषः स्यात्, अतिव्याप्तिरपरो दोषस्तथा हि उपहव्यनामकक्रतावश्वः श्यावो दक्षिणेति दक्षिणां विधाय श्रूयते "स ब्रह्मणे देय" इति तथा षट्तपेयस्य क्रतोरौदुम्बरः सोमचमसो दक्षिणेति दक्षिणां विधाय श्रूयते "स प्रियाय सगोत्राय ब्रह्मणे देय" इति अत्र क्रतुदक्षिणात्वेन विहितयोरश्वचमसयोर्ब्रह्मणः संबन्धः प्राप्त एव किं त्वन्येषामप्यृत्विजां तयोः संबन्धः प्राप्त इति तदंशे ब्रह्मसंबन्धाप्राप्तेः कार्त्स्न्येन प्र-

ह्मसंबन्धप्रार्थमिदं वचनद्वयं तेनार्थात्त्विगन्तरेभ्यस्त-
योरपनीतत्वात्तेषामानतिविनैव स्तुतिं सामाद्युपायैः क-
रणीया तदितस्त्र्वै धेनुवच्चाश्वदक्षिणेति तथा सोमचमस
इति च दाशमिकाधिकरणयोर्निरूपितम्। एवं चैकस्या-
मेवाश्वव्यक्तौ चमसव्यक्तौ च ब्रह्मणः प्राप्त्यप्राप्त्योर्मेल-
नात्तद्विध्योरव्याप्तिः। तथा"प्राजापत्यं घृते निर्वपेच्चरुं श-
तकृष्णलमायुष्कामः"इति इष्टिं विशिष्य विधाय तत्संनि-
धावाम्नायते"तत्सर्वं ब्रह्मणे परिहरती"ति अत्र हविःशे-
षस्य सर्वेभ्य ऋत्विग्भ्यो भक्षणाय परिहरणीयत्वे प्राप्ते।
कात्स्न्येन ब्रह्मसंबन्धार्थमिदम् अतो ऽत्राप्येकस्यामेव ह-
विःशेषव्यक्तौ ब्रह्मणः प्राप्त्यप्राप्त्योर्मिलितत्वादव्याप्तिः।
नन्विडाप्राशित्रं चतुर्धाकरणं चेति त्रिविधमपि हविः
शेषं ब्रह्मणे परिहरणीयं तच्च सर्वं युगपदेव प-
रिहरणीयम् एकधा ब्रह्मणउपहरतीतिवचनात् यु-
गपदुपहृतमपि तत्सर्वं चोदकप्राप्ततत्तद्भक्षणकालाबाधेन
यथाकालमेव भक्षणीयमिति निर्णीतं दशमे कृष्णलपे-
टिकायाम्। ततश्च प्राशित्रे कात्स्न्येन ब्रह्मसंबन्धस्य प्रा-
प्तत्वात् कथं तत्र विधानमिति चेत् माभूदिडायां, चतु-
र्धाकरणार्थे च विधानमुपपद्यतएव। तथा च परिह-
रणीयस्य सर्वस्य कात्स्न्येन ब्रह्मसंबन्धविधिः सार्वत्रिक्य
विधिः स्वर्गइव प्राशित्रे ऽनुवादो भविष्यति तथाप्यव्या-
प्तिविषयत्वायोर्द्वयोः सुहृढेव एकैकस्यामेवेडाख्यहविःशे-
षव्यक्तौ चतुर्धाकरणार्थहविःशेषव्यक्तौ च प्राप्त्यप्राप्त्यो-
र्मिलितत्वात्। एवं सत्यव्याप्तिः समर्थिता ... ...
सु पूतीकादिनियमविधिषु। कथं "यदि सोमं न [illegible]

24100

न्देत पूतीकानभिषुणुयादि"ति श्रूयते। अयं सोमालाभे सत्यभावविधिरूपः पूतीकानां यागसाधनत्वविषयको ऽपूर्वविधिर्न भवति किं तु श्रुतिप्रमाणत्वाच्छिष्टाभावेनागमो ऽन्यस्याशिष्टत्वादित्यधिकरणोक्तन्यायेन नित्यस्य मारब्धकाम्यस्य च सोमयागस्य सोमाभावे ऽपि यथाशक्त्यवश्यानुष्ठेयतया कर्मचोदनाचिह्ने यस्मिन् कस्मिंश्चित् द्रव्ये ऽवश्यमुपादेये तत्रापि सामान्यं तच्चिकीर्षा हीत्यधिकरणोक्तन्यायेन सोमविधानस्यापि किं चिदनुग्रहसिद्धये कतिपयसोमावयवानुप्रवेशवति सोमसदृशद्रव्य एवोपादेये बहुषु च सोमसदृशद्रव्येषु सत्सु नियमविधिरयं यः सोमलताया अभावे सोमजातिपरिच्छिन्नाम् सकलावयवानुपादातुमशक्तस्तत्सदृशेषु स्थितान्विकलानवयवानुपादातुमिच्छति स पूतीकगतानेवोपाददीतेति। एवं नियमविधिरिति निर्णीतम्। नियमार्थो पुनः श्रुतिरिति तृतीयाध्यायाधिकरणे वचनाच्च न्याय्यं भवेदिति षष्ठाध्यायाधिकरणे च। अयं च सोमलतया सुसदृशानामन्येषां सत्त्वात्तेषामेव बह्ववयवानुग्रहानुरोधेन प्रतिनिधितया प्राप्तेरीषत्सोमसदृशानां पूतीकानां तत्प्रतिकोटितया पाक्षिकप्राप्तिरहितानामेव विधिः। अत एवोक्तं शास्त्रदीपिकायाम्। मुख्याभावे प्रतिनिधेः प्राप्तिः तस्यां चावस्थायां यावन्न्यायेन सुसदृशं नियन्तुमुपक्रम्यते तावत् वचनेन मन्दसदृशाः पूतीका नियम्यन्ते अतः प्रतिनिधिनियमो ऽयमिति। एवं पूतीकानामप्राप्तेः प्राप्तिकल्पितत्वाभावादतिव्याप्तिः। तथा वायव्यपशौ श्रूयते"हिरण्यगर्भः समवर्त्तताग्र"इत्याघारमाघार-

यतीति। अयं प्राजापत्ये पूर्वाघारे मन्त्रविधिर्न भवति किं त्वैन्द्रउत्तराघार इति निर्णीतं दशमे, हिरण्यगर्भे पूर्वस्य मन्त्रलिङ्गात्। उत्तरस्य वा मन्त्रार्थवत्त्वात् इति पूर्वोक्त-रपक्षसूत्राभ्याम्। तत्रायं सिद्धान्तन्याय उक्तः मन्त्रविधौ मन्त्रान्तरं नियमादृष्टमपेक्षणीयम् अन्यथा ब्राह्मणकल्प-सूत्रोपदृष्टवचनादिभिरप्यनुष्ठेयार्थस्मरणसंभवेन मन्त्र-नियमवैयर्थ्यात्। तच्च नियमादृष्टं प्रकृतौ पूर्वाघारे न क्लृप्तं तत्र तस्यामन्त्रकत्वात् इति पूर्वाघारे मन्त्रविधि-पक्षे त्वैव तत्कल्पनीयमुत्तराघारे तु तत्क्लृप्तं तस्य प्र-कृतावपि समन्त्रकत्वात्। अतः क्लृप्ते नियमादृष्टे मन्त्र-विशेषमात्रविधान लघित्युत्तराघारएव मन्त्रविधिर्युक्त इति। उक्तं च टुप्टीकायाम्। मन्त्रनियमादवश्यमदृष्टं कल्पनीयं पूर्वाघारे। तच्च क्लृप्तमुत्तराघारे तस्मिन्नति कल्पयितुं न शक्यत इति। एवं चात्र नियमविधित्वना-ङ्गीकृते आघारमन्त्रान्तरविधौ चोदकादिन्द्र ऊर्ध्वो ऽध्वर इति प्राकृतमन्त्रस्यैव प्राप्तिरस्ति न विधेयमन्त्रस्येत्यत्रा-प्तितिव्याप्तिः। न च विकृतौ मन्त्रान्तरविधानसमये प्रा-प्त्यभावे ऽपि प्रकृताविन्द्र ऊर्ध्वो ऽध्वर इति मन्त्रविधान-समये सर्वेषामुपायान्तराणां पक्षे प्राप्तिरस्ति सैवार्थतो विकृतावपि प्राप्तिरिति वाच्यम्। तदानीमपि ब्राह्मण-कल्पसूत्रादीनामिन्द्रप्रकाशकमन्त्रान्तराणां च पक्षे प्रा-प्तावपि प्रजापतिलिङ्गकस्यास्य मन्त्रस्य प्राप्त्यभावात्। न च लिङ्गमिन्द्रे ऽप्यविशिष्टमिति भाष्ये समर्थितमिति वाच्यम्। तत्र हि विहितविनियोगनिर्वाहायैन्द्रे ऽपि कथं चिन्मन्त्रं योजयितुं तस्मिन्नपि रूढेः प्रागेकत्वेनायनांस्य

मन्त्रान्तरे वर्णितमस्तीत्येतावदुदाहृतं न तु हिरण्यगर्भशब्दस्य तत्र स्वारसिकं लिङ्गं समर्थितम् । न वा तत्समर्थनं शक्यम् । तस्य प्रजापतावेव रूढत्वात् । प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वायेति वाक्यशेषाच्च । हिरण्यगर्भे पूर्वस्य मन्त्रलिङ्गादितिसूत्रकृतापि प्रजापतावेव लिङ्गसद्भावस्योक्तत्वाच्च । एवमन्येष्वप्येतादृशेषु नियमविधिष्वतिव्याप्तिरूहनीया । इयं चाव्याप्तिरतिव्याप्तिश्च प्राचीनेष्वप्यात्यन्तिकत्वनिर्वचनपक्षेषु समाना तस्मादप्राप्त्यात्यन्तिकत्वयोरनिर्वचनादयुक्तमपूर्वविधिलक्षणम् ॥

इति श्रीमदद्वैतविद्याचार्यश्रीमद्वरदराजकुलजलधिकौस्तुभश्रीमद्विश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पदीक्षितस्य कृतौ विधिरसायने सुखोपयोजनायामपूर्वविधिलक्षणाक्षेपः समाप्तः ॥



अथ नियमविधिलक्षणमाक्षिपति ।

हेतुः कुत्रापि कार्यं क्वचन तदुभयं कुत्र चिद्विध्युपात्तम् । विध्यस्पृष्टं नियम्य क्वचिदुभयविधं पाक्षिकत्वेन दृष्टम् ॥ तस्यैव प्रत्यनीकं क्वचिदपि कुहचित्पाक्षिकं नैव दृष्टम् नानारूपं तदित्थं नियमविधिगतं दुर्ग्रहं लक्षणेन ॥ १७ ॥

नानाप्रकारस्तावन्नियमविधिर्दृश्यते स सर्वोऽपि नियमः पाक्षिके सतीत्यनेन लक्षणेन संग्रहीतुं न शक्यः । तथा हि । क्वचिदेकस्मिन्कार्येऽनियतानेकोपायप्राप्तावेकोपायनियमः यथा व्रीहीनवहन्तीति । क्वचिदेकस्योपायस्यानियतानेककार्यप्राप्तावेककार्यनियमो । यथा "यद्योन्यां तदुत्तरयोर्गायती"ति । इदं नवमश्लोकाधतारिकायामुपपादितम् । क्वचिदुभयनियमः यथा यज्ञुह्वां गृह्णाति प्रयाजेभ्यस्तदिति । इदमपि तत्रैवोपपादितम् । ननु तत्रोक्तया रीत्या यद्योन्यामित्यत्राप्युभयनियमो लभ्यते तथा च कथं कार्यमात्रनियमे तदुदाहरणं यथा हि स्तोत्राङ्गत्वेनावगतस्य साम्नसृचगाननिर्वाहाय तत्सं-

*स्कार्यत्वेनानियतानेकद्रव्यप्राप्तावुत्तरयोर्नियमस्तथा स्तोत्राङ्गत्वेनावगतयोरुत्तरयोरृचोः संस्कारकत्वेनानियतानेकसामप्राप्तौ योनिसाम्ना नियमः सम्भवति स्तोत्रस्य प्रगीतमन्त्रसाध्यस्तुतिरूपत्वेन सामापेक्षावश्यंभावात् विशिष्य सामापेक्षाभावे ऽपि सामसाधारण्याक्षरगभिव्यञ्जकापेक्षावश्यम्भावाच्चेति चेत् सत्यं, यत्र साम्न इव ऋचामपि स्तोत्राङ्गत्वं प्रकरणपाठादिनावगतं तत्र तथैव यत्र तु विकृतिविशेषे वामदेव्यादिपृष्ठविधौ साममात्रस्य स्तोत्राङ्गत्वावगतौ तत्प्रकरणपाठादिरहितापि तत्संस्कार्या योनिः प्रकृतौ बृहद्योनिवत् वैश्यस्तोमे कण्वरथन्तरयोनिवच्च साम्नः स्तोत्राङ्गत्वनिर्वाहाय स्वयमपि तदङ्गत्वमर्थादापद्यते । तत्र तत्र तदुत्तरयोः प्रागवगतं स्तोत्राङ्गत्वं नास्तीति तन्निर्वाहाय नियतसामप्राप्त्यभावान्न तत्र सामनियमः । किं तु साम्न एव स्तोत्रीयस्य त्वगाननिर्वाहाय संस्कार्यऋग्विशेषनियम इति केवलं कार्यनियम एव । अतो यद्योन्यां तदुत्तरयोर्गायतीति अत्र योनिविषमच्छन्दस्कयोरुत्तरयोरपूर्वविधिः । योनिसमच्छन्दस्कयोस्तु क्रमप्रकरणावगतविनियोगयोः कार्योपाश्रयनियमविधिः सामविनियोगाक्षिप्तविनियोगयोः कार्यमात्रनियमविधिरिति युक्तं कार्यनियमे ऽपि तदुदाहरणम् ॥ एवं वाजपेयदक्षिणात्वेन देयानां रथानां मध्ये इन्द्रस्य वज्रो ऽसि वार्त्रघ्न इत्यादि याजुर्वेदिकमन्त्रैः संस्कृतं रथमधिकृत्य प्रष्टिर्युर्युक्तं रथमध्वर्यवे ददातीति वाक्ये ।"यो वृष्टिकामो यो ऽन्नाद्यकामो यः स्वर्गकामः स सौभरेण स्तुवीते"ति फलार्थत्वेन विहितं ब्रह्म

सामस्तोत्राश्रयं सौभरमधिकृत्य प्रवृत्तेषु हीषिति वृष्टिकामाय निधनं कुर्यादूर्गित्यन्नाद्यकामाय ऊ इति स्वर्गकामायेति वाक्येषु चोभयनियमो द्रष्टव्यः। एषूदाहरणेषु समप्राधान्येनोभयनियतौ नियमलाभः। उपजीव्योपजीवकभावेनापि स सम्भवति। यथा याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेदित्यत्र याजनादिषु कृष्यादिषु च धनार्जनोपायेषु अनियमेन प्राप्तेषु ब्राह्मणस्य याजनादय एव तदुपाया नियम्यन्ते तेन ब्राह्मणानामेव याजनादयस्तदुपाया इत्यपि नियमो लभ्यते। एतद्विध्यभावे हि यज्ञदानाध्ययनविधिभिर्याजकाध्यापकप्रतिग्रहीतृमाकाङ्क्षैरार्त्विज्यादिसमर्था ये केचिद्यालकादय आक्षिप्येरन्। एतद्विधिसत्त्वे त्वसद्दीयो ऽयं धनार्जनोपाय इति याजनादिषु स्वत एव प्रवृत्तानां ब्राह्मणानां सत्त्वेन तत एव निराकाङ्क्षतया यत्किञ्चिदनियतयाजकाद्याक्षेपो नावतरतीति। एवं तावन्नियम्ये तत्प्रतिसंबन्धिनि च विधिवाक्येनोपात्ते क्वचिदुपायनियमः क्वचित्कार्यनियमः क्वचिदुभयनियम इति वैविध्यं दर्शितं नियम्ये तत्प्रतिसंबन्धिन्युभयस्मिन्नपि वा तदनुपात्ते ऽपि स दृश्यते तद्यथा पुरोडाशं प्रथयतीत्यत्रानुपात्ते कर्तरि नियम्ये नियमः। उच्चैर्ऋचा क्रियतइत्यत्रानुपात्ते नियम्यप्रतिसंबन्धिनि मन्त्रे नियमः व्रीहिभिर्यजेतेत्यत्र नियम्ये ऽवहनने तत्प्रतिसंबन्धिषु यवेषु चानुपात्तेषु नियमः। एवमुपात्तमनुपात्तमिति द्विविधमप्युदाहृतं नियम्यजातं पक्षप्राप्तिमदृष्टं क्वचिन्नियम्यस्य पक्षप्राप्त्यभावे ऽपि तत्प्रतिद्वन्द्विनां पक्षप्राप्तिमा-

वेण नियमो दृश्यते । यथा "यदि सोमं न विन्देत्पूतीकानभिषुणुयादि"ति अत्र हि सुसदृशानां बहूनामनियतप्राप्तौ मन्दसदृशानां पूतीकानामप्राप्तानामेव नियमः क्वचिन्नियमविधौ किमपि पक्षप्राप्तौ न दृश्यते यथा "हिरण्यगर्भः समवर्त्तताग्र" इत्याघारमाघारयतीति । तत्र नियमतश्चोदकादिन्द्रऊर्ध्वोध्वरइति मन्त्रप्राप्ताविन्द्रलिङ्गरहितत्वादत्यन्ताप्राप्तमेव तन्त्रान्तरमैन्द्राघारे नियम्यते । एतान्युदाहरणानि प्राक् तत्र तत्राविष्कृतानीति नेह प्रपञ्चितानि । एवं न्यायतौल्यादिषेत्वेतिशाखामाच्छिनत्ति उत्करे वाजिनमासादयति परिधौ पशुं नियुङ्क्तीतिविवाक्येष्वपि नियमविधिरङ्गीकरणीय इति तान्यपि पक्षप्राप्तिरहितोदाहरणानि । यथा खलु हिरण्यगर्भमन्त्रस्य प्रजापतिलिङ्गस्यैन्द्राघारे स्वयमप्राप्तस्यैव विनियोगानन्तरं तन्निर्वाहाय कथं चिदिन्द्रप्रकाशत्वस्य कल्पनीयत्वे ऽपि दृष्टार्थत्वान्नियमादृष्टकल्पनावश्यंभावाच्च नियमविधित्वमभ्युपगम्यते । तथेषेत्वेतिमन्त्रस्य शाखाच्छेदने तीक्ष्णाग्रस्योत्करस्य वाजिनासादने तनीयसः परिधेः पशुनियोजने च विनियोगानन्तरमेव तन्निर्वाहाय मन्त्रे छिनद्मीत्यध्याहारस्य उत्करे पृथ्वग्रत्वस्य परिधौ प्रथिम्नश्चापेक्षणीयत्वे ऽपि न्यायसाम्यान्नियमविधित्वमभ्युपगन्तव्यमेव इत्थं नानारूपा नियमविषयः कथमनेन संग्रहीतुं शक्याः । पाक्षिकत्वे सतीत्यस्य कार्योपायद्वयपाक्षिकत्वपरत्वे एकैकनियमाव्याप्तेः कार्यस्यैवोपायस्यैव वा पाक्षिकत्वपरत्वे तदन्यतरनियमाव्याप्तेः । कार्योपायद्वयमनुगमय्य विध्युपात्तस्य पाक्षिक-

त्वपरत्वे विध्यनुपपत्तिनियमाव्याप्तेः उपात्तमनुपात्तं वा नुगमय्य नियम्यस्य पाक्षिकत्वोक्तौ नियम्यप्रतिद्वन्द्विना-मेव पाक्षिकत्ववन्नियमविधावव्याप्तेः नियम्यस्यान्यस्य वा यस्य कस्य चित्पाक्षिकत्वपरत्वोक्तावपि पाक्षिकत्व-मात्ररक्षितेषु नियमविधिष्वव्याप्तेरित्यर्थः । श्लोके त-स्यैव प्रत्यनीकं क्व चिदपीत्यत्र पाक्षिकत्वेन दृष्टमित्यनु-षङ्गः ॥ १७ ॥ एवं लक्षणस्याव्याप्तिमुक्त्वाऽतिव्याप्तिमाह ।

तत्रातिव्याप्तमग्नेर्विकृतिजुषि विधौ मीलनस्यायताया नैमित्तिक्याश्च विध्योरखिलविधिषु च प्रापकावर्त्तकेषु ॥ अप्राप्तांशस्य पूर्तिः फलमपि यदि तत्राधिकं योजनीयं शेषांशव्यर्थता स्यादखिलफलकताविध्यतिव्यापनं च ॥ १८ ॥

यदि पाक्षिके सतीत्यत्र विधिविषयस्य पाक्षिकत्वं विवक्षितं तदा वैकृताग्निविधावतिव्याप्तिः तद्विषयस्या-ग्नेरुत्तरवेद्या विकल्पितस्य पाक्षिकत्वात् । यदि विध्यु-द्देश्यस्य तदा रथन्तरे प्रस्तूयमाने संमीलयेदितिविधा-वतिव्याप्तिः । तदुद्देश्यरथन्तरस्य ज्योतिष्टोमे पाक्षि-

कत्वात् । यदुभयोस्तदा "यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयादि"ति प्रागुदाहृतपरिसंख्यायामतिव्याप्तिः तत्रोद्देश्यरथन्तरसामत्वस्य तन्निमित्तकस्य विधेयस्यैन्द्रवायवाग्रत्वस्य च प्रकृतौ पाक्षिकत्वात् । यदि विधेयोद्देश्यसाधारण्येन विध्युपात्तस्य पाक्षिकत्वं विवक्षितं तदोदाहृतेषु त्रिष्वपि विधिष्वतिव्याप्तिः । यदि विध्युपात्ततदनुपात्तसाधारण्येन नियम्य पाक्षिकत्वं विवक्षितं तदा नियमविधिलक्षणे नियमप्रवेशे आत्माश्रयापत्तेः । यदि नियम्यशब्देन प्रकृतिविधिफलाश्रयमात्रं विवक्षणीयं तथा सति उदाहृते नैमित्तिकाग्रताविधावतिव्याप्तिः । तत्र विकृतिविशिष्टव्याप्तिफलाश्रयस्यैन्द्रवायवाग्रत्वस्य पाक्षिकत्वात् यदि नियम्यानियम्यसाधारण्येन यस्य कस्य चित्पाक्षिकत्वं विवक्षितं तदा सर्वेष्वप्यपूर्वविधिपरिसंख्याविधिषु अतिव्याप्तिः । स्यादेतत् यस्य कस्यचित्पाक्षिकत्वे सति तदप्राप्तांशपूरणफलो नियमविधिरित्यधिकं योज्यते । तथा सति न क्वाप्यतिव्याप्तिरिति चेत् । एवं तर्हि लक्षणे स्युतांशो व्यर्थः स्यात् । अप्राप्तांशपूरणफलो नियमविधिरित्येतावत एव विशिष्टलक्षणपूर्वत्वात्[1] । न चैवमेवास्त्विति वाच्यम् । "सर्वेभ्यो ज्योतिष्टोम" इतिसर्वफलकत्वविधावतिव्याप्तेः । प्रातिस्विकवाक्येन स्वर्गार्थत्वमाप्तस्य तदप्राप्तफलान्तराप्राप्तांशपूरणार्थत्वादित्यर्थः । स्यादेतत् । अप्राप्तांशपूरणफलको नियमविधिरितिलक्षणे अप्राप्तत्वं विरोध्याक्रमणप्रयुक्तं विवक्षितम् । अतो नो-

१ पूर्वत्वादिति २ पु० पा० ।

क्तातिव्याप्तिः । सार्वकाम्यविधौ स्वर्गांशः प्राप्तः तदन्यफलांशस्याप्राप्तेः प्रापकप्रमाणाभावप्रयुक्तत्वेन विरोध्याक्रमणप्रयुक्तत्वाभावात् । न चासम्भवः । नियमविध्युदाहरणे अवहननादिप्रापकलौकिकप्रमाणादिसत्त्वेऽपि तदप्राप्तेर्विदलनादिविरोध्याक्रमणप्रयुक्तत्वात् । यद्वा अनिर्द्धारितत्वम् अप्राप्तांशस्य विशेषणं क्रियते । तथा च सार्वकाम्यविधौ स्वर्गांशः प्राप्तः तदन्यफलांशस्तु अप्राप्त इति निर्द्धारणसद्भावात् नातिव्याप्तिः । नाप्यसम्भवः । व्रीह्यादिषु अवहननाद्यप्राप्तांशस्येदन्तया निर्द्धारणाभावात् इत्याशङ्क्याह ।

अप्राप्तत्वं विरोध्याक्रमणकृतमिह्याक्षेपतो यद्यथापि स्याद्दोषो ऽयं विप्रष्ठः षडह इतिविधावप्ययं निर्निरोधः ॥ अप्राप्तांशं विशेष्टुं क्रियतइतिमतं यद्यनिर्धारितत्वम् प्रयावाक्ष्वाश्वप्रभृतिविधिगणातिप्रसक्तिस्तथापि ॥ १९ ॥

प्रथमविवक्षाया कृतायामपि उद्भावितसार्वकाम्यविध्यतिव्याप्तिदोषस्तदवस्थ एव विश्वजिदधिकरणपूर्वपक्ष-

न्यायस्य स्वर्गान्यफलानामपि प्रापकप्रमाणस्य सत्त्वेन तदप्राप्तेस्तन्न्यायापवादकस्वर्गकामविधिप्राप्तितद्विरोध्याक्रमणाप्रयुक्तत्वात् । ननु अप्राप्तिकरस्खलितविरोध्याक्रमणप्रयुक्तत्वं विवक्षितम् । अस्ति च व्रीह्यादिषु अवहननाद्यप्राप्ताबाधेपक्षताप्राप्तिकरस्खलितप्राप्तिकविदलनादिरूपविरोध्याक्रमणप्रयुक्तत्वम् । एवं च न सार्वकामप्रविधावतिव्याप्तिस्तदभावे स्वर्गान्यफलाप्राप्तेः स्वर्गकामवाक्यकृतनियतप्राप्तिकस्वर्गरूपविरोध्याक्रमणाप्रयुक्तत्वादिति चेत् एवमपि पृष्ठ्यः षडहो बृहद्रथन्तरसामा कार्य इति षष्ठषडहोद्देशेन बृहद्रथन्तरपृष्ठविधावतिव्याप्तिरनिवार्या । षडहांशेषु तृतीयादिष्वहस्सु बृहद्रथन्तराप्राप्तेरप्राप्तिकरस्खलितप्राप्तिकवैरूपवैराजादिरूपं विरो[illegible]क्रमणप्रयुक्तत्वात् द्वितीयविवक्षायां यद्यपि नोक्तातिव्याप्तिः बृहद्रथन्तराद्यप्राप्तांशस्तृतीयसुत्यादिरूप इति निर्धारणासम्भवात् । तथाप्यत्र: अथावो दक्षिणोपपद्यदक्षिणां विधाय श्रावितें"स ब्रह्मणे देय"इति विधौ औदुम्बरश्मसो दक्षिणेति दक्षिणां विधाय ऋतपेये श्रावितेस प्रियाय सगोत्राय ब्रह्मणे देय इति विधौ आयुःकामेष्टिप्रकरणश्रुते सर्वं ब्रह्मणे परिहरतीति विधौ चातिव्याप्तिः, सर्वर्त्विक्साधारणेत्वप्रवसोमचमसहविःशेषित्वयं ब्रह्मणोंऽश: अयमन्येषामिति निर्धारणासम्भवात् । तस्मादव्याप्त्यतिव्याप्तिग्रस्तत्वान्नियमविधिलक्षणमपि न युक्तमिति भावः ॥

इति नियमविधिलक्षणाक्षेपः॥१८॥

परिसंख्यालक्षणमाक्षिपति ।

तत्रान्यत्रेति[1] राशिद्वितयमभिहितं लक्षणे पारिसंख्ये पश्यामस्तत्र लक्ष्योपगतमनुगतं भिन्नधर्मोपगूढम् ॥ पाठप्राप्ताग्रताविध्यनुगतिरहितं विध्युपात्तानुपात्तं ग्राह्यं व्यावर्त्तनीयं तदपि च न भजत्यावपन्तीति लक्ष्यम् ॥ २० ॥

तत्र चान्यत्र च प्राप्ते इतिपरिसंख्यालक्षणमित्थं पक्षेषु योज्यते। "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते" इति लक्ष्ये तत्राश्वरशनाग्रहणे गर्द्दभरशनाग्रहणे च शेषिण्येकस्मिन्मन्त्ररूपे शेषे मन्त्रलिङ्गाविशेषात्प्राप्ते सति गर्द्दभरशनाग्रहणरूपशेष्यन्तरपरिसंख्या॥ "दण्डी प्रैषानन्वाहे"ति लक्ष्ये तत्र प्रैषानुवचने अन्यत्र रात्रिप्रचारादिके च स्थित्वोच्चैरनवानकरणाय तमोवगाहनादिसौकर्याय च किं चिदवलम्बनापेक्षे मैत्रावरुणकार्ये शेषिणि मैत्रावरुणगृहीतदीक्षितदण्डरूपे एकस्मिन् शेषे प्राप्ते रात्रिप्रचारादिशेष्यन्तरपरिस-

१ तत्रान्यत्रेति द० १ पु पा२ ।

ख्या। "शंखन्ता प्रायणीया सन्तिष्ठते"इतिलक्ष्ये प्रायणीयायामेतस्यां शेषिण्यां शंखन्ताङ्गकलापद्वये तदुपरितनाङ्गकलापद्वये च शेषे प्राप्ते तदुपरितनाङ्गकलापद्वयशेषान्तरपरिसंख्या। एवं"मिडान्तातिथ्या सन्तिष्ठत"इत्यादावपीति। एवं चाश्वरशनाग्रहणशेषानुवचनशंखिडान्ताङ्गकलापादिकमेकराशिं गर्दभरशनाग्रहणप्रावित्रचारशंखिडोपरितराङ्गकलापादिकमपरं च राशिं कृत्वा तद्राशिद्वयं लक्षणगताभ्यां तदन्यशब्दाभ्यामभिधातव्यं समभिव्याहृतपरस्यापि सर्वनाम्नस्तेन रक्तं रागात् तद्वति तत्प्रकारकं ज्ञानं प्रमेत्यादाविव किञ्चिद्रूपक्रोडीकृतराश्यन्तर्गतपरत्वावश्यंभावात्। अन्यथा तस्य तत्तत्र व्यवस्थितार्थबोधकत्वनियमानुपपत्तेः। तत्तु राशिद्वयं लक्ष्यप्राप्तं सर्वलक्ष्यानुगतं परस्परव्यावृत्तधर्मावच्छिन्नं न पश्यामः। यथोच्येत विध्युपात्तमश्वरशनादितच्छब्देनाभिधीयते तदनुपात्तं गर्दभरशनाद्यन्यशब्देनेति नैतद्युक्तम्। "यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयादि"ति परिसंख्यायामव्याप्तिप्रसङ्गात्। रथन्तरसामरथन्तरसामसु ज्योतिष्टोमविकृतिषु चोदकादैन्द्रवायवाग्रतायां शेषतया प्रसक्तायां अरथन्तरसाम्नां परिसंख्यार्थं ज्योतिष्टोमे पाठप्राप्तायास्तस्या नैमित्तिकत्वकरणमिति हि प्रागुक्तम्। एवं"दीक्षाः सोमस्य दक्षिणाः"सोमस्येत्यादिपरिसंख्यास्वप्यव्याप्तिर्द्रष्टव्या। ननु माभूद्विध्युपात्तं तदनुपात्तमिति राशिद्वयं ग्राह्यं व्यावर्त्तनीयमिति रा-

१ जय पा० २ पु० ना०।

शिष्टयं तदन्यशब्दाभिधेयं भविष्यति । तदपि न युक्तम् । "वीणि ह वै यज्ञस्योदराणि गायत्रीबृहत्यनुष्टुप् च अत्र ह्येवावपन्त्यत एवोद्वपन्तीति परिसंख्यायामव्याप्तिप्रसङ्गात् । अत्र हि विवृद्धस्तोमक्रतुगतेषु सर्वेष्वपि स्तोत्रेषु स्तोमविवृद्ध्यर्थं प्राकृतेभ्यो ऽधिकावापि प्राप्ते ऽत्र ह्येवावपन्तीत्यनेन पवमानगतगायत्र्यादिभ्यो ऽन्यत्सर्वं परिसंख्यायतइति प्रागुक्तम् । अत्र परिसंख्यायामावापस्य व्यावर्त्तनीयेषु स्तोत्रान्तरेष्वेव प्राप्तिरस्ति न तु ग्राह्येषु पवमानगतगायत्र्यादिषु । यद्यपि स्तोत्रान्तरेष्विव पवमानेष्वपि स्तोमविवृद्ध्यर्थमावापप्राप्तिरस्ति तथापि न सामान्तराणामावापप्राप्तिः । किं तु सामसहितानामृगन्तराणामेव . स्तोत्रीयक्रगतसंख्याधिक्यरूपस्तोमविवृद्धेः ऋगन्तरावाप एवातिसामञ्जस्यात् । येषु तु विवृद्धस्तोमकेषु क्रतुषु प्रत्यक्षविहितानि सामानि सन्ति तेष्वपि तानि कवरथन्तरन्यायेन स्वयोनौ स्वयोन्युत्तरयोश्च गेयानि प्राप्नुवन्ति न प्राकृतीषु ऋक्षु उत्तराग्रन्थे तत्तद्योनिः तत्तदुत्तरयोश्च पाठस्य क्रत्वर्थतया ताभिरतिदेशप्राप्तप्राकृतऋग्बाधात् । अतस्तेष्वपि तत्तत्सामसहितानामृगन्तराणामेव प्राप्तिः । एवं च गायत्र्यादिषु प्राप्तिर्न्न शक्यशङ्का ऋचामृगन्तरेष्वावापसम्भवात् । येषां प्रत्यक्षविहितानां वैकृतसाम्नामुत्तराग्रन्थे योनिर्न पठिता अत एव तदुत्तरे अपि न स्तसेषामावापस्य प्राकृतस्वेव प्राप्तावपि न गायत्र्यादिषु प्राप्तिः । किं त्वन्त्यत्र्च एव आगन्तूनामन्ते निवेश इतिन्यायश्चान्ते तु बादरायण इति पञ्चमे दर्शितत्वात् । ततश्चात्र ह्येवावप-

न्ति इति वाक्येनैवकारश्रुतिबलात्पवमानगतगायत्र्यादिभ्योऽन्यत्र सर्वत्राप्यावापं परिसङ्ख्यानेन स्तोत्रान्तरवर्तिषु पवमानगतानां सत्र्चानां च निवृत्तौ सत्यामर्थादावापः पवमानगतगायत्र्यादिष्वेव व्यवतिष्ठते, स च गायत्र्याद्याधारत्वसामर्थ्यात् साम्नामेव नर्चामित्यपि व्यवतिष्ठते । न च गायत्र्यादिभ्यो ऽन्यत्रावापपरिसंख्याने ऽपि गायत्र्यादिषु आवापाविधाने तास्वावापो न प्राप्नोति स्तोत्रान्तरेष्विवावश्यकेनाभ्यासेन संख्यापूरणसम्भवात् । ततश्च गायत्र्यादिष्वावापमिच्छता तद्विधानार्थमेवेदं वाक्यं न तु स्तोत्रान्तरपरिसंख्यार्थमित्यङ्गीकरणीयम् । एकस्य वाक्यस्योभयत्र व्यापारायोगादितिवाच्यम् । एवकारोपहतविधिशक्तिकस्यास्य परिसंख्यापरत्वावश्यम्भावात् स्तोत्रान्तराणामगत्याभ्यासेनैव संख्यापूरणे ऽपि पृथक्त्वनिवेशिन्याः संख्यायाः सम्भवत्यामृक्त्वस्यापरित्यागाय न्यायप्राप्तस्य क्वचित् क्वचित् द्वात्रिंशत्पवमानो ऽभिषेचनीय इत्यादौ प्रत्यक्षविहितराजसामाद्यपेक्षितस्य चावापस्यार्थाद्गायत्र्यादिषु व्यवस्थासिद्धेः । ततश्चात्र परिसंख्यैव वाक्यार्थः । इयांस्तु विशेषः । इमामगृभ्णन् इत्यादिपरिसंख्यायामश्वरशनाग्रहणे मन्त्रप्राप्तिः श्रौती । आर्थी गर्दभरशनाग्रहणपरिसंख्या । इह त्वेवकारश्रवणादायापि शाब्दी । गायत्र्याद्यतिरिक्तपरिसंख्यार्थी तस्य गायत्र्यादिषु प्राप्तिः । तत्सामर्थ्याच्च तस्य ऋग्विषयत्वं परित्यज्य सामविषयप्राप्तिः । एवं चात्र स्तोत्रान्तरपवमानगतान्यतृचेषु यावत्तनीयेष्विव गाथाषु गायत्र्यादिष्वेवं तद्वाक्योपस्तोत्रमन्त्रेणावापस्य प्राप्त्यभावात् । अत्रातिया-

प्तिरनिवार्य्या । इयं चाव्याप्तिर्विध्युपात्तानुपात्तं राशिद्वयमितिपक्षे तत्र चान्यत्र चेति पदद्वयस्वारस्यानुरोधेन राशिद्वयकरणव्यसनं परित्यज्य द्वयोः समुच्चित्य प्राप्तिमात्रं तत्र चान्यत्र प्राप्त इत्यनेन विवक्षितमिति पक्षान्तरपरिग्रहे[1] चाविशिष्टैव । तदेवमत्र ह्येवावपन्तीति परिसंख्यायां लक्षणस्याव्याप्तिः स्थिता । अथान्यत्रापि अव्याप्तितत्परिहारार्थविवक्षाप्रसक्तामतिव्याप्तिं च दर्शयति ।

प्राप्तिः शेषिद्वये चेदिह विवक्षिताशेषयुग्मेन सा स्यात्
अव्याप्तिस्त्वाश्रयादिद्वितयजुषि भवेच्छेषशेषित्वतश्चेत् यत्किञ्चिद्योगतश्चेत् बहुषडहगतोक्थादिविध्या क्रमः स्यात् सर्वत्र ब्राह्मणोक्तिप्रमुखविधिषु चातिप्रसक्तिः समाना ॥ २१ ॥

यदि तत्र चान्यत्र च प्राप्तइत्यनेन शेषिद्वये एकस्य शेषस्य प्राप्तिर्विवक्षिता तदानीमेकस्मिन् शेषिणि शेषद्वयप्राप्तौ या परिसंख्या शंख्विडोत्तराह्णकलापादिविषया

1 पञ्चामकर द० २ पु० पा० ।

तस्यां लक्षणं न स्यात् । यदि त्वेकस्मिन् शेषिणि शेषद्वयप्राप्तिर्विवक्षिता तदा शेषिद्वये एकस्य शेषस्य प्राप्तौ या परिसंख्या गर्दभरशनाग्रहणादिविषया तस्या लक्षणं न स्यात् यद्युच्येत उभयसंग्रहाय शेषशेषिभावसंबन्धेन प्राप्तिर्विवक्षितेति तथापि तदुभयसंग्रहालाभस्तदवस्थ एव यतस्तत्र चान्यत्र चेति सप्तम्योः प्राप्तइति सप्तम्याश्च सामानाधिकरण्यविवक्षायां गर्दभरशनाग्रहणादिपरिसंख्यायामेव लक्षणं न [1]स्याद्वैयधिकरण्येनान्वयविवक्षायां शंखिडोत्तराङ्कपालादिपरिसंख्यायामेव न स्यात्[2] । प्राप्तिर्हि शेषिणि शेषस्य व्यवह्रियते न तु शेषे शेषिणः । अत एव न्यायसुधायां तत्र चान्यत्र च प्राप्त इत्यस्य शेषान्तरपरिसंख्यायां सामानाधिकरण्येन शेष्यन्तरपरिसंख्यायां वैयधिकरण्येन च योजना दर्शिता । एवं योजनया द्विलक्षणस्य शेषशेषिपरिसंख्ययोरननुगम एव ख्यापितः । अथाननुगमपरिहाराय सामानाधिकरण्यवैयधिकरण्ययोरेकपक्ष आश्रीयते न चैवं सति सामानाधिकरण्यपक्षे शेष्यन्तरपरिसंख्यायां वैयधिकरण्यपक्षे शेषान्तरपरिसंख्यायां चाव्याप्तिः । न हि प्राप्तिः शेषस्यैवेति नियमः । शेषस्य किंचिच्छेषिसंबन्धित्वेनावगतेरिव शेषिणोऽपि किंचिच्छेषसंबधित्वेनावगतेः प्राप्तिरिति व्यपदेष्टुं शक्यत्वात् । तथा च सामानाधिकरण्यपक्षे ऽश्वगर्दभरशनाग्रहणयोः शेषशेषिभावेन मन्त्रसंबन्धितया प्राप्तिरविकला वैयधिकरण्यपक्षे ऽपि गृह-

---

१ लक्षणमव्याप्तं स्यादिति २ पु० पा० ।

२ लक्षणमव्याप्तं स्यादिति १ पु० पा० ।

मेधीयस्य शेषशेषिभावेनाज्यभागतद्भिन्नाङ्गकलापसंवन्धितया प्राप्तिरविकलेति पक्षद्वयेऽपि न क्वाप्यव्याप्तिरिति चेत् । अस्तु नामात्रैवमव्याप्तिपरिहारस्तथाप्याश्रयान्तरनिमित्तान्तरपरिसंख्ययोरव्याप्तिः स्यात् । आश्रयाश्रयिणोर्निमित्तनिमित्तिनोश्च शेषशेषिभावाभावात् । दर्शितं च नवमश्लोकावतारिकायां "वाग्वा एषा यदैन्द्रवायवाग्रा ग्रहा गृह्यन्ते" इतिविधेराश्रयान्तरपरिसंख्यार्थत्वं "सायं जुहोति" "प्रातर्जुहोती"ति विध्योर्निमित्तान्तरपरिसंख्यार्थत्वं च मा भूत्तर्हि शेषशेषिभावेनेति विवक्षा, प्रयोजनाभावादव्याप्त्यावहत्वाच्च शेषशेषिभावेनाश्रयाश्रयिभावेन निमित्तनिमित्तिभावेनान्येन वा येन केन चित्सम्बन्धेन तत्र चान्यत्र प्राप्तिर्दर्शितावदेव लक्षणमस्तु इति चेत् । एवं सति षडहा भवन्ति चत्वारो भवन्ति[१] शतोक्थं भवति शताग्निष्टोमं भवति सर्वस्तोमो भवति सर्वः पञ्चदश इत्यादिविधिषु अतिव्याप्तिः स्यात् । नन्वेकत्र समुच्चित्य प्राप्तिरिह विवक्षिता, न चोदाहृतस्थलेषु सास्ति षट्त्रिंशद्रात्रे ह्यादितः षट्स्वहःसु षडहधर्मजातस्य चोदकात्प्राप्तिः । ततश्चतुर्षु छन्दोगधर्मजातस्य । नन्वेकत्र उभयोः समुच्चित्य प्राप्तिरस्ति तथा शतोक्थ्ये शताग्निष्टोमे चाद्ये ऽह्न्यग्निष्टोमसंस्थाया द्वितीयतृतीययोरुक्थसंस्थाया इत्येवं प्रकारेण चोदकाद्भिन्नविषया प्राप्तिः । एवमेकस्तोमकक्रतुषु बहिष्पवमाने त्रिवृत्स्तोमस्याज्येषु माध्यंदिनपवमाने पञ्चदशस्तोमस्येत्येवं रूपेण चोदकाद्भिन्नविषयैव प्राप्तिरतो न क्वाप्यति-

---

१ षड्‌ ब्रा० १ प्रपा० ।

व्याप्तिरिति चेत् न । षडहधर्मोक्थ्यादिसंस्था त्रिहदादिस्तोमश्च पिणामह: स्तोत्राणां भेदसत्त्वेऽप्येकैकस्मिन्षट्त्रिंशद्रात्रशतोक्थ्यशताग्निष्टोमैकस्तोमक[1]क्रतुप्रयोगाणामभिन्नत्वेनैकैकस्मिन् क्रतुप्रयोगे षडहच्छन्दोगधर्मादीनां समुच्चित्य प्राप्तिसत्त्वात्तेषामहरादिशेषत्वेऽपि प्रयोगेणापि सह तदन्तर्गतत्वलक्षणसंबन्धसत्त्वात्क्षेपशेषिभावसंबन्धविशेषस्याविवक्षितत्वात् । अपि च शेषत्वादिविषयासु सर्वास्वपि विवक्षासु "सर्वं ब्रह्मणे परिहरति" स ब्रह्मणे देय: स प्रियाय सगोत्राय ब्रह्मणे देय इतिविधिष्वतिव्याप्ति: समाना ब्रह्मणस्तदतिरिक्तर्त्विग्वर्गस्य चैकस्मिन्हवि:शेषे ग्रावाभ्वे सोमचमसे च प्राप्तिसत्त्वात् । एवमग्निष्टुत्याग्नेया गृहा भवन्ति इति विधौ चातिव्याप्ति: । तस्याग्निष्टुतीन्द्रवाय्वाद्यनेकदेवताप्राप्तौ चाग्निविधानार्थत्वात् । तस्मादतिव्याप्तत्वादपि नेदं लक्षणं युक्तमिति भाव: । अप्राप्तविषयेष्विव पक्षप्राप्तविषयेष्वपि विधिष्वतिव्याप्तिरस्तीत्याह ।

तत्रान्यत्रापि चाप्तिर्नियमविधिषु चास्तीत्यतिव्याप्तिरेवं नित्यप्राप्तिर्विवक्षा न खलु विरहत: कूर्मकोशादिभक्ष्ये नित्यानित्यापि चास्मिन्कथमपि

१ स्तोमकेति २ पु० मा० ।

च समुच्चित्य चेत्प्राप्तिरिष्टा पत्नीयागाङ्गतायां नियमकृतिविधौ सा तथाप्यप्रणोद्या ॥२२॥

अवहननादिविधयो ऽप्यवहननविदलनादिषु पक्षप्राप्तेषु प्रवर्त्तन्तइति तेष्वतिव्याप्तिः स्पष्टैव । ननु तत्र चान्यत्र च प्राप्तत्वमेव नित्यप्राप्तत्वं विवक्षितमिति चेत् । नैवं विवक्षितुं शक्यते । पञ्च पञ्चनखा भक्ष्या इति प्रसिद्धपरिसंख्यासंग्रहाभावप्रसङ्गात् । न हि कूर्मशशशल्यकश्वाविद्गोधानां वानरशृगालादीनां च भक्षणं पुरुषे नित्यप्राप्तं तेषां भक्षणेनेव कदा चित्तद्वर्जनेनापि पुरुषस्येप्सितसंभवेन तद्वर्जनस्यापि क्व चित्प्रागतः प्राप्तिसत्त्वात् । ननु तर्हि नित्यानित्यत्वानादरेण समुच्चित्य प्राप्तिरत्र विवक्ष्यते । तथा च सति न नियमविधिष्वतिव्याप्तिरवहननविदलनादीनां परस्परप्रतिक्षेपकत्वेन समुच्चित्य प्राप्त्यसंभवात् । नाप्युदाहृतपरिसंख्यायामव्याप्तिः, कूर्मादिवानरादिभक्षणयोः परस्परप्रतिक्षेपकत्वाभावेन समुच्चित्य प्राप्तिसंभवात् । इति चेत् । एवमपि "पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्ते" इति नियमविधावतिव्याप्तिः । इदमिह वाक्यं प्रंखिद्वान्तवाक्यरीत्या द्वादशाह्निकानामङ्गां पत्नीसंयाजान्तत्वविधानेन तदुत्तराङ्गकलापपरिसंख्यार्थं न भवति किं तु "द्वादशाहेन प्रजाकामं याजयेदि"त्यहःशब्दोदितानां द्वादशानां यागानां प्रजाकामार्थेन चोदितानामेकफलत्वेन प्रयोगैक्ये सति त-

न्निर्वाहाय पूर्वपूर्वमहः क्व चित्पदार्थं ऽवस्थाप्य परम्परसुपक्रमितव्यमित्यनियमेन पत्नीसंयाजद्रुपे तत्प्राचीने तदुपरितने वा क्व चिदङ्गे ऽवस्थाने प्राप्ते पत्नीसंयाजेष्ववस्थापननियमार्थमित्युपपादितं नवमे पत्नीसंयाजान्तत्वं सर्वेषामविशेषादित्यधिकरणे। ततश्च पत्नीसंयाजान्तानां तदुपरितनानां चाङ्गानां कदा चित्समुच्चित्य प्राप्तिरप्यस्तीत्यतिव्याप्तिरनिवार्या। एवं "यन्नृचां गृह्णाति प्रयाजेभ्यस्तदि"ति नियमविधावतिव्याप्तिर्द्रष्टव्या। उपपादितं च जैहवाज्ये प्रयाजानामन्येषां च कदा चित्समुच्चित्य प्राप्तिसत्त्वमथापि नियमविधित्वं च नवमश्लोकावतारिकायाम्। स्यादेतत्तत्र चान्यत्र च प्राप्तेस्तदन्यतरनिवृत्तिफलका विधिः परिसंख्येति फलमयधिकं लक्षणे योजयिष्यामः। तथा चोदाहृतेष्वप्राप्तविषयेषु चतुष्पञ्चदशादिविधिषु तत्तत्प्राप्तेरेव फलत्वेन पक्षप्राप्तविषयेष्ववहननादिविधिषु तत्तन्नियमनस्यैव फलत्वेन निवृत्तेरानुषङ्गिकत्वान्नातिव्याप्तिरित्याशङ्क्याह ॥

योऽन्यस्तत्रैव बाधः फलमपि यदि तद्यर्थ एवावशिष्टः तस्याप्युक्त्या निषेधात्मकविधिनियमातिप्रसक्तेरबोधात् ॥ प्राप्तं सर्वत्र किं चित्खलु सुलभतरं वर्ज्जनीयेन साकम् गृह्यन्ते ते ऽपि ल-

च्या यदि तदपि विधौ सर्वथा-तिप्रसक्तिः ॥ २३ ॥

यदि लक्षणे निवृत्तिफलकत्वमप्यधिकं निवेश्यते तर्ह्यवशिष्टः श्रुतांशो व्यर्थः, विधिनियमयोः प्राप्तिपूर्त्तिफलकयोर्निवृत्तिफलकत्वाभावेन तावतैव सर्वातिव्याप्तिवारणात्। स्यादेतत् निषेधात्मका अपि सन्ति विधयो नियमाश्च, यथा"दीक्षितो न जुहोति""न तौ पशौ करोति""नातिरात्रे षोडशिनं गृह्णाति"इत्यादयो विधिप्राप्तानां निषेधानां विषयः दीक्षामध्येऽग्निहोत्रहोमानां पशावाज्यभागयोरतिरात्रे षोडशिग्रहस्य च वर्जनानामप्राप्तत्वात्"न हिंस्यात्""नानृतं वदेत्"इत्यादयो रागप्राप्तानां निषेधा नियमाः। हिंसादिर्न कदा चित्तद्वर्जनेनापि पुरुषस्यैप्सितसंभवेन तस्यापि पक्षे प्राप्तत्वादिति चेत् मैवम्। तेष्वतिव्याप्तेः। तस्य विशेषणात्वस्योक्तस्यापि निरोधासम्भवात्। सर्वत्र हि किञ्चित्किञ्चिद्वर्जनीयं वर्जनीयेन सह समुच्चित्य प्राप्तं सुलभमेव यथा दीक्षामध्ये क्रत्वर्थहोमाः पुरुषार्थहोमैरग्निहोत्रादिभिः सह प्राप्ताः पशावाज्यभागव्यतिरिक्ताङ्गान्याज्यभागाभ्यां सह प्राप्तानि अतिरात्रे षोडशिग्रहव्यतिरिक्ताङ्गानि षोडशिग्रहेण सह प्राप्तानि पुरुषे भोजनादीनि हिंसादिभिः सह प्राप्तानि। ननु तत्र चान्यत्र च प्राप्तद्वयत्रैकरूपसंबन्धेन प्राप्तिर्विवक्षिता अस्ति च प्रागुदाहृतेषु सर्वेषु परिसंख्योदाहरणेषु शेषत्वेन शेषित्वेनाश्रयत्वेन निमित्तत्वेन वा येन केन चिदेकरूपेणैव

संबन्धेनोभयोः प्राप्तिः। तथा च "दीक्षितो न जुहोती"त्यत्रापूर्वविधौ नातिव्याप्तिः, दीक्षामध्ये क्रत्वर्थहोमानां क्रतुशेषत्वेन प्राप्तिः पुरुषार्थहोमानां कालैक्येनेति संबन्धभेदात्। "नतौ पशौ करोति" "नातिरात्र" इति निषेधयोरुक्तलक्षणानुसारेण परिसंख्यात्वमेवास्तु। न चैवमपि न हिंस्यादिति नियमविधावतिव्याप्तिः पुरुषं प्रतिशेषत्वेनैव भोजनादीनां हिंसादीनां च प्राप्तिसत्त्वादिति वाच्यम्। अत्यन्ताप्राप्तनिवृत्तिफलकत्वस्य लक्षणे विवक्षितत्वादिति चेन्नैवम्। दृष्टार्थानां कण्डूयनादीनामदृष्टार्थानां च हरिहरस्मरणादीनां पुरुषार्थहोमैः सह क्रतौ कालसंबन्धेन प्राप्तिसत्त्वेन दीक्षितो न जुहोति इत्यपूर्वविधावुक्तविवक्षयाप्यतिव्याप्त्यनिरासात्। निवृत्तावत्यन्ताप्राप्तत्वविशेषणविवक्षायां शशादिपञ्चकव्यतिरिक्तपञ्चनखलक्षणनिवृत्तेरत्यन्ताप्राप्तत्वाभावेन पञ्चपञ्चनखा भक्ष्या इति परिसंख्यायामव्याप्तिप्रसक्त्या तस्य विशेषणस्याविवक्षणीयतया न हिंस्यादिति नियमविध्यतिव्याप्त्यनिरासाच्च। ननु "यदि दीक्षितो न जुहोती"त्यादिषु सर्वेषु निषेधेषु लक्षणमस्ति तदा सन्तु तेऽपि परिसंख्या इति चेत्। तथाप्यपूर्वविधावतिव्याप्तिः। यदि निवृत्तिफलको विधिरित्येतावदेव लक्षणं क्रियते यदि वानेकस्य समुच्चित्य प्राप्ताविति विशेष्यते सर्वथाप्यग्निहोत्रादिविधावस्त्येवेदं लक्षणम्। यमपरिहाराद्यर्थं लौकिककर्मणामग्निहोत्रादिकर्मणां चाकरणयोः समुच्चित्य प्राप्तौ "यावज्जीवमग्निहोत्रं जुहोति"इत्यादिविधेरग्निहोत्राद्यकर-

णानिवृत्तिरूपतदनुष्ठानफलकत्वात् । न चात्र निवृत्ति-पदेन भावरूपैव निवृत्तिर्विवक्षितेति शक्यं वक्तुम् । प्रागुदाहृतनिषेधपरिसंख्यास्वनुष्ठानफलाव्याप्तिप्रसङ्गात् । तस्मात्परिसंख्यालक्षणमपि न युक्तमिति भावः । इति परिसंख्यालक्षणाक्षेपः समाप्तः ।

विलक्षणान्यप्युदितानि
लक्षणान्यपूर्वविध्यादिविभागसिद्धये ।
भजन्ति भूम्नेह क्षतां पदावलिं
परस्परामथ्यपरम्परामिमाम् ॥

एवं संक्षिप्तमाक्षेपातिदेशम् एततप्रपञ्चनहेतूपन्यास-व्याजेन सामान्यतः प्रदर्शयति ।

पूर्वाक्षेपप्रकारः प्रभवति परमप्यात्मवश्यं विधातुम् प्रायः सूक्ष्मं विभागं त्रिविधिषु गमयतां लक्षणानामसौम्यम् । शक्यं तन्न्यायसाध्यप्रणिहितमतिभिर्बोद्धुमित्यप्रदर्श्य क्षिप्तवप्येतेषु भिन्नस्थितिषु नवनवो वर्णितस्तत्प्रकारः ॥ २४ ॥

अपूर्वविध्यादिविभागकानामुदाहृतलक्षणानां मध्ये

पूर्वस्यापूर्वविधौ लक्षणस्य य आक्षेपप्रकारः स प्रायेण परं नियमविधिलक्षणमप्याक्रन्दितुं प्रभवति । तद्यथा पाक्षिके सतीत्यत्र विधिविषयस्य पाक्षिकत्वं विवक्षितं, यस्य कस्य चिद्वा । आद्ये सर्वत्र पाक्षिकत्वविवक्षायां विकृतिविशेषगतरथन्तरपृष्ठनियमविधावव्याप्तिः, विकृत्यन्तरे ऽपि तथैव नियमविधिसत्त्वेन तद्विध्यभावे रथन्तरपृष्ठस्य सार्वत्रिकपाक्षिकत्वाभावात् । प्रकृतिविध्युद्देश्ये पाक्षिकत्वविवक्षायामपि पुरोडाशे कर्तृनियमार्थे प्रथनविधावव्याप्तिः विधिविषयस्य प्रथनस्योद्देश्ये पुरोडाशे नित्यप्राप्तत्वात् । द्वितीये सतिसप्तम्या यस्य पाक्षिकत्वमुपलक्षणत्वेन निर्दिष्टं तन्नियमफलकत्वपर्यन्तलक्षणं विवक्षितं, न वा । अन्त्ये सायद्दिश्यां चोदकाद्व्रीह्यादौ पक्षप्राप्ते सति तदङ्गानामामनहोमानामपूर्वविधावतिव्याप्तिः । आद्ये मन्त्रगतस्वरनियमार्थेषूपांशु यजुषेत्यादिषु कर्मगतस्वरविधानेष्वव्याप्तिः । यस्य स्वरस्य नियमो विधेः फलं तस्योद्देश्ये यजुर्वेदादिविहिते ज्योतिष्टोमादिकर्मण्यत्यन्ताप्राप्तत्वेन पाक्षिकत्वाभावात् । यस्य तत्र विकल्पितस्य दीक्षापरिमाणादेः पाक्षिकत्वमस्ति तन्नियमनस्यैतद्विधिफलत्वाभावात् । यवेष्ववहननियमार्थे व्रीहिभिर्यजेतेति नियमविधौ चाव्याप्तिः । तत्र नियम्यस्यावहनस्य प्रकृतविध्युद्देश्ये यागे पक्षप्राप्त्यभावात् । यद्युच्येत प्रकृतोद्देश्ये पाक्षिकत्वं न विवक्षितं किं तु यत्र क्वचित् तथा चोद्देश्ये ऽन्यस्मिन्वा यस्मिन्कस्मिंश्चिद्विधिविषयस्यान्यस्य वा पाक्षिकत्वे सति तन्नियमफलको विधिरिति लक्षणमतो नोक्तातिव्याप्तिरिति । एवमपि

मन्त्रार्थवादसामर्थ्यादिलभ्यद्रव्यगुणसंस्कारादिनियमफ-
लकेषु नानाशाखादिगतेषु च नियमविधिष्वव्याप्तिः ।
भूर्गामो ह्यग्नो ऽग्नीषोमीय इत्यादयो मन्त्रार्थवादसाम-
र्थ्यादिलभ्यविषया नानाशाखागताश्च नियमविधयः म-
न्त्रार्थवादसामर्थ्यादिफलशाखान्तरगतविधीनामप्र-
वृत्त्यपेक्षया तेषु पाक्षिकत्वसमर्थने "दण्डी प्रैषानन्वाह"
इत्यादिविधिषु नानेकविध्यप्रवृत्त्यपेक्षया नियमपरिसंख्या
लक्षणसाङ्कर्यापत्त्यानिष्टं प्रसज्येतेत्युक्तम् । अपि च पञ्च
पञ्चनखा भक्ष्या इति परिसंख्यायामव्याप्तिः । तत्फ-
लभूतायाः शशादिपञ्चकव्यतिरिक्तपञ्चनखभक्षणनिवृत्तेः
पक्षे रागत एव प्राप्तिसम्भवात् । भावस्य पाक्षिकत्व-
विवक्षायां न हिंस्यात्सर्वाभूतानीत्यादिनियमविधाव-
व्याप्तिः, क्वचिद्भूतविशेषे कांश्चिन्नियमान्विधाय तद्विकृतौ
प्रतागरे तन्नियमाभावमुक्त्वा पुनस्तद्वत्कर्तव्यत्वेन विहिते
व्रतान्तरे विशिष्य किंचिन्नियमाभावो यत्रोपदिश्यते तत्र
परिसंख्याविधया तदन्यनियमाः प्राप्यन्तइति तस्यां
परिसंख्यायामतिव्याप्तिश्च । तत्र भावरूपनियमगतपा-
क्षिकत्वसत्त्वात् । किं च किं पाक्षिकत्वं विवक्षितम् । यदि
सर्वोद्देश्यानुवृत्तप्राप्तिमत्त्वं तदा सार्वकाम्यविधावति-
व्याप्तिः । ज्योतिष्टोमप्राप्तेः स्वर्गान्यफलेष्वनुवृत्त्यभावात् ।
असम्भवश्च । अवहननादीनामुद्देश्येषु सर्वेष्वपि व्रीह्या-
दिषु प्राप्तेः समर्पितत्वात् । उद्देश्याव्यापकप्राप्तिमत्त्वं
तदिति चेत् । सर्वोद्देश्येषु प्राप्तिकरम्बितप्राप्तिमत्त्वम् ।
तदुद्देश्यप्राप्तिरहितेषु "मात्रा स्तुवीत" इत्यादिनियमवि-
धिष्वव्याप्तेः । उद्देश्येषुतिविशेषाविवक्षायामपि पाक्ष-

ह्विकहृद्यन्तरपृष्ठत्वादिविध्यतिव्याप्तम् । तत्राह भेदादिरूपावच्छेदे भेदोऽस्तीति चेत् । किं विनैवावच्छेदभेदमप्राप्तिकत्वविशिष्टप्राप्तिमत्त्वं विवक्षितम् । ओमिति चेत् । तदसम्भवः, अवहननादिप्राप्त्योरपि उपायान्तरतद्विरहरूपावच्छेदभेदनियतत्वात् । उपायान्तरतद्विरहभिन्नावच्छेदभेदं विनेति विवक्षायामपि कार्यषोडशियुगमनरथन्तरादिनियमाव्याप्तिः । वैकल्पिकतद्विरहभिन्नावच्छेदभेदं विनेति विवक्षायां वैकल्पिकत्वस्य पाक्षिकत्वानुप्रवेशरहितस्य निर्वक्तुमशक्यत्वादात्माश्रयः । आश्रयभेदं विनेति विवक्षायामपि श्यावाश्ववच्छन्दस्त्वोक्तिप्रमुखापूर्वविधिप्रतिव्याप्तिः । पूतीकाऽन्यलिङ्गमन्त्रउत्करपरिध्यादिनियमाव्याप्तिश्च । कादाचित्कप्राप्तिमत्त्वं पाक्षिकत्वमिति विवक्षायामपि चोदकप्राप्तापोदितकृष्णलश्रपणादिविध्यतिव्याप्तिरिति । एवं नियमविधिलक्षणाक्षेपप्रकारः प्रायेण परिसंख्यालक्षणमप्याक्रान्तुं प्रभवति । तद्यथा प्रायणीयादिषूपायपरिसंख्या रशनादानादिषूपेयपरिसंख्या हृदयस्याग्रेऽवद्यतीत्यादिषूपायोपेयपरिसंख्या । त्रिविधायामप्यस्यां परिसंख्यायां कस्य चिदुपेयस्य कस्य चिदुपायस्य तत्तत्प्रतियोगिनश्च विध्युपात्तत्वमस्ति । ननु हृदयस्याग्रेऽवद्यतीत्यादिषु हृदयाद्येकादशातिरिक्तपश्ववयववर्गस्यावदानोपेयत्वपरिसंख्यायामेव प्रतियोगिनोऽवदानस्य विध्युपात्तत्वमस्ति न तु तस्य पशुयागोपायत्वपरिसंख्यायां प्रतियोगिनः पशुयागस्येति चेत् । न । तत्राङ्गवाक्यानां प्रधानवाक्यैकवाक्यताकल्पने सति तस्य विध्युपात्तत्वलाभात् । क्व चित्क्व चिदुपेयतत्प्रतियोगि-

नोरुपायत्प्रतियोगिनोश्च मध्ये एकस्य द्वयोर्वा विध्यनुपात्तत्वमपि दृश्यते । यथा "यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान्ग्रहान् गृह्णीयादि"त्यत्र रथन्तरसामा रथन्तरसामविकृतिरूपस्योपेयस्यैकस्य विध्यनुपात्तत्वम् । "कपालेषु श्रपयती"त्यत्र चित्रेष्टिव्रीहिनियमयोरुभयोरपि विध्यनुपात्तत्वं तदेवमुपात्तानुपात्तरूपे द्विविधे ऽप्युदाहरणे ग्राह्यव्यावर्त्तनीययोर्नियतप्राप्तिरस्ति । क्वचिद्व्यावर्त्तनीयमानप्राप्तावपि परिसंख्या दृश्यते । यथा "ऽत्र ह्येवावपन्ती"ति । क्वचित्तु परिसंख्यायां नियतप्राप्तमेव न दृश्यते । यथा "पञ्च पञ्चनखा भक्ष्या" इति । एवं नानाप्रकारः परिसंख्याविधिर्नियमविधिवदेव लक्षणेन संग्रहीतुं शक्यः । अयं तु प्रकारः । परिसंख्याविधिलक्षणाक्षेपे प्रदर्शितप्राय इति नेह प्रपञ्च्यते । एवमपूर्वविधिलक्षणाक्षेपप्रकारो ऽपि परिसंख्याविधिलक्षणमवस्कन्दितुं प्रभवति । तथा हि प्राप्त इति विषयसप्तमीति पक्षे तत्र चान्यत्र चेति सप्तम्योस्तया सामानाधिकरण्ये लक्षणस्यासम्भव एव स्यात् । ग्राह्यव्यावर्त्तनीययोरुभयोरपि विधिविषयत्वाभावात् । वैय्यधिकरण्ये तु सार्वविकोभयप्राप्तिविवक्षायां गृहमेधीयगताज्यभागद्वयविधावव्याप्तिः । अवभृथे ऽपि तथैवाज्यभागविधिसत्त्वेन तद्विध्यभावे सर्वविकृतिगताज्यभागतदितराङ्गकलापरूपोभयप्राप्त्यभावात् । प्रकृतिविधावुद्देश्यत्वेन विधेयत्वेन वान्वयिन्युभयप्राप्तिविवक्षायामपि कपालेषु श्रपयतीति परिसंख्याविधावव्याप्तिः । सतिसप्तमीपक्षे यस्य ययोरुभयोः प्राप्तिरुपलक्षणत्वेन निर्दिष्टा तस्य तदन्य-

तरसंबन्धव्यावर्त्तनफलकत्वपर्यन्तं लक्षणं न विवक्षितं चेत्वाग्निहोत्रं चोदकादनेकस्मिन्नङ्गकलापे प्राप्ते मन्त्रामन्त्रहोमविधावतिव्याप्तिः। तथा विवक्षितं चेत्कपालश्रपणविध्याद्यव्याप्तिः यदुच्येत प्रकृतविध्युपात्तगतोभयप्राप्तिर्न विवक्षिता किं तु यस्य कस्य चिद्यत्किञ्चिदुभयप्राप्तिः। तथा च तस्य तदन्यतरसंबन्धनिवृत्तिफलको विधिः परिसंख्येति विवक्षितत्वान्नोक्ताव्याप्तिर्नाप्यतिव्याप्तिरिति चेत्। एवमपि मन्त्रार्थवादसामर्थ्यलभ्यप्रयोजनेषु नानाशाखागतेषु च परिसंख्याविधिषु अव्याप्तिरित्यादिप्रागुक्तमेवानुवर्त्ततइति। एवं यद्यपि पूर्वोक्षेपप्रकारः परत्रापि प्रवर्तते तथापि स धीमद्भिः सञ्चारयितुं शक्य इति नियमपरिसंख्ययोर्भिन्नभिन्न आक्षेपप्रकारो दर्शित.। तथा चैते त्रयो ऽपि विधयस्तुल्यस्थितये इत्युत्तरोत्तरस्मिन्वर्णिताक्षेपप्रकारो ऽपि पूर्वपूर्वस्मिन्संभवन्सञ्चारणीय इति भावः॥

इति त्रिविधविधिलक्षणाक्षेपपरस्परातिदेशः समाप्तः।



एवमपूर्वनियमपरिसंख्यानामुदाहरणेष्वप्याक्षेपसमाधानं क्रियते । तत्राक्षेपः ।

उत्पश्यामो न चोदाहरणमपि
पराप्राप्तरूपं विधीनाम् प्राप्तं ख-
ल्वग्निदीक्षाहवनमिव हविःप्रो-
क्षणं मन्त्रलिङ्गात् ॥ नैयत्यं
सोमपात्रग्रहण इव ततः प्राप्त-
मेवावहन्तौ प्राप्तं तद्दृष्टकार्या-
न्वयपरमुसलोलूखलाम्नानतश्च२५

व्रीहीन्प्रोक्षतीति विधिरित्युदाहृतं वार्त्तिके । तत्तावदयुक्तम् । दर्शपूर्णमासप्रकरणेन तदपूर्वार्थत्वेनावगतस्याग्नये त्वा जुष्टं प्रोक्षाम्यग्नीषोमाभ्यामित्यादिमन्त्रस्य देवतार्थद्रव्यप्रोक्षणलिङ्गबलाद्धविःप्रोक्षणद्वारेण तादर्थ्यं स्यादिति तत एव हविःप्रोक्षणकर्त्तव्यता प्राप्यते किमत्र व्रीहीन्प्रोक्षतीति विधिना । अङ्गीकृता खलु दशमे षड्भिर्दीक्षयतीत्यग्निप्रकरणगतविधिना दीक्षार्थतयाऽवगतानामाकूतिमग्निं प्रयुज स्वाहेत्यादिमन्त्राणां स्वाहाकारलिङ्गबलाद्धोमद्वारेण तादर्थ्यसिद्धेस्तत एव होमकर्त्तव्यता प्राप्यत इति, तथा व्रीहीनवहन्तीति विधिर्नियमविधिरित्युदाहृतमप्ययुक्तम् । दर्शपूर्णमासप्रकरणेन तदपूर्वार्थत्वेनावगतस्यावरक्षो दिवः सपत्नं वध्यासमितिम-

र्थप्राप्तावहननार्थं सम्पद्यते अवहननस्य चूर्णीकरणादिवद् दृषदुपलादिसाधनान्तरसाध्यत्वाभावेन नियमतस्तदुभयापेक्षत्वादिति नित्यवदाम्नातोलूखलमुसलकार्यत्वेनान्वयबलादप्यवहननस्य नियमो लभ्यते किमत्र व्रीहीनवहन्तीतिविधिना। तस्मात् व्रीहीन् प्रोक्षति व्रीहीनवहन्तीति अपूर्वनियमविध्युदाहरणमयुक्तमितिभावः। नन्वनन्यलभ्ययोरपि प्रोक्षणावहननियमयोरभ्युदयार्थोवेतौ विधी स्यातां गत्यन्तराभावात् स्वर्गकामसाप्तदश्यादिविधिवदित्याशङ्क्य परिसंख्याद्यर्थत्वेन तयोश्चारितार्थ्यमाह॥

तस्मादत्रोभयस्मिन् यवपरिहृतये पारिसंख्यो विधिः स्यात् नो चेत्प्राप्त्यै नियत्यै कथमपि च भवन् प्रसिद्धो ऽपि सः स्यात् यद्वापूर्वो विधिः स्यान्नियमपर इहाध्वर्यवत्वं नियच्छन् अन्यस्मिन्द्वंद्वसंपादनविधिवशगे तत्प्रयच्छन्नपूर्वः॥ २६॥

मन्त्रलिङ्गात्प्राप्तवदाग्नेयाग्नीषोमीयपुरोडाशार्थद्रव्यविषयं प्रोक्षणं मन्त्रलिङ्गोलूखलमुसलाम्नानाभ्यां प्राप्तु-

वन्नवहननियमस्य ब्रीहीणामिव यवानामपि प्राप्नुयात्। तन्निवर्तकतया परिसंख्याविधित्वेन सम्भवत्यनयोस्तथा-रितार्थ्येनानन्यगतिकमभ्युदयार्थापूर्वनियमविधित्वं कल्पनीयम्। यदि तु नित्यप्राप्तबाधकपरिसंख्यापेक्षया नित्यप्राप्तमभ्युदयार्थं प्रापयन्नियच्छन्वा विधिः श्रेयानित्येवं प्रोक्षणावहननशास्त्रयोरपूर्वनियमविध्यभ्युपगमो न त्वनन्यगतिकतयेति मन्यसे तदानीमश्वाभिधानीमादत्त इत्यत्र प्रसिद्धोऽपि परिसंख्याविधिर्न सिद्ध्येत् किं तु तत्र मन्त्रप्राप्तौ मन्त्रनियमे वाऽन्यलभ्ये ऽप्यभ्युदयशिरस्कतया मन्त्रस्य प्राप्तिं नियमं वा कुर्वन्नपूर्वविधिर्नियमविधिर्वा स्यात्, शक्यते ह्येवं वक्तुम् अश्वरशनाग्रहणप्रकाशने मन्त्रं प्रापयन्नयमपूर्वविधिस्तत्र कल्पसूत्रोपदृष्टवचनात्मीयग्रहणकवाक्यरूपानियतानेकोपायप्राप्तौ मन्त्रं नियच्छन्नियमविधिर्वेति। अत्रेदं वक्तव्यम्। मन्त्रलिङ्गबलादेव तत्र मन्त्रस्य तावत्प्राप्तिर्लभ्यते सा च तस्य नित्यवदाम्नानबलान्नियतैव लभ्यते तथा च प्राप्तिनियमयोरन्यलभ्यत्वेनापूर्वनियमविध्योरसम्भवात्परिसंख्याविधिरभ्युपगत इति। कथमेतदुपपद्यते। यद्यन्यलभ्ययोरपि प्राप्तिनियमयोरभ्युदयशिरस्कत्वेनानन्यलभ्यत्वमुपपाद्य प्रोक्षणावहननविध्योरपूर्वनियमविधित्वमिति परिसंख्यार्थत्वं प्रतिक्षिप्येत तथा ह्यत्रापि तथैवापूर्वविधित्वं नियमविधित्वं वा सम्भवतीति परिसंख्यार्थत्वं न सिध्येत्। अथापि तत्र परिसंख्यार्थत्वाभ्युपगमे तथैव प्रोक्षणावहननविध्योरपि तादर्थ्यमभ्युपगन्तुं युक्तम्। अथोच्येत ब्रीहीनवहन्तीत्ययं परिसंख्याविधिरित्यभ्युपगमे

ऽवहननपरिसंख्या तन्नियमपरिसंख्या वेति निर्द्धारणं न सम्भवति नियामकाभावात् अतस्तत्र यथा कथं चिन्नियमविधिरेवाश्रयणीय इति अत्रापि चोद्ये प्रसिद्धोऽप्येवं सति परिसंख्याविधिर्न स्यात् । तत्रापि कथं चिदपूर्वविधिर्नियमविधिरेव वाश्रयणीयः स्यादित्येवोत्तरम् । तत्रापि मन्त्रपरिसंख्या तन्नियमपरिसंख्या वेति निश्चयो न सम्भवत्येव । यद्युच्येत मन्त्रस्य विधिबोधितेनाश्वाभिधानीग्रहणसंबन्धमात्रेण तस्याभिप्रकरणाम्नानस्वरितार्थमिति नैराकाङ्क्षेण तत्र गर्द्दभरशनाग्रहणसाधारणस्य लैङ्गिकविनियोगकल्पनस्याप्रवृत्तेर्मन्त्रो गर्द्दभरशनाग्रहणं न स्पृशत्येव । अतो मन्त्रपरिसंख्येयं न तन्नियमपरिसंख्या । अश्वरशनायां मन्त्रनियमे विधिना प्रतिपादिते ह्यन्यत्र तन्नियमपरिसंख्या स्यान्न त्वत्राश्वरशनामन्त्रेणैवादद्यादिति मन्त्रनियमो विधिना प्रतिपादितः । स तु नियमः परिसंख्यावदर्थाल्लभ्यते अश्वरशनाग्रहणे मन्त्ररूपोपायसंबन्धे विधिना बोधिते तावता नैराकाङ्क्षेण पाक्षिककल्पसूत्रादिसाधारणलौकिकोपायकल्पना ऽप्रवृत्तेः । किं तु प्रकरणसनाथमन्त्रलिङ्गपर्यालोचनयापि लब्धुं शक्यत्वात्तामस्य विधेः फलत्वेन नाद्रीयते इति । सर्वमेतदवहननविधावपि समानम् । अथैवमुच्येत तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयत इति परिसंख्यालक्षणं तत्र चान्यत्र च नित्यप्राप्त इत्येवं परमन्यथा नियमविधिरपि तत्र चान्यत्र च पक्षप्राप्ते प्रवर्त्तत इति तत्रातिव्याप्तिप्रसङ्गात् । ततश्च रशनाग्रहणे मन्त्रविधेः परिसंख्यात्वम्

अश्वगर्दभरशनाग्रहणयोर्मन्त्रस्य नित्यप्राप्तिमपेक्ष्योपपादनीयम्। नित्यप्राप्तिश्च तस्य तयोः प्रकरणानुगृहीतमन्त्रलिङ्गकल्प्यविधिलभ्या न तु अनियतानेकोपायकल्पनालभ्या प्रकरणानुगृहीतमन्त्रलिङ्गकल्प्यश्च विधिरश्वगर्दभरशनाग्रहणयोर्मन्त्रकल्पसूत्राद्यनियतानेकोपायप्राप्तौ नियमविध्यात्मक इति नियमविधिलभ्यामश्वगर्दभरशनाग्रहणयोर्मन्त्रनियमरूपां प्राप्तिमपेक्ष्य प्रवर्तमाना परिसंख्या मन्त्रनियमपरिसंख्या पर्यवस्यतीति गर्दभरशनाग्रहणान्मन्त्रनियम एव व्यावर्त्तते न तु कल्पसूत्रादिवदनियमेन प्राप्नुवन्मन्त्रो ऽपि। अत एव वैखानसं पूर्वेऽहन्साम भवति षोडश्युत्तर इत्यत्र परिसंख्येति वृत्तिकारपक्षे प्रकृत्यतिरात्रतश्चोदकात्पाक्षिकी षोडशिग्रहस्य या प्राप्तिस्तामपेक्ष्य नेयं परिसंख्या परिसंख्याया नित्यप्राप्त्यपेक्षत्वात् चोदकाधीनपाक्षिकप्राप्त्यपेक्षत्वे नियमविधित्वप्रसङ्गात्। किं तूत्तरे ऽहन् द्विरात्रस्य गृह्यत इति द्विरात्रसामान्यस्योत्तरे ऽहनि यः षोडशिग्रहनियमविधिश्चोदकाधीनपाक्षिकषोडशिग्रहप्राप्त्यपेक्षस्तल्लभ्यमङ्गिरसां द्विरात्रस्य द्विरात्रान्तराणां चोत्तरे ऽहनि समुच्चित्य प्राप्तं षोडशिग्रहनियममपेक्ष्येयं परिसंख्येति द्विरात्रान्तराणामुत्तरादह्नो नियमविध्यधीनः षोडशिग्रहनियम एव व्यावर्त्तते न तु चोदकलभ्यः पाक्षिकः षोडशिग्रहो ऽपीत्युपपादितं तन्त्ररत्ने। ननु सर्वद्विरात्रविषयं प्रत्यक्षं सामान्यशास्त्रं प्रथमप्रवृत्तमिति तेन सर्वद्विरात्रेषु प्राप्तं षोडशिग्रहनियममपेक्ष्य द्विरात्रान्तरेभ्यस्तत्परिसंख्या युज्यते। इह मन्त्रलिङ्गव-

त्वादश्वगर्दभरशनाग्रहणयोर्मन्त्रनियमकल्पनं प्रथमं न प्रवृत्तमिति कथं तल्लभ्यं तयोर्मन्त्रनियममपेक्ष्य गर्दभरशनातो मन्त्रनियमपरिसंख्या घटते। न च वाच्यं तत्रापि हिरावसामान्यविषयतया सामान्यद्वारेणाङ्गिरसां हिरावतदितरहिरावद्वयेषु विशेषेषु प्रवर्त्तमानादुत्तरेऽहन् हिरावस्य ग्रहात्तदिति शास्त्रादङ्गिरसां हिरावरूपविशेषविषयमेव शास्त्रं प्रथमं प्रवर्त्तते आहवनीयशास्त्रादिव पदशास्त्रमिति। सामान्यशास्त्रे हिरावमात्रमपि वर्णोपात्तमस्ति तदपि नास्ति षोडश्युत्तर इति शास्त्रे किं तु प्रकरणपर्यालोचनया तस्याङ्गिरसां हिरावसंबन्धो ऽवगन्तव्य इति तत्र सामान्यशास्त्रस्यैव प्रथमप्रवृत्तिमत्त्वादिति चेत्। नैवम्। षोडश्युत्तरइति शाब्दनियमपरिसंख्यायां परिसंख्येयनियमप्रापकप्रमाणस्य प्रथमप्रवृत्त्यपेक्षणे ऽप्यत्रार्थनियमपरिसंख्यायां तदपेक्षाभावात्। तर्कितां नियम्यप्रापकप्रमाणप्रवृत्तिमपेक्ष्यार्थनियमशास्त्रप्रवृत्तिवत्तर्कितां परिसंख्येयप्रापकप्रमाणप्रवृत्तिमपेक्ष्यार्थपरिसंख्याशास्त्रप्रवृत्तिसम्भवात्। कपालेषु श्रपयतीत्यत्रान्यत्स्यपुरोडाशश्रपणविषयतत्प्रवृत्त्यधीनप्रवृत्तिकव्रीहिनियमशास्त्रप्रवृत्तिमपेक्ष्य चित्रेष्टावर्णाव्रीहिनियमपरिसंख्यालाभस्य नवमश्लोकावतारिकायां प्रदर्शितत्वाच्च। न च वाच्यं परिसंख्यामात्रस्य नियतप्राप्त्यपेक्षत्वात्सर्वापि परिसंख्या नियमपरिसंख्यैव स्यादिति। यत्रानियतप्राप्तस्यानियामकतया प्रवृत्तं निवृत्तं वा प्रमाणमपेक्ष्य परिसंख्या। यत्र त्वनियतप्राप्तिरहितस्य नियतप्रापकतया प्रवृत्तं तर्कितं वा प्रमाणमपेक्ष्य परिसंख्या तत्राज्यभागौ यजती-

त्यादौ स्वरूपपरिसंख्येति व्यवस्थोपपत्तेः। अतः स्वरूपपरिसंख्या नियमपरिसंख्येति परिसंख्याया द्वैविध्यं लभ्यत एव। नियमे ऽप्येवं द्वैविध्यं दृश्यते। स्वरूपनियम. परिसंख्यानियम इति।व्रीहिभिर्यजेतेत्यादावनियतप्राप्तस्य व्रीह्यादिस्वरूपस्य नियमः।"पलोसयाजान्तान्यङ्गानि सन्तिष्ठन्त"इत्यादावनियतप्राप्तायाः प्राकृताङ्गपरिसंख्याया नियम इति तस्मादिह नियमपरिसंख्येति निर्द्धारणमुपपद्यत इति। इदमपि सर्वमवहननविधिसाधारणम्। एवमेव हि तस्याप्यवहनननियमपरिसंख्यात्वमुपपद्यते। ननु व्रीहीनवहन्तीत्यत्रावहननरूपपरिसंख्या तन्नियमपरिसंख्या वेत्युभयस्ते ऽस्मिन्पक्षद्वये ऽप्ययं विधिरनन्यलभ्यां परिसंख्यामिवान्यलभ्यमपि नियमं स्पृशत्येवं तत्रावहननस्वरूपपरिसंख्यापक्षे नियमपरिसंख्ययोरेकवृन्तगतफलद्वयन्यायेन परस्परानपेक्षयोर्व्रीहिष्ववहननसंबन्धकरणेनार्थोल्लाभः। तन्नियमपरिसंख्यापक्षे व्रीहिष्ववहननसंबन्धो बोधयन्विधिस्तस्य लोकतः पाक्षिकीं प्राप्तिं परामृश्य तन्नियमे ऽवतरन्नियमस्यापि मन्त्रसामर्थ्यादिलभ्यत्वं परामृश्य नियमपरिसंख्यायां पर्यवस्यतीति नियमतत्परिसंख्ययोः पौर्वापर्येण लाभ इत्येवविशेषः। एवं पक्षद्वये ऽपि नियमस्पर्शावश्यम्भावे सति यवपरिसंख्या न सम्भवति व्रीहिस्वरूपतद्गतवैतुष्यानुपयोगिनो नियमस्यानर्थक्यपरिहाराय व्रीहिगतापूर्वीयत्वरूपोपयोगितासिद्धये व्रीहिपदे ऽपूर्वीयत्वरूपलक्षणावश्यम्भावेनावहनननियमे यवसाधारण्यस्यावर्जनीयत्वात् इति चेत्। इदमपि चोद्यमेवं सति प्रसिद्धो ऽपि परिसंख्याविधिर्न स्यादित्यने-

नैव दत्तोत्तरं इत्यश्वाभिधानीमादत्त इति प्रसिद्धपरिसंख्याविधिर्मन्त्रलिङ्गप्राप्तं मन्त्रादानसंबन्धमनूद्य मन्त्रस्याश्वाभिधानीसंबन्धं प्रापयन् गर्दभरशनातस्तं व्यावर्त्तयतीति हि भाष्यकारेणोक्तम्। अयमश्वाभिधान्यां मन्त्रनियममप्युक्तेन न्यायेन स्पृशेदेव। ततश्चाश्वाभिधानी तत्स्मरणानुपयोगिनो नियमस्यानर्थक्यपरिहारायाश्वाभिधानीगतापूर्वीयत्वोपयोगित्वसिद्धये ऽश्वाभिधानीपदे ऽपूर्वीयत्वलक्षणावश्यमापतति अपूर्वीयत्वं च गर्दभाभिधानीसाधारणमिति कथं ततो मन्त्रो व्यावर्त्तताम्। न हि बृहद्रथन्तरयोरिवाश्वगर्दभरशनयोर्भिन्नापूर्वानुप्रवेशो ऽस्ति येन बृहद्धर्माणां रथन्तर इवापूर्वीयत्वलक्षणाभ्युपगमे ऽप्यश्वाभिधानीधर्माणां गर्दभाभिधान्या सांकर्यं न स्यात्। यद्यप्यत्र।

तस्मान्नादत्त इत्येतद्रूपाप्राप्तमनूद्यते।
न चेयमश्वाभिधानीमित्येतदेवं विधीयते॥
किं त्वश्वरशनामन्त्रधात्वर्थैर्युगपत्त्रिभिः।
विशिष्टा भावनैवैका प्रत्ययेन विधीयते॥

इति वार्त्तिकोक्तं विशिष्टविधिपक्षमवलम्ब्याश्वाभिधान्युद्देशेन मन्त्रस्याविधानात् नाश्वाभिधानीपदे ऽपूर्वीयत्वलक्षणाप्रसक्तिरिति परिहर्तुं शक्य तथाप्ययं परिहारो न सार्वत्रिकः। तथैव व्रीह्यवहननविशिष्टभावनाविधिरिति प्रकृते ऽपि वक्तुं शक्यत्वात्। विशिष्टविधिपक्षे ऽपि फलतः परिसंख्याप्रयोजनं विधेः किं स्यादस्येति सुनिरूपणेन गर्दभाभिधानी-

तः फलमन्यन्निवर्त्तनादिति तच्च वार्त्तिकोक्तया रीत्यापि सुलभैव । तस्मात्प्रोक्षणावहननविध्योर्यवपरिसंख्यार्थत्वे न काचिदनुपपत्तिः । नन्वेवं सति व्रीहिभिर्यजेतेतिविधिर्व्रीहिसंस्काराणां यवसाधारण्यापादनार्थ इति त्वया व्यवस्थापितं न सिद्ध्येदिति चेत् । एवं तर्हि प्रोक्षणावहननविधी यवपरिसंख्यार्थौ माभूतां, प्रोक्षणविधिः प्रोक्षणस्याध्वर्युकर्तृकत्वं नियच्छन्नियमविधिरवहननविधिरवहननस्य तदेव प्रयच्छन्नपूर्वविधिरस्तु, प्रोक्षणस्य हि मन्त्रलिङ्गकल्प्यश्रुतिविधेयत्वे कल्प्यश्रुतावाध्वर्यवादिसमाख्यानाभावात्तवानियमेन यः कश्चित् ऋत्विक् कर्त्ता प्राप्नुयात् प्रत्यक्षश्रुतिविधेयत्वे तु तत्राध्वर्यवसंज्ञककाण्डाम्नानेनाध्वर्यवसमाख्यालाभादध्वर्युरेव कर्त्तेति नियमो लभ्यते । तथावहननस्य मन्त्रलिङ्गादिकल्प्यश्रुतिमूलत्वे द्वंद्वसंपादनविधिवशात्तव यजमान एव कर्त्ता प्राप्नुयात् । तथा हि याजमानकाण्डे वत्सं चोपावसृजत्युखाञ्चाधिश्रयत्यवहन्ति विष्टपदौ च समाहन्तीत्याद्यनुकीर्त्त्य एतानि वै द्वादशद्वन्द्वानि दर्शपूर्णमासयोस्तानि संपाद्य यजेतेति श्रूयते । तत्र द्वन्द्वसंपादनं नाम क्रियाविशेषेण द्वयोः प्रत्यासन्नत्वसंपादनम् । यथा वत्सोपावसर्जनक्रियया धेनुवत्सयोर्यथा वावहननक्रियया मुसलोलूखलयोः, ताश्च द्वन्द्वसंपादिन्यो द्वादशापि क्रियाः समाख्यावशाद्यजमानेन कर्त्तव्याः प्राप्ताः । आध्वर्यवकाण्डेऽपि वत्सानुपावसृजत्युखामधिश्रयति व्रीहीनवहन्तीत्यादिश्रवणात् अध्वर्युणा कर्त्तव्याः प्राप्ताः । न चामां द्वाम्नातानामपि वाजस्य मा प्रसवेनेत्यादिमन्त्रोच्चारणवद्वय-

कर्तृकत्वं सम्भवति एकेन कृतानामितरेण कर्तुमशक्यत्वात् । अत एकः कर्त्तेति स्थिते कः कर्त्तेति विशेषाकाङ्क्षायामाध्वर्यवकाण्डमध्ये याजमानकाण्डाम्नानेन विशेषसमाख्यानाद्यजमानः कर्त्तेति प्राप्ते तासां क्रियाणां समुपेणाध्वर्यवकाण्डे विधानादध्वर्युरेव साक्षात्कर्त्ता । याजमानकाण्डे द्रव्यसंपादनात्मना यजमानः स्मारकतया प्रयोजको भविष्यतीत्यविरोध इति समर्थितं याजमाने समाख्यानात्कर्माणि याजमानानि स्युरिति तार्त्तीयाधिकरणे । तत्र यथाध्वर्यवकाण्डे वत्समुपावसृजतीत्यादिवद्व्रीहीनवहन्तीति विधिरपि नाश्रोष्यत् तदाक्रियान्तरेषु विध्यन्तरानुसारेण यजमानस्य प्रयोजकत्वे ऽप्यवहनने याजमानविधिस्वारस्यभङ्गायोगात्तत्र तस्य साक्षात्कर्तृत्वमापत्स्यत् । अतो व्रीहीनवहन्तीति विधिना तत्राप्राप्तमध्वर्योः कर्तृत्वं लभ्यते । एवं च प्रोक्षणविधिरन्यलभ्यं प्रोक्षणं द्वारीकृत्य कर्तृनियमे पर्यवसानान्नियमविधिरवहननविधिलभ्यमवहनननियमं द्वारीकृत्य कर्तृप्राप्तौ पर्यवसानादपूर्वविधिरित्येव परिणमेत् । सर्वथापि प्रोक्षणविधिरपूर्वविधिरवहननविधिर्नियमविधिरित्युदाहरणमयुक्तमिति भावः । उक्तन्यायेन परिसंख्योदाहरणमपि कर्तृनियमार्थमेव स्यान्न तु परिसंख्यार्थमिति तदुदाहरणमप्ययुक्तमित्याह ।

एवं चाश्वाभिधानीग्रहविधिरपि तत्कर्तृनैयत्यमात्रप्राप्त्यर्थः पर्यवस्योत्प्रयनविधिरिव प्राप्त-

मन्त्रानुवादी ॥ मन्त्रे ऽप्यन्याप्रसक्तौ विधिरिह सगुणप्राक्तताङ्गोक्तनीतिः न ह्यास्येन्मन्त्रमात्रे सति विधिविषये स्याद्विशिष्टानुवादः ॥ २७ ॥

विध्यन्तरावकाशसत्त्वे जघन्यपरिसंख्यार्थत्वं न स्वीकर्त्तव्यमिति प्रागुक्तम्। प्रोक्षणावहननविध्योश्च कर्तृनियमप्राप्त्यर्थतया चारितार्थ्यमुक्तं तेन न्यायेन परिसंख्योदाहरणे ऽपि कर्तृनियमार्थतैव स्यात्। अर्थप्राप्ते ग्रहणे ऽध्वर्योः पाक्षिकत्वेन नियमविध्यवकाशसत्त्वात्। तत्र मन्त्रग्रहणं कर्तृनियमार्थं प्रथनविधाविव लिङ्गप्राप्तस्य मन्त्रस्यानुवादकं स्यात् "उरु प्रथस्वेति पुरोडाशं प्रथयती"ति विधिर्न प्रथनविधिः प्रथनस्य पुरोडाशान्यथानुपपत्तिलभ्यत्वात्। नापि तत्रोरु प्रथस्वेति मन्त्रविधिस्तस्य मन्त्रलिङ्गादेव प्रथने प्राप्तिसत्त्वात्, किं त्वन्यलभ्यप्रथनविधानद्वारा ऽऽध्वर्युकर्तृकत्वनियमार्थस्तत्र मन्त्रग्रहणं लिङ्गप्राप्तानुवाद इति व्युक्तं मन्त्राधिकरणे। ननु प्रथनविधौ लिङ्गप्राप्तस्य मन्त्रस्य विधाने प्रयोजनाभावादस्त्वनुवादः। इह तु लिङ्गात्प्राप्नुवन्मन्त्रो गर्दभरशनायामपि प्रसज्येतेति तद्व्यावर्त्तनेन मन्त्रविधेः प्रयोजनवत्त्वादिह मन्त्रांशे ऽपि विधिः स्यात्। तस्मात्परिसंख्यायाः समाख्यालभ्यकर्तृनियमाविरोधित्वेन

तदर्थत्वे परिसंख्यार्थत्वं नाभ्युपगन्तव्यमिति निर्बन्धाभावादिति चेत् । सत्यमिदम परिसंख्यालाभार्थं मन्त्रस्यापि विधानं विकृतिषु सगुणप्राकृताङ्गपुनःश्रवणान्यधिकृत्य विकृतौ शब्दवत्त्वात्प्रधानस्य गुणानामधिकोत्पत्तिसन्निधानादिति दाशमिकाधिकरणे प्रदर्शितन्यायो न सहते । एकादशप्रयाजान्यजति हिरण्यगर्भः समवर्त्तताग्रे इत्याघारयतीत्यादौ यत्र प्राकृतं प्रयाजाघारादिकमङ्गं वैकृतसंख्यामन्त्रादिगुणयुक्तं श्रूयते तत्र गुणमात्रविधाने प्राकृतगुणस्य स्थाने वैकृतगुणनिवेशमात्रं लभ्यते । यथेहाश्वाभिधानीगृहणमात्रविधाने तत्र कर्तृनियममात्रप्रयाजादिप्राकृताङ्गस्यापि विधाने गृहमेधीयाज्यभागविधानन्यायेन तस्य चोदकलोपकतया प्राकृताङ्गान्तरपरिसंख्यापि लभ्यते । यथेह मन्त्रस्यापि विधाने गर्दभरशनागृहणपरिसंख्यापि लभ्यते । अथापि तस्मिन्नधिकरणे विशिष्टविधिगौरवपरिजिहीर्षया गुणमात्रविधिमङ्गीकृत्य परिसंख्या निवारिता । एवमिहापि विशिष्टविधिगौरवपरिहाराय कर्तृनियमार्थमश्वाभिधानीगृहणमात्रविधानमङ्गीकर्त्तव्यं न तु परिसंख्यार्थं मन्त्रविधानमपीति तेनैव न्यायेन प्राप्नोति । ननु तर्हि तत्र संख्यादिवदिह मन्त्र एव विधीयताम् । एवमपि विशिष्टविधिगौरवपरिहारलाभात् चोदकप्राप्तप्रयाजादिवदर्थप्राप्तस्य गृहणस्यानुवादसम्भवादिति चेत् । किं तदा गृहणमात्रे मन्त्रविधिरश्वाभिधानीगृहणे वा । आद्ये मन्त्रलिङ्गादेव प्राप्तिसम्भवाद्विधिवैयर्थ्यम् । द्वितीये विशिष्टानुवादः स्यात्तथा च विशेषणांशाविवक्षया

पुनरपि तदेव विधिवैय्यर्थ्यम्। अश्वाभिधानीमात्रमन्त्रविधिरित्यभ्युपगमे ऽप्युक्त एव दोषः। विशिष्टानुवादपरिहाराय तत्राप्यश्वविशेषणस्याविवक्षणीयत्वात् तस्माद्यस्योभयं हविरार्त्तिमार्च्छेत्तरसमयाः सवनीयाः पुरोडाशाः ऐन्द्रवायवाग्रं प्रथममहरित्यादिष्विव वाक्यभेदाप्रसङ्गाय विशिष्टानुवादस्य परिहरणीयत्वादेकादश प्रयाजान्यजतीत्यादिष्विव सतिसम्भवे विशिष्टविधिगौरवस्यापि परिहरणीयत्वादिह चार्थप्राप्तग्रहणविधानेन कार्ट्स्न्यनियमार्थतया विधिचारितार्थ्यसम्भवात्तत्र नियमविधित्वमेव न्याय्यं न तु परिसंख्याविधित्वम्। नन्वेकादशप्रयाजान्यजतीत्यादिषु प्रयाजानुवादस्याश्रितविधीयमानगुणाश्रयसमर्पकतयोपयोगः। इह त्विमामगृभ्णन्निति मन्त्रानुवादस्य न तथा ऽप्युपयोगः। न च परिसंख्यार्थत्वेनोपयोगसम्भवे प्रथममन्त्रवन्निष्फलानुवादत्वकल्पनं युक्तमिति चेन्मैवम्। ब्रह्मसाम्न्यालभत इत्यत्र द्रव्यदेवताविशिष्टयागविधिगौरवपरिहाराय तत्पर्यग्निकृतानुत्सृजतीति पृथगाख्यातदुक्तस्य वाक्यस्य तद्वाक्यविधेयप्राजापत्यपश्वालम्भनोत्कर्षार्थप्राप्ततद्विषयव्यापारोपरमानुवादत्वकल्पनायाः संप्रतिपन्नत्वेनात्र मन्त्रविशिष्टग्रहणविधिगौरवपरिहाराय परिसंख्यापरिहाराय च मन्त्रप्रतीकोपादानमात्रस्यानुवादफलत्वकल्पनायामनुपपत्त्यभावात्। तस्माद्विशिष्टविधिगौरवस्य विशिष्टानुवादस्य च परिहाराय रशनाग्रहणविधिरेव, तस्याप्ययं कार्ट्स्न्यनियमफलको ऽभ्युपेय इति भावः। स्यादेतन्माभून्मन्त्रादश्वाभिधानीविशिष्टग्रहणविधिरश्वाभि-

धानीगृहणोद्देशेन मन्त्रविधिरश्वाभिधान्युद्देशेन मन्त्रविधिर्वा । अश्वमात्रोद्देशेन मन्त्रविधिस्तु स्यात् तत्र विशिष्टविधिगौरवस्य विशिष्टानुवादकृतवाक्यभेदस्य चाप्रसक्तेः । रशनागृहणप्रकाशकस्य मन्त्रस्य साक्षादश्वार्थत्वासम्भवात्तदीयरशनागृहणद्वारकत्वं पर्यवस्यतीत्यर्थः सिद्धार्थानुवादः परमभिधानीमादत्तइति फलं चास्य विधेर्गर्दभरशनायां मन्त्रपरिसंख्यैव । रशनागृहणप्रकाशनद्वारकमन्त्राश्वसंबन्धस्य मन्त्रलिङ्गतः प्राप्तुं शक्यत्वेन विधिफलत्वायोगादित्याशङ्क्याह ।

उद्देश्योऽत्राश्व एवेत्यपि न फलवती स्पष्टलभ्ये विधेये भावार्थे को हि विद्वान्विधिमिह तमुपेक्ष्यान्यसंक्रान्तमिच्छेत् । कर्त्तुं नैयत्यमेतत्फलमपि परिसंख्यावसाय्यस्तु नामस्पृष्टा नैषा हि दोषैर्न च भवति विधेर्विध्यनर्होपयानम् ॥ २८ ॥

अयमपि पक्षो न समञ्जसः समानपदोपात्तधात्वर्थविधाने श्रुतिप्रमाणके सम्भवति वाक्यप्रमाणकभिन्नपदोपात्तमन्त्रविध्यङ्गीकारस्यान्याय्यत्वात् । मन्त्रवि-

धिफलात्परिसंख्यानाद्ग्रहणविधिफलस्य कर्तृनियमस्याभ्यर्हितत्वाच्च । ननु च ग्रहणविधिलभ्यः कर्तृनियमोऽपि परिसंख्यापर्यवसाय्येव । तथा हि अश्वगर्दभरशनयोर्ग्रहणमन्त्रागृहीताभ्यां ताभ्यामश्वगर्दभयोर्बन्धुमशक्यत्वादर्थप्राप्तं न तु प्रत्यक्षश्रुतिविहितम् । अर्थप्राप्तेषु च नाध्वर्यवादिसमाख्यास्तीति समाख्यातः कर्तृनियमालाभादध्वर्योरुभयत्रापि पाक्षिकाप्राप्तिरूपा नियमप्रतावप्राप्तांशपरिपूरणरूपो नियमः क्रियमाणः स्वयमेव तावत्परिसंख्यात्मना पर्यवस्येत्तदनुनिष्पादिनी पक्षप्राप्तकर्त्रन्तरनिवृत्तिरपि परिसंख्यात्मना पर्यवस्येत् । उभयत्र पक्षप्राप्तानां कर्त्रन्तराणामेकत्र निवृत्तिरूपत्वादिति चेत्, अस्तु नामैवं, कर्तृनियमोऽपि परिसंख्यापर्यवसायी, तथापि सा परिसंख्या न दोषत्रयग्रस्ता, नापि विध्यनर्हविधिमूला, गर्दभरशनातो मन्त्रपरिसंख्या तु दोषत्रयग्रस्तेति दर्शयिष्यते । विध्यनर्हविधिमूले तु स्पष्टमेव क्रियामनन्तर्भाव्य मन्त्राश्वसंबन्धस्य विधातुमयोग्यत्वात् । तस्मादुदाहृतविधेः कर्तृनियमफलकत्वमेव युक्तम् । न तु मन्त्रपरिसंख्याफलकत्वमिति भावः । नन्विमामगृभ्णन्निति मन्त्रस्याध्वर्यवसमाख्यानेनैव तत्प्रकाश्यस्य ग्रहणस्याध्वर्युकर्तृकत्वनियमः सिद्ध्यति । अतस्तदर्थमर्थप्राप्तग्रहणविधेरनपेक्षितत्वाद्वाक्यस्यार्थवत्त्वाय परिसंख्याविधिरेवाङ्गीकरणीय इति चेन्मैवम् । अध्वर्यूच्चारितमन्त्रेणान्यस्याप्यनुष्ठेयार्थस्मरणसम्भवेन तावता ग्रहणस्याध्वर्युकर्तृकत्वासिद्धेः । अत एव प्रथनमन्त्रस्याध्वर्यवत्वेऽपि प्रथनस्याध्वर्यवत्वसिद्ध्यर्थं प्रथने विधिरङ्गीकृतो मन्त्रा

धिकरणे । अत एव मन्त्रकल्पसूत्रादितौल्येनोपदृष्टवचनस्यानुष्ठेयार्थस्मरणोपायत्वेन पक्षप्राप्तिरपि दर्शिता । ननु माभून्मन्त्रयोः समाख्यया मथनरशनाग्रहणयोरध्वर्युकर्तृकत्वसिद्धिः प्रोक्षणावहननयोस्तु स्यादेव । प्रोक्षामि वध्यासमित्युत्तमपुरुषेण प्रतीयमानस्य मन्त्रोच्चारयितृकर्तृकत्वस्य बाधकाभावेन त्यागायोगादिति चेत् । एवं तर्हि प्रोक्षणावहननविध्योः प्रथममुपपादितं यवपरिसंख्यार्थत्वमेवास्तु माभून्नियमापूर्वविधित्वम् । न च तथा सति व्रीहिशास्त्रं व्यर्थं स्यात् । प्रोक्षणावहननविध्योर्व्रीहिपदस्यापूर्वीयत्वलक्षणया यवसाधारण्यापादनेनैव तस्य फलवत्त्वादिति वाच्यम् । तस्याष्टशफपरिमाणपुरोडाशोत्पादनासमर्थाल्पव्रीहिलाभे प्रतिनिध्यनुपादानार्थतया चारितार्थ्यसंभवेन यवसाधारण्यापादनफलकत्वस्यानभ्युपगन्तव्यत्वात् । अपि च व्रीहिशास्त्रेणापि प्रोक्षणावहननयोर्यवसाधारण्यं कर्तुं न शक्यमिति तस्य तत्फलत्वाभ्युपगम एव न युक्त इत्यभिप्रेत्याह ॥

यद्व्रीहिप्रोक्षणादेर्यवमपि विषयं
तन्वते तच्च चिन्त्यं श्रुतापूर्वेण
दध्यानयनविधिनयादर्थवत्ता-
विधीनाम् ॥ नो चेन्नैमित्तिको
ऽपि प्रतिनिधिवदियात्सोमध-
र्मोपदेशान्नेच्छेत्संमीलनादीन्-

पि च पृथगपि स्तुत्यपूर्वाविभेदात् ॥ २९ ॥

व्रीहीन् प्रोक्षति व्रीहीनवहन्तीति अपूर्वनियमविध्युदाहरणयोर्व्रीह्युद्देशेन विधीयमानं प्रोक्षणमवहननं च यवसाधारणं, व्रीहिपदस्यापूर्वीयपरत्वादिति सिद्धान्तमर्यादाऽप्यनुपपन्ना। व्रीहिपदस्य मुख्यार्थपरत्वं परित्यज्यापूर्वीयाकरणत्वकत्वं किमर्थं कल्पनीयम्। न तावत्तदर्थस्य द्वितीयाप्रत्ययगतप्रोक्षणावहननसाध्यत्वनिर्वाहार्थं व्रीहीन्प्रोक्षति व्रीहीनवहन्तीति लौकिकप्रोक्षणावहननविषयपौरुषेयवाक्यइव तस्य जलसंयोगतुषविमोकरूपलौकिकफलविशिष्टतया तत्साध्यत्वोपपत्तेः। नापि तस्य प्रोक्षणजन्यादृष्टसंस्कारावहनननियमसाध्यत्वनिर्वाहार्थं तत्साध्यत्वस्याश्रुतत्वात्। क्रियासाध्यत्वरूपमात्रं हि द्वितीयाप्रत्ययगतं कर्मत्वम्। न तु क्रियाजन्यातिशयतन्नियमसाध्यत्वपर्यन्तम्। ननु तथापि प्रोक्षणजन्यसंस्कारावहनननियमयोर्वैफल्यपरिहाराय तत्साध्यत्वं व्रीहिशब्दसमर्पितस्यैव वक्तव्यमिति तदर्थमपूर्वीयाकरणत्वेति चेन्न, यदर्था व्रीहयस्तस्मिन्नपूर्वएव तयोरप्युपयोगसम्भवात्। "प्राङ्मुखोऽन्नानि भुञ्जीत" इत्यत्र हि प्राङ्मुखत्वनियमो भोजनस्वरूपानुपयोगी भोजनस्यापूर्वार्थत्वाभावेन तद्गतापूर्वीयत्वरूपोपयोगीत्यपि समर्थयितुमशक्यः सन्तत्कृप्तापूर्वोपयोगी कल्प्यते। इह कृते दर्शपूर्णमासिके प्रकरणिन्यपूर्वे विपरिवर्त्तमाने तयोस्तदुपयोगित्वं कथं न कल्प्येत। ननु च प्रोक्षणावहननयोरपूर्वीयव्री-

स्यार्थत्वाभावे तद्वाक्ययोर्व्रीहिपदं लौकिकापूर्वीयसाधारण्येन व्रीहिमात्रपरं वा स्यात्, लौकिकव्रीहिपरं वा । आद्ये विधिवैरूप्यापत्तिः, अपूर्वीयव्रीहिषु प्रोक्षणावहननयोर्विनियुक्तसंस्कारतया गुणकर्मत्वस्य लौकिकव्रीहिषु भूतभाविविनियोगरहितेष्वर्थकर्मत्वस्य च प्राप्तेः । द्वितीये द्वितीयाश्रुत्यवगतद्रव्यप्राधान्यभङ्गापत्तिः । तस्माद्विधिवैरूप्यपरिहाराय श्रुतगुणप्रधानभावनिर्वाहाय प्रोक्षणावहननयोः सामवायिकाङ्गत्वलाभाय च व्रीहिपदस्यापूर्वीयव्रीहिपरत्वावश्यंभावे सति तत्र लौकिकव्रीहिव्यावर्तकस्यापूर्वीयत्वस्यावश्यं विवक्षणीयत्वाद्व्रीहित्वस्यापि विवक्षायां विशिष्टानुवाददोषापत्तेः अपूर्वीयत्वस्य च यवसाधारणत्वात्प्रोक्षणावहननयोर्यवसाधारण्यमवर्जनीयमिति चेत् नैवम् । व्रीहिपदस्य व्रीहिमात्रपरत्वेऽपि तच लौकिकव्रीहिव्यावर्त्तकस्यापूर्वीयत्वस्यार्थलाभसम्भवेन विशिष्टानुवाददोषाप्रसङ्गात् । तथा हि अधिकारवाक्यस्य प्रकाराकाङ्क्षायामवहननवाक्यस्य फलाकाङ्क्षायां चावहननवाक्यस्यापि समिदादिवाक्यवदधिकारवाक्येनैकवाक्यता कल्पनीया । ततश्च तस्यैवमर्थः संपद्यते । अवहननेन व्रीहिद्वारेण स्वर्गार्थदर्शपूर्णमासयागापूर्वं प्रतिव्याप्रियेतेति । न चाऽतत्साधनभूतव्रीहिद्वारा तत्प्रतिव्यापर्त्तुं शक्यते । तेनार्थादेव यागार्थं निरुप्ता व्रीहय स्तेषामेवावहननमिति व्यवस्था सिद्ध्यति । एतेन प्रोक्षणमपि व्याख्यातम् । एवमर्थाल्लभ्ये प्रोक्षणावहननयोरपूर्वसाधनव्रीहिविषयत्वे व्रीहिपदस्य श्रुतव्रीहित्वपरित्यागेनापूर्वसाधनत्वेन लक्ष-

णा कल्पयितुमुचिता । अवश्यं च लौकिकमाधारपरेण नाकारेण शब्दसमर्पित एवापूर्वीयपदार्थे संस्कारकर्मान्वयबोधने सति तदनन्तरं तस्यापूर्वीयत्वावगतावर्थात्संस्कारस्यापूर्वीयविषयत्वपर्यवसानमित्ययं न्यायस्तप्ते पयसि दध्यानयतीत्यत्राङ्गीकरणीयः । तत्र हि पयःसंस्कारतया दध्यानयनं विधीयते नयतेर्द्विकर्मकत्वेन पयसः कर्मत्वावश्यम्भावात् । पयोदध्यानयनेन व्याप्यं प्रधानकर्मेति तद्गतस्य दध्यानयनाधारत्वस्य सप्तम्या निर्देशः । तत्तु दध्यानयनसंस्कृतं पयः सा वैश्वदेव्यामिक्षेति तदनन्तरवाक्ये प्रधानपरामर्शिना तच्छब्देन परामृश्य देवतासंयुक्तं क्रियते । तद्वाक्यसिद्धेन च द्रव्यदेवतासंयोगेन यागो ऽनुमीयते । तत्र संस्कारवाक्यप्रवृत्तिवेलायां पयसो ऽनुमास्यमानयागापूर्वार्थत्वानवगतेः । पयस्त्वेन शब्दसमर्पित एव पयसि संस्कारदध्यानयनान्वयबोधः, तदनन्तरं संस्कृतस्य पयसो देवतासंयोजने सति द्रव्यदेवतासंयोगानुमितयागापूर्वार्थत्वे ऽवगते संस्कारस्यार्थादपूर्वीयविषयत्वपर्यवसानम् । एवमिहापि प्रोक्षणावहननवाक्यश्रवणदशायां केवलं व्रीहित्वेन शब्दसमर्पितेषु व्रीहिषु प्रोक्षणावहननान्वयबोधः । तदनन्तरवाक्ययोरधिकारवाक्यैकवाक्यतादशायां प्रोक्षणावहननयोरपूर्वार्थत्वे ऽवगते तयोरर्थादपूर्वीयविषयत्वपर्यवसानमिति युज्यतएव । अपि च तयोरप्यपूर्वार्थत्वावगमनपेक्षायामप्यपूर्वीयव्रीहिविषयत्वमर्थाल्लभ्यते । यथोभावनुगतावग्नी अभिनिम्लोचेदभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्तिरित्यत्र हविरार्त्यधिकरणन्यायेन घृतस्याग्न्युभयत्वस्या-

विवक्षयान्यतराग्न्यनुगमने ऽपि पुनराधानप्रसक्तौ शब्दान्वयबोधवेलायामुभयत्वप्रहाणेनाग्न्यनुगममात्रस्य निमित्तत्वावगतावपि निमित्ते विधीयमानमाधानं सहितयोरेवाग्न्योरुत्पादनक्षमम् । न त्वेकैकस्याग्नेरिति विधेयसामर्थ्यादुभयोरग्न्यनुगमस्य निमित्तत्वलाभः एवमिहापि द्वितीयाश्रुतिनिर्दिष्टव्रीहिगुणतया विधीयमानं प्रोक्षणमवहननं च भूतभाव्युपयोगरहितलौकिकव्रीहिविषयं भवितुं न योग्यमिति विधेयसामर्थ्याच्छाब्दान्वयबोधानन्तरमपूर्वीयव्रीहीणां विषयत्वलाभः संभवतीति किमनुपपन्नम् । अवश्यं चात्राप्येवमेवोपपादनीयम् । अन्यथा शाब्दान्वयबोधवेलायामपूर्वीयत्वविवक्षायां तस्य जुह्वादिसाधारण्याज्जुह्वादिष्ववहननस्य कपालश्रपणवददृष्टार्थताया वक्तव्यत्वाच्च । विधिवैरूप्यापत्तिं तण्डुलप्रणाडिकापूर्वीयत्वविवक्षायां विशिष्टानुवाददोषापत्तिं वा को वारयिता । अपि च यदा व्रीहिषु विहितमवहननादिकमपूर्वीयत्वलक्षणया यवेष्वपि स्यात् तदा सोमे विहितं क्रयादिसंस्कारजातं फलचमसे ऽप्युपदेशत एव स्यात् । हविःप्रकृतित्वेन सोमयागापूर्वसाधनत्वस्य तत्रापि सत्त्वात् । ननु नित्यस्य क्रयादिसंस्कारजातस्याधिकारान्वये नैमित्तिकत्वादनित्यः फलचमसोद्वारं भवितुं नार्हति स्वयं च विशिष्यतया तेनान्वेतुं नार्हति । न खल्वभिषवेन नित्यं ज्योतिष्टोमस्योपकुर्यादनित्यफलचमसद्वारेति युज्यते । नापि नित्याभिषवविशिष्टेन फलचमसेन निमित्तवान्यजेतेति युज्यते । तस्मान्नित्यानित्यसंयोगविरोधान्न फलचमसस्य

सोमसामानविध्यमिति चेत्यादेतदेवम् । यदि फलचमसत्वाकारेण स वाक्यार्थान्वयी स्यात् सोमं क्रीणातीत्यादिसंस्कारवाक्येषु सोमपदलक्षितापूर्वसाधनत्वाकारेण स वाक्यार्थान्वयी चेत्कः प्रसङ्गो नित्यानित्यसंयोगविरोधस्य सर्वत्रापि हि ज्योतिष्टोमप्रयोगे हविःप्रकृतित्वेन तदपूर्वसाधनीभूतः फलचमसः सोमो वास्त्येव । यद्येवमपि फलचमसस्यासाधारणरूपेण नित्यत्वमालोच्य नित्यानित्यसंयोगविरोधः शङ्कीत तदा व्रीहिसोमादिप्रतिनिधिनीवारपूतीकादीनामपि तत्तत्संस्कारोपदेशेषु सामानविध्यं न सिध्येत् । ननु व्रीहिसोमादिमुख्यालाभे नीवारपूतीकाद्याः स्वयमेव तत्तत्स्थानेनोपादीयन्ते येन तदुपादानस्य मुख्यालाभनिमित्तकत्वेनानित्यत्वान्नित्यसंस्कारान्वये नित्यानित्यसंयोगविरोधो भवेत् किं तु व्रीह्यादिसदृशेषु नीवारादिषु ये व्रीह्याद्यवयवास्त एवोपादीयन्ते ते च व्रीह्याद्यनुप्रविष्टतत्तदवयवव्रीह्यादिशास्त्रमुख्यार्था एवेति । न नित्यानित्यसंयोगविरोधप्रसक्तिरिति चेत् । एवं तर्हि मुख्यप्रतिनिध्युभयलाभे कदा चिदिच्छया प्रतिनिध्युपादानमपि प्रसज्येत व्रीह्यादिशास्त्रमुख्यार्थत्वाविशेषात् । ननु मुख्यप्रतिनिध्योर्व्रीह्याद्यवयवभूयस्त्वाल्पत्वाभ्यामस्ति विशेषः । तथा च व्रीह्यादिगतसमग्रावयवोपादानसम्भवे नीवारादिगतविकलावयवोपादानं न प्रसज्येत इति चेत्, तर्हि व्रीह्यादिगतसमग्रावयवालाभनिमित्तमेव नीवारादिगतविकलावयवोपादानमिति कथं नित्यानित्यसंयोगविरोधो न भवेत् । किं च सोमाभावे पूतिकानभिषुणुयादिति विधिना स्व-

एवमेव पूतीकानां सोमाभावनिमित्तकत्वमवसीयते । नन्वत्र सोमाभावे निमित्ते पूतीका न विधीयन्ते किं तु सोमाभावे तत्सदृशानामन्येषामेव बह्ववयवजिघृक्षयोपादाने प्राप्ते तेन मन्दसदृशाः पूतीका नियम्यन्तइति तृतीयषष्ठयोरुक्तमिति चेत् किं ततस्तेनापि नैमित्तिकत्वमेवायाति सप्तमीश्रुतिप्राप्तं सोमाभावस्य निमित्तत्वं पूतीकानां तद्गतसोमावयवानां वा साधनत्वे किं चिदपि न भिद्यते । तस्मात्तत्रैवं नित्यानित्यसंयोगविरोधः परिहरणीयः । यद्यपि नीवारपूतीकादिगतव्रीहिसोमाद्यवयवास्तदसाधारणरूपेण मुख्यालाभनिमित्तकत्वादनित्यास्तथापि प्रोक्षणादिशास्त्रगतव्रीह्यादिपदतात्पर्यविषयेण साधारणरूपेण नित्या एवेति । अयं परिहारो नैमित्तिके फलचमसादावपि समानः । एवमेव हि"यदाहवनीये जुहोती"त्यादिष्वपि नित्यानित्यसंयोगविरोधः परिहरणीयः । अन्यथा तत्राप्याहवनीयस्यैष्टिकसौमिकाद्यपूर्वार्थत्वं नित्यवदाम्नातं नारिष्टहोमादिद्वारैव स्यादिति भेदनादिनिमित्तहोमानामाहवनीयाधारत्वं न सिद्ध्येत् । क्व तर्हि नित्यानित्यसंयोगविरोधः । यत्रानित्यमेकमेव द्वारं भवति तत्रैव यथा"भिन्ने जुहोती"ति । अत्र हि होमो भिन्नाधिकरणकस्तत्संस्कार इति पूर्वपक्षे भिन्न इत्यस्य संस्कार्यपरतया निमित्तपरत्वाभावेन होमो नित्यः स्यात्तद्वारं तु भिन्नमनित्यमेवेति नित्यानित्यसंयोगविरोधः । तस्मात्प्रतिनिधीनां मुख्यसामानविध्यं नैमित्तिकानां नित्यसामानविध्याभावं च व्यवस्थयाभ्युपगच्छद्भिर्मीमांसकैः संस्कारवाक्यगतव्रीहिसोमादिपदानामपू-

वीयत्वलक्षणां परित्यज्य मुख्यार्थपरत्वमेवाभ्युपेत्य प्रतिनिधिगतमुख्यावयवानां वीह्यादिगततदवयवानामिव व्रीह्यादिपदमुख्यत्वान्मुख्यसामानविध्यं, फलचमसस्य सोमपदविषयत्वाभावान्न सोमसामानविध्यमित्येव सा व्यवस्थोपपादनीया । प्रतीयते च तत्तदधिकरणपर्यालोचनया तथैवाभ्युपेत्य सा व्यवस्थोपपादितेति कथमिति चेत् । उच्यते । नैमित्तिकमतुल्यत्वादसमानविधानं स्यादिति तार्तीयाधिकरणे"यदि राजन्यं वैश्यं वा याजयेत् यदि सोमं विभक्षयिषेन्न्यग्रोधस्तिभिनोराहृत्य ताः संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोममि"ति वाक्यमुदाहृत्यात्र राज्यन्यवैश्यनिमित्तेन सोमस्थाने विधीयमानः फलचमसः संस्कारवाक्येषु सोमेन समानविधानः स्यादुतासमानविधान इति संशय्यापूर्वीयत्वाविशेषात्समानविधान इति पूर्वपक्षं कृत्वा नित्यमभिपवे सा ज्योतिष्टोमस्योपकुर्यान्नैमित्तिकफलचमसद्वारेत्येवमन्वये नित्यानित्यसंयोगविरोधान्न समानविधान इति सिद्धान्तितम् । अनेनापूर्वीयत्वमर्थाल्लभ्यं न सोमपदविषयः इति पूर्वपक्षबीजमाभासं मत्वा फलचमसस्य फलचमसत्वाकारेण संस्कारवाक्येषु सोमपदविषयत्वं न सम्भवतीति दूषणं च स्पष्टत्वादुपेक्ष्य तस्य तथा तद्विषयत्वसम्भवेऽपि नित्यानित्यसंयोगविरोधादुपदेशतः संस्कारान्वयो न युज्यतइति प्रतिपादितमित्यवसीयते । अन्यथाऽपूर्वीयत्वाकारेण फलचमसस्य संस्कारवाक्यानुप्रवेशव्याशङ्कितवन्तं प्रति फलचमसत्वाकारेण नित्यानित्यसंयोगविरोधोद्भावनायोगात् । तथा प्रतिनिधिषु स-

द्दिति तदनन्तराधिकरणे व्रीह्यादिप्रतिनिधयो नीवारादयोऽपि व्रीह्यादिभिर्न समानविधाना व्रीह्याद्यभावे निमित्ते उपादीयमानत्वेन नैमित्तिकतया फलचमसतुल्यत्वादिति पूर्वपक्षं कृत्वा मुख्याभावे नीवाराद्या न यागसाधनत्वेनोपादीयन्ते तद्गता व्रीह्यवयवा एव तु सकलासम्भवाद्विकला उपादीयन्ते नीवारावयवोपादानं त्वनुषङ्गादवर्जनीयतया व्रीह्यवयवाश्च व्रीहिगता इव नीवारगता अपि व्रीहिशब्दविषयतया संस्कारविध्यन्विता एव । अतः समानविधाना इति तद्द्वयोरनैकत्वादितिसूत्रेण सिद्धान्तितम् । अनेनापि संस्कारवाक्येषु व्रीह्यादिशब्दानां मुख्यार्थविवक्षा स्पष्टमेवावसीयते अपूर्वीयत्वाविवक्षायां नीवारादिकस्याप्यपूर्वीयत्वेन संस्कारविध्यन्वयस्य सूपपादनया तेषां साधनत्वनिराकरणेनानुपयोगप्रसङ्गात् । स्यादेतन्नैमित्तिकप्रतिनिध्योर्नित्यसंयोगविरोधप्रसङ्गतदप्रसङ्गौ न मुख्ययुक्तित्वेनासामानविध्यसामानविध्यव्यवस्थापकौ किं तु द्विरुक्तिप्रसङ्गतदप्रसङ्गौ । तथा हि नित्यं नैमित्तिकं च न युगपद्विधेयं किं तु नित्यं सोमादिद्रव्यं सामान्येन विधाय सर्वत्र तस्यैव प्राप्तौ राजन्यादिनिमित्ते सति विशेषरूपेण नैमित्तिकं फलचमसादिविधेयम् । तदस्यां वेलायां स्वाभाविकनित्याङ्गविधेयं तस्यामेव संस्कारविधयस्तन्मात्रविशेषणत्वेन स्वार्थं विधाय निवृत्तव्यापारा न भूयः शक्नुवन्ति नैमित्तिकविशेषणत्वेनापि स्वार्थं विधातुमावृत्तिप्रसङ्गादित्येवं द्विरुक्तिप्रसङ्गो नैमित्तिकस्यासामानविध्यव्यवस्थापकः । तदप्रसङ्गः प्रतिनिधेः सामानविध्यव्यवस्था-

पक्षः । न हि सामान्यविशेषरूपेण भिन्नविधिविधेययोर्नित्यनैमित्तिकयोरिव मुख्यप्रतिनिध्योर्व्रीह्यादिपदविषयत्वाविशेषाद्व्रीहिभिर्यजेतेत्याद्येकविधिविधेययोर्विधानायौगपद्यमस्ति येन द्विरुक्तिराशङ्क्येतेति । एवं द्विरुक्त्यापादकं विध्ययौगपद्यमेवातुल्यत्वादिति नैमित्तिकाधिकरणसिद्धान्तहेतुपरशब्देन विवक्षितम् । द्विरुक्तिशङ्कापलापकं विधानैक्यमेव च प्रयोजनैकत्वादिति प्रतिनिध्यधिकरणसिद्धान्तहेतुपरशब्देन विवक्षितम् । विधानं हि वाक्यस्य प्रयोजनमिति चेत् उच्यते । एवमपूर्वीयत्वविवक्षाविरोधो नापैत्येव । यस्यां वेलायां व्रीहिभिर्यजेतेत्यादिशास्त्रं प्रवर्त्तते तस्यामेव वेलायां व्रीह्यादिविशेषणत्वेन संस्कारवाक्यैरवहननादीनि समर्प्यमाणानि व्रीहित्वादिनैव तदन्वयं लभेरन्नापूर्वीयत्वेन । तस्य व्रीहिशास्त्रादिप्रवृत्तेः पूर्वमनवगमात् । ननु तर्हि व्रीहिशास्त्रादिप्रवृत्त्यनन्तरमेवावहननादीनां तदन्वयोऽस्तु । तथा च व्रीहिशास्त्रादवगतापूर्वीयत्वाकारेण तेषां व्रीह्याद्यन्वय उपपद्यते । यवशास्त्रस्याप्यनैमित्तिकत्वेन व्रीहिशास्त्रसमकालप्रवृत्तिकतया यवानामप्यपूर्वीयत्वेन क्रोडीकाराद्यवसाधारण्यमपि तेषामुपपद्यते । नैमित्तिकशास्त्राणां तु नित्यशास्त्रप्रवृत्त्यनन्तरभावित्वेन संस्काराणां नित्यान्वयवेलायां नैमित्तिकगतापूर्वीयत्वानवगत्या तत्साधारण्याभावश्चोपपद्यते इति सर्वं समञ्जसमिति चेत् । एवं ह्यनैमित्तिकत्वेन स्वशास्त्रवदेव व्रीहिशास्त्रसमकालं प्रवृत्तियोग्यानामवहननादिशास्त्राणां यवसाधारण्यार्थमेव यवशास्त्रस्या-

पि प्रवृत्त्यनन्तरं प्रवृत्तिरभ्युपगम्यत इत्यायातम् । तथा नित्यधर्माणां नैमित्तिकसाधारण्यार्थं नैमित्तिकशास्त्रस्यापि प्रवृत्त्यनन्तरं संस्कारवाक्यानां प्रवृत्तिरित्यपि कुतो नाभ्युपगम्यते । वस्तुतस्तु व्रीहिभिर्यजेतेत्यादिशास्त्रैर्मुख्यानां व्रीह्यादीनामिव नीवारादिगतव्रीह्याद्यवयवानां नापूर्वीयत्वं सिद्ध्यति । व्रीहित्वादिजातिवाचिनां व्रीह्यादिशब्दानां तदवच्छिन्नव्रीह्यादिलक्षकत्वस्येव तदनवच्छिन्ननीवारादिगतव्रीह्यादिभावयोग्यावयवलक्षकत्वस्यासम्भवात् । किं तु व्रीहिशास्त्राद्यनुसारेण मुख्येष्वेव व्रीह्यादिष्ववश्यमुपादातव्येषु नियमारब्धकार्यं च कदाचिद्व्रीह्याद्यलाभे ऽप्यवश्यमनुष्ठेयमिति प्रधानानुसारेण यत्किंचिद्द्रव्याक्षेपे च प्रसक्ते व्रीहित्वादिनाव्यवच्छिन्नत्वे ऽपि तदवच्छेदात्वयोग्यतया मुख्यसन्निकृष्टानां नीवारादिगतव्रीह्यादिभावयोग्यावयवानां सम्भवे विप्रकृष्टद्रव्यान्तरोपादानायोगात्तएवोपादेया इत्येवंरूपोदाक्षेपात्तेषामपूर्वीयत्वं सिद्ध्यति । सोमाभावे तु भूयो ऽवयवलिप्सया मुख्यद्रव्याक्षेपे प्रसक्ते पूतीकोपादानमाक्षेपस्याप्यपवादकेन वचनान्तरेण सिद्ध्यति । ततश्च यदि मुख्यशास्त्रप्रवृत्त्यनन्तरमेव संस्कारशास्त्राणि प्रवर्तेरंस्तदामुख्याभावे निमित्ते सत्याक्षेपवचनान्तरावगम्यापूर्वीयभावानां प्रतिनिधीनामुपदेशतः संस्कारान्वयो न सिद्ध्येदिति तत्सिद्धार्थं मुख्यशास्त्रप्रवृत्त्यनन्तरभाविनामाक्षेपवचनान्तराणामपि प्रवृत्तिमपेक्ष्यैव संस्कारशास्त्रप्रवृत्तिरेष्टव्या । तथा सति नैमित्तिकानामपि नित्यसामानविध्यमपि निवारयितुं न शक्यसे । नन्वेवं सत्यपूर्वीयत्वलक्षणापक्षे

नैमित्तिकानां नित्यसामानविध्यं स्यादिति दूषणमिव मुख्यार्थविवक्षापत्ते प्रतिनिधीनां मुख्यसामानविध्यं न स्यादिति दूषणमापतेत् व्रीहिसोमादिविधायकशास्त्रस्थितानामिव तत्संस्कारविधायकशास्त्रस्थितानामपि व्रीहिसोमादिशब्दानां मुख्यमात्रपरत्वेन प्रतिनिधिसाधारण्याभावादिति चेत्। उच्यते। व्रीहिसोमादिसंस्काराणां द्वितीयाश्रुत्यादिभिर्व्रीह्याद्यर्थत्वेनावगम्यमानानां प्रकरणलभ्यतत्तदधिकारापूर्वार्थत्वस्य व्रीह्यादिद्वारैव निर्वहणीयत्वादपूर्वसाधनेतरव्रीह्यादीनां च तत्र द्वारत्वायोगात्। अपूर्वसाधनव्रीह्यादिगवेषणायां व्रीहिभिर्यजेत सोमेन यजेतेत्यादिशास्त्रैर्व्रीह्यादय इव न्यायेन वचनान्तरेण च नीवारपूतिकादिगतव्रीहिसोमादिभावयोग्यावयवा अपि तत्साधनत्वेनावगम्यन्तइति तेषामपि संस्कारान्वयितया द्वारत्वनिर्वाहाय संस्कारवाक्यगतव्रीह्यादिशब्दानां व्रीहित्वादिजातिवाचिनां साक्षात्तत्तदवच्छिन्नव्यक्तिमात्रलक्षणामपहाय साक्षात्परम्परया तदवच्छेदात्वयोग्यमात्रे लक्षणा कल्प्यते नीवारादिगतव्रीहिभावादियोग्यावयवाश्च व्रीह्यादिगतावयवा इव व्रीह्यादिव्यक्तिद्वारा तदवयवत्वयोग्या एवेति प्रतिनिधीनां मुख्यसामानविध्ये न काचिदनुपपत्तिः। यद्यपि प्रथमोपस्थितव्रीह्यादिव्यक्तिद्वारैव संस्काराणामधिकारापूर्वार्थत्वं निर्वहति तथापि पश्चादपि न्यायादिनापूर्वसाधनत्वेनावगम्यमानानां नीवारादिगतव्रीहिभावादियोग्यावयवानामवहननादिनियमे मध्यवर्त्यनियमस्यान्याय्यत्वादवहननादिनियमाकाङ्क्षायां तत्साधारणलक्षणा-

या तेषामपि संस्कारान्वयः कल्प्यते । तथा प्रथमप्रष्टस्योपदेशलब्धप्रकृत्यन्वयनिराकाङ्क्षाणां प्रयाजादीनां सौर्यचर्वाद्याकाङ्क्षानुसारात्साद्यात्येनातिदेशेन तदन्वयोऽपि कल्प्यते । नचैवं यवफलचमसाद्याकाङ्क्षानुसारात्तत्साधारणलक्षणया व्रीहिसोमादिसंस्काराणां तदन्वयोऽपि कल्प्यः स्यादिति वाच्यम् । व्रीहिसोमादिशब्दानां नीवारपूतीकादिगतव्रीहिसोमाद्यवयवेष्विव या फलचमसादिलक्षणा हेतोः प्रसिद्धसंबन्धस्याभावात् यथा कथं चिदप्रसिद्धेन संबन्धेन लक्षणाकल्पनादनियतैर्लौकिकैरवहननखविदलनादिभिस्तदाकाङ्क्षापूरणस्यैव युक्तत्वात् । अत एव "तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध: सुमनस्यमान" इति पुरोडाशप्रतिष्ठापनमन्त्रगतव्रीहिपदस्य व्रीहिप्रतिनिधिकृतपुरोडाशेषु लक्षणा हेतोः प्रसिद्धसंबन्धस्य सत्त्वात्तस्य मन्त्रस्य प्रवृत्तिर्न तु यवमयपुरोडाश इति तत्रिन्ननुष्ठेयार्थप्रकाशनमनियतेन लौकिकोपायेनैत्यङ्गीकृतम् । "धान्यमसि धिनुहि देवानिति" मन्त्रेण च सतुषद्रव्यवाचिनो धान्यशब्दस्य वितुषावस्थायां प्रसिद्धसंबन्धसत्त्वेन लक्षणया प्रवृत्तिमङ्गीकृत्य श्यामाकानामयने तरसमयपुरोडाशेषु प्रसिद्धसंबन्धाभावाल्लक्षणा न सम्भवतीति मांसमसीत्यूह एवोक्तः । प्रयाजादीनामपि प्रसिद्धदर्शपूर्णमाससंबन्धवत्सु सौर्यचर्वादिष्वेवान्वयः कल्प्यते न तु तद्रहितेषु दर्विहोमादिष्वपि यथा कथं चिदप्रसिद्धसादृश्यान्वेषणेन दर्विहोमादीनामिति कर्त्तव्यताकाङ्क्षा स्वर्थलभ्यस्वरूपनिष्पादनादिनैव पूर्यते। तस्मादवहननादिवाक्यगतव्रीह्यादिशब्दानां नीवारादि-

स्वरूपपरत्वपक्षे प्रतिनिधिर्नैमित्तिकयोः समानविषया-सामानविषयव्यवस्थापनं कथं चिन्मीमांसकरीत्योपपद्यते । तेषामपूर्वीयलक्षणापक्षे तु कथमपि सा नोपपद्यत इतिविशेषो विद्वद्भिः परिभावनीयः । अपि च यदि व्रीहिषु विहितप्रोक्षणावहननमपूर्वीयत्वलक्षणया यवेष्वपि स्यात्तदा पृष्ठस्तुत्यपूर्वीयसाधने रथन्तरे विहितं मीलनादिकं तदपूर्वसाधने बृहत्यपि प्रसज्येत । ननु रथन्तरे प्रस्तूयमाने संमीलयेत् बृहति प्रस्तूयमाने समुद्रं मनसा ध्यायेदिति संमीलनादिषु समुद्रध्यानादिषु रथन्तरबृहन्निर्देशभेदान्मीलनादयो रथन्तरस्यैव धर्माः समुद्रध्यानादयो धर्मा बृहत एवेति धर्मव्यवस्था भवति । उक्तं च नवमे सूत्रकृता निर्देशाद्यवतिष्ठेरन्निति न तथेह व्रीहीणां यवानां च व्यवस्थया धर्मविधानमस्ति येन व्रीहिधर्मा यवेषु न स्युरितीति चेत् । मैवम् । निर्देशभेदे सत्यपि तत्रापूर्वीयत्वलक्षणावश्यंभावेन मीलनसमुद्रध्यानादिधर्मसांकर्यस्य प्रतिषेद्धुमशक्यत्वात्, तत्र निर्देशभेदस्वारस्यनिर्वाहार्थमपूर्वीयत्वलक्षणां विनापि धर्मविधानोपपादने तथैव प्रोक्षणादिविधानस्याप्युपपादनसम्भवेन व्रीहिपदानां मुख्यार्थत्यागायोगात् । न चापूर्वीयत्वलक्षणायां सत्यामपि निर्देशभेदनिर्वाहार्थं रथन्तरत्वादिकमपि विवक्षितुं शक्यम् । वाक्यभेदावहस्य विशिष्टानुवाददोषस्यावश्यपरिहरणीयत्वात् । स्यादेतदग्नये च प्रजापतये च सायं जुहोति यत्सूर्याय च प्रजापतये च प्रातर्जुहोतीति निर्देशभेदादेव सायंप्रातर्होमयोरग्निसूर्यव्यवस्था दृष्टा न हि तत्र होमयोः सायंप्रातर्विशेषणे

विवचितुं शक्ते विशिष्टानुवाददोषापत्तिः । न च सायं-
प्रातःशब्दाभ्यां लक्षितयोर्होमयोस्तत्राग्निसूर्यविधानं जु-
होतीति तल्लक्षितहोमानुवादमात्रं नोद्देश्यसमर्पकम् ।
तथा च सायंप्रातःशब्दौ स्वार्थसंबन्धिनोरेव होमयोर्ल-
क्षकौ भवतो न तु होमान्तरयोरिति नाग्निसूर्ययोर-
व्यवस्थाप्रसङ्ग इति वाच्यम् । सायंप्रातःकालयोरेकस्यैव
होमस्याभ्यस्यमानतया होमभेदाभावेन सायंप्रातःका-
लोपलक्षितस्याग्निहोत्रहोमस्य प्रातःसायंकालयोरव्य-
नपायितया ऽनपायो हि कालस्य लक्षणं हि पुरोडा-
शाविति न्यायादापततो ऽग्निसूर्यसांकर्यस्यानिवार्यत्वा-
त् । सायंप्रातःकालविशिष्टहोमलक्षणायामपूर्वीयव्रीहि-
लक्षणायामिव विशिष्टानुवाददोषापत्तेः । तस्मान्नि-
र्देशभेदमात्रमेवावलम्ब्य तत्र व्यवस्थोपपादनीया एवसि-
द्धापि भविष्यतीति चेन्नैवम् । न ह्यग्निसूर्यवाक्ययोरग्नि-
सूर्यविधानं तत्र प्रजापतेरेव विधेयत्वात् । "अग्निर्ज्यो-
तिर्ज्योतिरग्निः स्वाहे"ति सायं जुहोति"सूर्यो ज्योतिर्ज्यो-
तिः सूर्यः स्वाहे"ति प्रातरिति वचनविनियुक्तमन्त्रवर्णप्रा-
प्ताग्निसूर्यानुवादेन प्रजापतिमात्रविधाने सम्भवति तयो-
रप्यत्रैव विधानस्वीकारे गौरवात् । तथा च प्रजापतेः
कालद्वये ऽपि सत्त्वेनाग्निसूर्यवत्कालव्यवस्थानपेक्षणान्नि-
र्देशभेदेन व्यवस्थायां नेदमुदाहरणम् । न च वाच्यं हो-
ममात्रानुवादेन प्रजापतेरेकस्यैवात्र विधेयत्वे वाक्यद्वयं
व्यर्थमिति । अग्निवाक्येन प्रजापतिविधाने तत्रत्याग्नि-
सायंपदयोरग्निसायंकालसंबन्धेन प्रजापतिस्तुत्यर्थतावत्
सूर्यवाक्यस्यापि सूर्यप्रातःकालसंबन्धेन तत्स्तुत्यर्थतोप-

पत्ते: । एवमपि सूर्यवाक्यमर्थवादरूपमनर्थकमायं स्यादिति चेत् । न । अग्निसूर्यवाक्याभ्यां सायंप्रातर्होमयोर्व्यवस्थया ऽग्निसूर्यविधाने ऽग्निसूर्यमन्त्रौ लिङ्गादेव सायंप्रातःकालयोर्व्यवतिष्ठेते इति तद्द्वयस्यामकवचनयोरनपेक्षणात्तयोरुभयोरप्यर्थवादो वेति मन्त्राधिकरणसूत्रोक्तरीत्यार्थवादतया वक्तव्यत्वेन तदपेक्षयाग्निसूर्यवाक्ययोरन्यतरस्यार्थवादताभ्युपगमस्यैव युक्ततरत्वात् । न च वाच्यमग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेत्येव सायं होतव्यं सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातरिति मिश्रलिङ्गविधिपर्युदस्तयोः शुद्धलिङ्गमन्त्रयोः प्रतिप्रसवार्थं तद्विधायकवचनद्वयमिति अग्निवाक्येनाग्नेः सायंहोमे सूर्यस्य प्रातर्होमे च व्यवस्थया विधाने सति शुद्धलिङ्गवचनद्वयमेव सायंप्रातर्होमयोर्लिङ्गाद्व्यवस्थया प्राप्नोति न तु मिश्रलिङ्गवचनद्वयं लिङ्गाविशेषादित्यपेक्षिततद्व्यवस्थार्थत्वेन सप्रयोजनस्य मिश्रलिङ्गविधिद्वयस्यानपेक्षिते ऽग्निहोत्रप्रकरणाम्नायावगततदङ्गभावस्य शुद्धलिङ्गमन्त्रद्वयस्य पर्युदासे व्यापाराभावे तत्प्रतिप्रसवानपेक्षणात् । एवं तर्हि मिश्रलिङ्गमन्त्रविधिद्वयं शुद्धलिङ्गमन्त्रविधिद्वयं च तवोदाहरणं स्यादिति चेत् नैवम् । तेषां मन्त्राणां स्वाहाकारलिङ्गेन होमाङ्गतयावगतानाम् आज्यभागक्रमाम्नातानां याज्यानुवाक्यानामिव केवलं कालयोरेव व्यवस्थापनस्यापेक्षितत्वेन तस्माद्वार्त्रघ्नी पौर्णमास्यामनूच्येते वृधन्वती अमावास्यायामितिवत् मिश्रलिङ्गशुद्धलिङ्गमन्त्रविधीनां तत्तत्कालसंबन्धमात्रपरतया तत एव मन्त्रलिङ्गव्यवस्थासिद्धेः । तस्माद्विशिष्टानुवादान-

पेक्षाया व्यवस्थाया निर्देशभेदमात्रात्सिद्धौ नेदमप्युदाहरणम्। ननु निर्देशभेदमात्राद्व्यवस्था सिद्धासम्भवे ऽपि अपूर्वभेदात् वृहद्रथन्तरधर्माणां व्यवस्था सिध्येत् अपूर्वभेदश्च वृहत्पृष्ठं भवती रथन्तरं पृष्ठं भवतीत्युत्पत्तिवाक्यभेदेन शूरत्वचित्रत्वादिस्तुतिप्रकारभेदेन च वृहद्रथन्तरसाधनकपृष्ठस्तोत्रभेदसत्त्वात् अपूर्वसाधनकर्मभेदे सत्यपूर्वभेदावश्यम्भावात्। नचैवं सत्यहृष्टार्थयोर्वृहद्रथन्तरपृष्ठयोः प्रयाजादिवत्समुच्चयापत्तिः। वचनबलाद्विकल्पोपपत्तेरिति चेत् मैवम्। पृष्ठैः स्तुवतइत्येतदेव माहेन्द्रादीनां चतुर्णां स्तोत्राणामुत्पत्तिवाक्यं वृहद्रथन्तरवाक्यद्वयं तु माहेन्द्रस्तोत्रे साधनमात्रविधायकमित्युपपत्तौ विशिष्टविधिगौरवस्य माहेन्द्रस्तोत्रतदपूर्वभेदकल्पनागौरवस्य चाभ्युपगन्तुमयुक्तत्वात्। ननु पृष्ठैः स्तुवतइत्येतदुत्पत्तिवाक्यमङ्गीकृत्य माहेन्द्रादीनां चतुर्णां स्तोत्राणां पृष्ठशब्दवाच्यत्वमुच्यतइति चेत्प्रकृतौ पृष्ठबहुत्वं नास्तीति शाबरमितसूत्रभाष्यविरोधः प्रसज्येत। अतो वृहद्रथन्तरवाक्यद्वयमेवोत्पत्तिवाक्यं तदुत्पन्नं वचनवशाद्विकल्पितं स्तोत्रद्वयमेव पृष्ठशब्दवाच्यमित्यङ्गीकर्त्तव्यम्। पृष्ठैः स्तुवतइति मैत्रावरुणस्तोत्रादिसाधारण्येन प्रयोगाङ्गविवदजहल्लक्षणयानुवादरूप इति चोपपादनीयमिति चेत् मैवम्। यथा खल्वाज्यैः पञ्चदशान्याज्यानि पञ्चदशं होतुराज्यं सप्तदशं मैत्रावरुणस्यैकविंशं ब्राह्मणाच्छंसिनः पञ्चदशमच्छावाकस्येत्यादिप्रयोगादच्चिःपवमानामन्तरभावीनि चत्वार्यपि स्तोत्राण्याज्यशब्दवाच्यानि एवं पृष्ठैः स्तुवते सप्तदशानि पृष्ठानि एकविंशं होतुः पृष्ठ

त्रिमत्वं मैत्रावरुणस्य सप्तदशं ब्राह्मणाच्छंसिनः पञ्चदश-
मच्छावाकस्येत्यादिप्रयोगान्माध्यंदिनप्रथमानानन्तरभा-
वीनि चत्वार्यपि स्तोत्राणि पृष्ठशब्दवाच्यानि । क्व चित्क्व
चित्कण्वरथन्तरं पृष्ठं सदोविंशायं ब्रह्मसामेत्यादौ होतुः
पृष्ठे विशिष्टपृष्ठशब्दप्रयोगस्तु धने द्रव्यशब्दप्रयोगवत् अ-
र्जुने पार्थशब्दप्रयोगवदापो वा ऋत्वियमार्च्छन्तासां वायुः
पृष्ठे व्यवर्त्ततेत्यादिश्रुतौ पृष्ठशब्दस्य प्रवृत्तिनिमित्तत्वेन
विवक्षितामपां पृष्ठादुत्पत्तिमव्यवहितां वामदेवो वा-
मदेव्यादुत्पन्नत्वेन व्यवहितां रथन्तरादिषु प्रदर्श्यापि त-
दनन्तरं पिता वै वामदेव्यं पुत्राः पृष्ठानीति रथन्तरादि-
ष्वेव पृष्ठशब्दप्रयोगवच्च निरूढिवशादितिकल्पनौचित्येन
पृष्ठैः स्तुवतइतिश्रुतेरनुवादत्वलाघवाणिकत्वकल्पनस्य वृ-
हद्रथन्तरवाक्ययोर्विशिष्टविध्यादिकल्पनस्य चायुक्तत्वा-
त् । प्रकृतौ पृष्ठबहुत्वं नास्तीति साम्प्रमिकव्यवहार-
स्य विश्वजिति विधानयोग्यं चोदकाप्राप्तं पृष्ठबहुत्वं ना-
स्तीत्येवमर्थतोपपत्तेः । अत एव तत्र ज्योतिष्टोमिकपृ-
ष्ठचतुष्टयस्य चोदकप्राप्तस्यानुवादे वैयर्थ्यमपि ग्रन्थकारै
र्दर्शितं वैयर्थ्यमप्यविगणयन्तं प्रतिरथन्तरं पवमाने कुर्या-
त् आर्भवे वृहन्माध्यत इतराणि वैरूपं होतुः पृष्ठं वैराजं
ब्रह्मसाम शाक्वरं मैत्रावरुणसाम रैवतमच्छावाकसामेति
षाडहिकपृष्ठविधित्वज्ञापकलिङ्गविरोधो ऽपि सूत्रकारे-
ण दर्शितः । ननु पृष्ठस्तोत्रभेदाभावे विकल्पवचनवैयर्थ्यं
स्यात् । वृहद्रथन्तरवाक्ययोरेकस्मिन्पृष्ठे वृहद्रथन्तरमा-
त्रविधायकतायां तयोरक्षराभिव्यक्तिरूपदृष्टप्रयोजननि-
र्वर्त्तने परस्परनिरपेक्षयोर्न्यायत एव विकल्पप्राप्तेः, विं-

कल्पवचनं च वृहद्रथन्तरं वा पृष्ठं कार्यमित्येवङ्रूपमस्ति इति ग्रन्थकारा व्यवहरन्ति । अतस्तत्वार्थकत्वाय वृहद्रथन्तरवाक्यद्वयविधेयं पृष्ठद्वयमङ्गीकर्त्तव्यमिति तदपूर्वभेदो ऽवश्यम्भावीति चेत् । नैवम् । पृष्ठैः स्तुवत इति विहितेषु स्तोत्रेषु रथन्तरवृहद्वामदेव्यनौधसकालेयानां पञ्चानां साम्नामुपदेशात्पृष्ठैः स्तुवतइत्यत्र पञ्चस्तोत्राणि विहितानीति शङ्कावारणार्थमेकस्मिन्नेव प्राथमिके पृष्ठस्तोत्रे वृहद्रथन्तरयोर्विकल्प इति वचनस्यापेक्षितत्वात् द्वादशस्तोत्राणि द्वादशशस्त्राणि तस्य नवतिशतं स्तोत्रीया इत्यादिलिङ्गादधिकस्तोत्रसद्भावशङ्कानिराकरणसम्भवे ऽप्यधिकसाम्नामाम्नानादवश्यं यत्र क्वचित्कल्पनीयस्य विकल्पस्य वृहद्रथन्तरयोरेव नियमार्थतया वचनस्यार्थवत्त्वोपपत्तेः । अन्यथा वृहद्रथन्तरवाक्यविधेयपृष्ठद्वयाभ्युपगमे ऽपि उक्तलिङ्गादेव तत्समुच्चयनिराकरणसम्भवेन विकल्पवचनवैयर्थ्यापत्तेरपरिहार्यत्वात् । तस्मादप्रमाणको वृहद्रथन्तरसाध्यपृष्ठस्तोत्रापूर्वभेदः । ननु तथापि वृहद्रथन्तरगतस्तोभापूर्वभेदो ऽस्त्येव स्तोभात्ऋगक्षराभिव्यञ्जकरूपदृष्टफलाभावाददृष्टार्थाः । ततश्च स्तोभापूर्वभेदादेव धर्माणां व्यवस्था सिध्येदिति चेन्नैवम् । धर्माणां वृहद्रथन्तरशब्दवाच्यऋगक्षराभिव्यञ्जकगीत्यर्थत्वेन तेषामुक्तरूपगीत्यङ्गस्तोभानां च गुणानां च परार्थत्वादसम्बन्धः समत्वात्स्यादिति न्यायेनाङ्गाङ्गिभावाभावात् । तेषां साक्षाद्वृहद्रथन्तरान्वयसम्भवेनारुणैकहायनीन्यायलभ्यपार्ष्णिकस्तोभान्वयकल्पनस्याप्यनपेक्षणात् । न च स्तोभानामपूर्वार्थकल्पनमपि युक्तम् । तेषां गीतिकालपू-

रिच्छेदरूपदृष्टप्रयोजनसम्भवात्। ननु माभूदपूर्वभेदाद्धर्माणां व्यवस्था स्तुतिप्रकारभेदात्तु भविष्यति चित्रत्वादिप्रकारिका हि बृहत्साध्या स्तुतिः रथन्तरसाध्या तु शूरत्वादिप्रकारिका। तत्त्वं नश्चित्रवचहस्तुधृष्णुया अभि त्वा शूर नोनुम इत्याद्युगनुरोधादिति चेन्मैवम्। स्तुतिप्रकारभेदसत्त्वेऽपि धर्मविधिषु वृहद्रथन्तरपदयोरपूर्वसाधनत्वलक्षणाभ्युपगमे वृहत्साध्यं पृष्ठस्तोत्रापूर्वं प्रतिसाधनत्वस्य रथन्तरे रथन्तरसाध्यन्तदेवं प्रतिसाधनत्वस्य बृहति चाविशिष्टत्वेन धर्मसांकर्यस्यानिवार्यत्वात्। तत्तद्धर्मविधौ चित्रत्वशूरत्वादिप्रकारकस्तुतिजन्यापूर्वसाधनत्वविवक्षायां विशिष्टानुवाददोषापत्तेः। चित्रत्वशूरत्वादिप्रकारकस्तुत्योः पुनानः सोम धारयेदित्यादिरथन्तराद्धृढकण्वरथन्तरादिष्वभावेन तेषु बृहद्रथन्तरधर्मातिदेशाभावरूपदोषप्रसङ्गाच्च। न चेष्टापत्तिः।अप्राकृते तद्विकारविरोधाद्व्यवतिष्ठेरन्निति नावमिकाधिकरणे भाष्यकृता कण्वरथन्तरे समुच्चितवृहद्रथन्तरधर्मप्राप्तेर्वार्त्तिककृता च विकल्पिततद्धर्मप्राप्तेर्व्यवस्थापितत्वात्। ननु तत्र नावमिके कण्वरथन्तराधिकरणे भाष्यकारसिद्धान्तितां समुच्चितधर्मप्राप्तिमुच्चैर्गेयमिति वृहद्धर्मस्य नोच्चैर्गेयमिति रथन्तरधर्मस्य च विरोधात्समुच्चयो न सम्भवतीति हि प्रतिक्षिप्य वार्त्तिककारो विकल्पितधर्मप्राप्तिं सिद्धान्तयामास, तथैव प्रकृतावपि वृहद्रथन्तरधर्माणां व्यवस्था भविष्यति प्रकृतावपि उच्चैस्त्वतदभावयोर्मेलनासम्भवस्य तुल्यत्वादिति चेत्। न। अपूर्वीयत्वलक्षणाया धर्माणां साधारण्ये सत्यतिरात्रषोडशिग्रहतदभावयोरिवाधाने

भासमानतदभावयोरिव च बृहति रथन्तरे चोच्चैस्त्वतदभावयोर्वैकल्पिकत्वाङ्गीकारेण समाधातुमुचितत्वात् कण्वरथन्तराधिकरणे तु वार्त्तिककृता विरोधो मूलयुक्तित्वेन नोक्त: किं तु तद्विकारादितिहेतुरेव। तस्य चायमर्थ: ज्योतिष्टोमविकारो हि वैश्यस्तोम: तत्र प्रकृतिवदेव बृहद्रथन्तरसामद्वयस्य विकल्पेन प्राप्तौ तदुभयकार्ये विधीयमानतया तदुभयस्थानापन्नं कण्वरथन्तरं एकस्मिन्नेव प्रयोगे तदुभयस्थानापन्नं न भवति। तस्य प्रयोगभेदेनैव प्राप्ते:, किं त्वेकस्मिन्प्रयोगे बृहत्स्थानापन्नं, प्रयोगान्तरे रथन्तरस्थानापन्नं च भवति, अत: प्रयोगभेदेनैव तस्य तदुभयधर्मग्राहित्वमिति। विरोधस्त्वभ्युच्चयत्वेन सूत्रवार्त्तिकयोरुक्त:। तस्माद्बृहद्रथन्तरपृष्ठस्तोत्रापूर्वभेदाभ्युपगमस्य गौरवपराहतत्वात्स्तोभापूर्वाणामपूर्वीयत्वलक्षणायामप्रवेशात्स्तुतिप्रकारभेदस्योच्चैर्गेयत्वादिधर्मविरोधस्य चापूर्वीयत्वलक्षणापतितमौलनसमुद्ध्यानादिसङ्करनिवारणाक्षमत्वाच्चापूर्वीयत्वलक्षणां परित्यज्यैव धर्मव्यवस्थोपपादनीया। तद्वदिहाप्यपूर्वीयत्वलक्षणा परित्यक्तव्येति भाव:। एवमपूर्वनियमविध्युदाहरणयोरपूर्वीयत्वलक्षणया व्यवसाधारण्याभ्युपगम: प्रतिक्षिप्त इदानीं परिसंख्योदाहरणे वैदोष्याभावसमर्थनमाक्षिपति।

मन्त्रेणाश्वस्य रज्जोर्ग्रहणविधि-
फलं मन्त्रबाधोऽन्यरज्जौ चैदो-

ष्यं प्राप्तबाधे प्रसरणमयते न त्विहेत्यप्ययुक्तम् । आग्नेयीन्यायतस्तामपि पुनरुपयत्केन मन्त्रो निवार्यः त्रैदोष्यं चाव्यक्तार्थान्तरमुखपरिसंख्यासु केनोपपाद्यम् ॥ ३० ॥

स्वार्थत्यागः परार्थग्रहणं प्राप्तबाध इति परिसंख्यासु प्रसिद्धं दोषत्रयं अप्राप्तपरिसंख्यासु न भवति, किं तु प्राप्तपरिसंख्यास्विति मीमांसकप्रवादः, यथेमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त इति तावदप्राप्तपरिसंख्या अनया प्रत्यक्षया श्रुत्या मन्त्रस्याश्वरशनायां झटिति विनियोगे कृते सति तावता मन्त्राम्नानस्य चरितार्थतया अश्वगर्दभरशनासाधारणविनियोजकश्रुतिकल्पकस्य लिङ्गस्याप्रवृत्त्या फलतो मन्त्रस्य गर्दभरशनातो व्यावृत्तिलाभात् । ततश्चानेन विधिना मन्त्रस्याश्वरशनायां विनियोगरूपः स्वार्थो न त्यक्तव्यः, तद्विधानात्यागप्रवृत्तेः । तस्य गर्दभरशनातो व्यावृत्तिरूपः परार्थश्च न ग्राह्यः । अर्थाल्लभ्ये तत्र शब्दव्यापारानपेक्षणात् । प्राप्तं च किंचिन्न बाधितव्यं प्रत्यक्षश्रुतेः प्राग्गर्दभरशनासाधारणविनियोजकलिङ्गाप्रवृत्तेः । एतादृशेषूदाहरणेषु निर्दोषा परिसंख्या प्रवर्त्तते । प्रपञ्चितं चैतद्वार्त्तिककारैः ।

सामान्यप्रापणाशङ्का वाक्याद्वानुमानिकात् ।
श्रुत्या प्राप्तिविशेषे च परिसंख्या तदाश्रया ॥
निर्दोषत्वं हि तत्रास्या विधाने सति लभ्यते ।
रूपप्रकरणद्वारा स्तुतिर्यावत्तु कल्प्यते ॥
तावत्प्रत्यक्षया श्रुत्या विधिः शीघ्रं समाप्यते ।
अप्राप्तविधिरेवायमतो मन्त्रस्य निश्चितः ॥
परिसंख्याफलेनोक्ता न विशेषः पुनः स्तुतेः ।
अश्वश्रुत्यैव शीघ्रत्वान्मन्त्रो प्राग्विहिते सति ॥
निराकाङ्क्षीकृतास्नाये तथा प्रकरणान्यपि ।
लिङ्गप्रकरणद्वारा श्रुतिर्नैवाभिधीयते ॥
तस्यामप्रमितायाञ्च मन्त्रप्राप्तिर्न गर्दभे ।
सो ऽयमाभाणको लोके यदश्वेन हृतं पुरा ॥
तत्पश्चात् गर्दभः प्राप्तुं केनोपायेन शक्नुयात् ।
प्रयोजनं विधेः किं स्यात् अस्येति तु निरूपणे ॥
न गर्दभाभिधानीतः फलमन्यन्निवर्त्तनात् ।
यदाश्वरशनाप्राप्तिं केवलामानुमानिकीम् ॥
प्रत्यक्षश्रुतिवत्कुर्यात्ततः सा स्यादनर्थिका ।
लिङ्गानुमितया श्रुत्या प्राप्नुयाद्रशनाद्वये ॥
समाप्राप्तयेत्येवं प्रत्यक्षा त्वरते श्रुतिः ।

इति प्राप्तपरिसंख्यायां निर्दोषत्वनियमश्च वार्त्तिककारैरत्रैवोदाहरणे स्थित्वा व्यतिरेकमुखेन प्रदर्शितः ।

यद्यस्य विनियुक्तस्य प्रत्यक्षा स्यात्पुनः श्रुतिः ।
ततश्च परिसंख्यानात्प्रसज्येत निर्दोषता ॥
यदि तु प्रतिबद्धत्वात्सामान्यविनियोगतः ।
नैवास्ति श्रुतिरश्वेति न प्राप्नोति निर्दोषता ॥

इतिषोडश्युत्तर इत्येतत्प्राप्तपरिसंख्योदाहरणम् । अत हि स्वार्थबोधनं नापेक्षितम् अङ्गिरसां द्विरात्रस्योत्तरे ऽहनि षोडशिग्रहनियमरूपस्य तदर्थस्योत्तरे ऽहन् द्विरात्रस्य गृह्यतइति द्विरात्रमात्रस्योत्तरे ऽहनि तन्नियमं बोधयता प्रत्यक्षशास्त्रेण प्राप्तत्वात्तस्य द्विरात्रान्तरेभ्यो निवृत्तेर्बोधनं त्वपेक्षितं सामान्यशास्त्रेण द्विरात्रमात्रे प्राप्तस्य तस्य निवर्तकशास्त्रं विना विशिष्य क्व चिद् द्विरात्रे संबन्धबोधनमात्रेण द्विरात्रान्तरेभ्यो निवृत्त्यलाभात्, अतः षोडश्युत्तर इत्यनेनाङ्गिरसां द्विरात्रे षोडशिग्रहनियमरूप. स्वार्थः परित्यक्तव्यः । द्विरात्रान्तरेभ्यस्तन्निवृत्तिरूपः परार्थस्य परिगृहीतव्यः । द्विरात्रान्तरेषु सामान्यशास्त्रेण प्राप्तस्य षोडशिग्रहनियमो बाधितव्य इति दोषत्रयमनिवार्यम् । अत एव परिसंख्यासूत्रे रशनादानमन्त्रपरिसंख्यामङ्गीकृतवता ऽपि भाष्यकारेण षोडश्युत्तरइत्यत्र वृत्तिकाराभिमता परिसंख्या दोषत्रयापत्त्या दशमे प्रतिक्षिप्ता इत्थं सिद्धान्तसंप्रतिपन्ना प्राप्ताप्राप्तपरिसंख्ययोस्तैर्दोषतद्भावव्यवस्थेहाक्षिप्यते । अप्राप्तपरिसंख्योदाहरणे वैदोष्यं न प्रसज्यतइति तावदनुपपन्नम्, अश्वरशनायां विनियोगेन मन्त्रस्य निराकाङ्क्षत्वे ऽपि गर्दभरशनाया मन्त्राकाङ्क्षया तत्रापि मन्त्रसंबन्धस्य निवर्तकं शास्त्रं विना वारयितुमशक्यत्वात् दृष्टं ह्यग्न आयाहि वीतय इत्यादीनां ज्योतिष्टोमप्रकरणाम्नातानामाग्नेयीनामृचां स्तोत्रादिषु विनियोगेन निराकाङ्क्षत्वे ऽपि आग्नेय्याग्नीध्रमुपतिष्ठत इति विहितस्याग्नीध्रोपस्थानस्याग्नेय्याकाङ्क्षया तत्संबन्धः । न च गर्दभरशनाग्रहणानुष्ठानं ध्यानो-

पदद्वचनादिनापि सम्भवन्न मन्त्राकाङ्क्षमिति वाच्यम्। आग्नीध्रोपस्थानमन्यप्रकरणाम्नातयत्किञ्चिदाग्नेयीसंबन्धेन सम्भवन्न प्रकृताग्नेय्याकाङ्क्षमिति वक्तुं शक्यत्वात्। अथोच्येताग्नेय्याग्नीध्रमित्यत्राग्नेयीशब्दस्याप्रकृताग्नेयीपरत्वे तस्याः क्रत्वपूर्वसंबन्धे तद्द्वारभूताग्नीध्रोपस्थानसंबन्धे च विधिव्यापारः कल्पनीय इति गौरवम्। प्रकृताग्नेयीपरत्वे तु तस्याः क्रत्वपूर्वसंबन्धस्य क्लृप्तत्वादाग्नीध्रोपस्थानसंबन्धमात्रे विधिव्यापारः कल्पनीय इति लाघवमस्ति। अतो लाघवानुसाराद्दाग्नेयीशब्दो निराकाङ्क्षामपि प्राकृतामेवाग्नेयीं गृह्णातीति कल्प्यत इति। एवं तर्हि गर्दभरशनाग्रहणे तत्तत्पुरुषबुद्ध्याचितत्थानाद्यनियतानेकोपायग्रहणे गौरवाल्लाघवानुसारेण निराकाङ्क्षमपि मन्त्ररूपम् एकमेवोपायं लिङ्गसमर्पितं गर्दभरशनापि गृह्णातीति तुल्यम्। अत एव वैकृतः सौर्यादिविधिः प्रकृतिद्रव्यतद्देवतादिजन्योपकाराकाङ्क्षः सन्ननियतयत्किञ्चित्प्रकृतिद्रव्ययत्किञ्चित्तुषविमोकादिसाधनजन्योपकारग्रहणेन निराकाङ्क्षो कर्त्तुं शक्तो ऽपि नियमे सम्भवत्यनियमगौरवमयुक्तमिति दार्शपौर्णमासिकमितिकर्त्तव्यताकलापं दर्शपूर्णमासापूर्वसंबन्धेन निराकाङ्क्षमपि स्वप्रकरणाम्नानेन क्लृप्तस्वापूर्वसंबन्धमपि गृह्णातीत्यङ्गीक्रियते। तस्मादश्वाभिधान्यादानवाक्यं स्वार्थपरत्वे तदान्यतः प्राप्तिसम्भवं गर्दभरशनातो मन्त्रनिरस्तिमेव स्वप्रवृत्तिफलं पालोच्य स्वार्थविधानपरत्वे तत्फलं लम्भयितुं न शक्यमेवेत्येतदपालोच्य विलम्बितप्रवृत्तिकेनापि लिङ्गेन कर्त्तव्यं सा-

मान्यविनियोगं परीच्य ततो विधिरूपमर्थं परित्यज्य प्राप्तनिषेधरूपमर्थं गृह्णातीत्येव वक्तव्यम्। अतः कथमिहापि त्रैदोष्यं नापद्यते यद्युच्येतान्यतः सम्भवत्प्राप्तिकस्याश्वरशनायां मन्त्रविनियोगस्य विधिरनर्थकः सन् गर्दभरशनातस्तस्य निवृत्तिं ज्ञापयेदिति। एवं तर्हि षोडशियुत्तर इत्यत्रापि तथैव द्विरात्रान्तरेभ्यः षोडशिग्रहनियमनिवृत्तिज्ञापनं भविष्यतीति तत्रापि त्रैदोष्यं नापद्यतइति स्यात्। तस्माद्वाक्यस्य स्वार्थपरतायामानर्थक्ये सति तन्मात्रेणाभिमतार्थान्तरालाभात्तत्र वाक्यस्यैव स्वार्थं विहायाभिमते ऽर्थान्तरे प्रवृत्तिरेष्टव्येति नियममाहत्यैव षोडशियुत्तर इत्यत्र त्रैदोष्यमापादनीयं, तथा सति तथैवात्रापि तदापत्तिर्निवारयितुं न शक्यते। नचैवं सत्यन्यलभ्यप्राप्तिनियमपरिसंख्याद्वारा तत्तदर्थप्राप्तिनियमपरिसंख्यानां लाभं प्रागदर्शितान्युदाहरणानि प्रत्युद्धृतानि स्युः। तदुदाहरणेष्वप्यन्यलभ्यं स्वार्थं विहायाभिमतार्थान्तरेषु शब्दवृत्तिप्रसङ्गादिति वाच्यम्। येषु वाक्येष्वन्यलभ्यस्यापि स्वार्थस्य प्रतिपादनएवाभिमतार्थप्राप्त्यादिकं लभ्यते न त्वन्यथा तथाभूतवाक्यानामेव तदुदाहरणत्वात्। तथाभूतानामेव सांग्रहण्यादिवाक्यानां प्रागुदाहृतत्वात्। तस्मादप्राप्तपरिसंख्योदाहरणे त्रैदोष्यं नापद्यतइति तावदनुपपन्नम्। तदुदाहरणे अप्राप्तपरिसंख्यात्वस्यैवानुचितत्वात्। तथा प्राप्तपरिसंख्यायां चैदोष्यं नियतमित्येतदप्यनुपपन्नम्। यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तद्यदुपभृति प्रयाजानुयाजेभ्यस्तदित्यविशेषप्रवृत्तेन प्रत्यक्षशास्त्रेण सर्वेषां प्रयाजानां

जौहवौपभृताज्यकार्यत्वमाप्तावति चायेडद्र्त्याद्यौपभृताज्यसमानयनकालविध्यधीनायां जौहवौपभृताजराज्यानुपरितनप्रयाजद्वयप्राचीनप्रयाजत्रयपरिसंख्यायां प्रापणीयातिथ्ययोश्चोदकादविशिष्टेष्टिकाङ्गकलापप्राप्तौ शंय्वन्ता प्रायणीया सन्तिष्ठते इडान्तातिथ्या सन्तिष्ठते इति शंय्विडान्तोपरमविध्यधीनायां शंय्विडोपरितनाङ्गपरिसंख्यायाम् अन्यस्यामपि एवंविधायाम् अन्यविध्यर्थलभ्यप्राप्तपरिसंख्यायां चेदोष्यासंस्पर्शात् एवं सर्वविधीनां लक्षणान्युदाहरणानि वा समञ्जसानीव प्रतिभान्ति।

इति अपूर्वनियमविध्युदाहरणाक्षेपपूर्वपक्षः समाप्तः।

एवमपूर्वविध्यादिलक्षणोदाहरणगणमाक्षिप्य प्रदर्शितेष्वपि केचिदाक्षेपाः शास्त्रमर्यादामातमाश्रित्य प्रदर्शिताः। न तु न्यायमाश्रित्य न्यायान्वेषणे तु ते ऽपि शिथिला इत्याक्षेपाक्षेपव्याजेन तत्तदाक्षेपोपजीव्यशास्त्रमर्यादाक्षेपं कृत्स्नस्यापि शास्त्रस्य परस्परविरुद्धार्थत्वशङ्कावर्हं स्थालीपुलाकन्यायेन प्रदर्शयिष्यामीति प्रतिजानीते।

अत्राप्याक्षेपवर्गे कतिचन शिथिलाः शास्त्रमर्यादया ते दोषाः स्युर्लक्षणोदाहरणगण इति प्रत्ययाद्यन्तपूर्वम्। तत्र स्थालीपुलाकप्रथितनयदिशा केषु चिद्दर्शयामः। शैथिल्यं तद्विरुद्धं सकलमिव भवेद्येन दृश्येत तन्त्रम्॥

तत्र तावदपूर्वविधिलक्षणस्य वैकृताग्निविध्यव्याप्तिरूपं प्रथमाक्षेपमाक्षिपति।

पश्वाद्यर्थो हि नैव प्रकृतिषु विकृतिष्वध्वरेष्वग्निरङ्गं कात त्वामूलभग्नात्कथय विकृतिषु

प्राप्तिवार्तातिदेशात्। अग्निष्टो-
मादिवाक्यानि तु फलजनना-
पाश्रयार्थानि लिङ्गात् तत्प्रा-
प्तिर्न प्रकृत्या न च विकृतिषु सा
तद्विधौ तत्र वृत्तेः॥

प्रकृतावङ्गस्याग्नेर्विध्यतिदेशतः प्राप्तिसम्भवात्तास्वग्निविधयो न तत्प्राप्त्यर्था किं तु तदाश्रितश्येनाकृत्यादिफलार्थगुणप्राप्त्यर्था इति दशमाध्याये ऽग्न्यतिग्राह्यस्य विकृतावुपदेशादप्रवृत्तिः गृहणे समानविधानं स्यादिति पूर्वोत्तरपक्षसूत्राभ्यां व्यवस्थापितमर्थमुपजीव्य तेष्वपूर्वविधिलक्षणस्याव्याप्तिरिति यत्तावदुक्तं तदयुक्तम्। फलार्थगुणप्राप्त्यर्थानां वैकृताग्निविधीनामेव शशशृङ्गायमाणत्वात्, तथा हि पशुकामश्चिन्वीतेत्यादिवाक्यैरग्नेः फलार्थं द्रव्यर्थवादाधिकरणे अभागिप्रतिषेधसूत्रे वार्त्तिकन्यायसुधयोरुक्तं, तथा च फलार्थस्याग्नेः प्रकृतिरूपेषु विकृतिरूपेषु च क्रतुष्वङ्गत्वमेव नास्तीत्यतिदेशमूलाङ्गत्वाभावेनातिदेशमुन्मेषादतिदेशतो विकृतिष्वग्निप्राप्तिसम्भव एवासिद्धः तस्मादतिदेशतः सम्भवत्प्राप्तिकाग्निविषयः फलार्थगुणप्राप्त्यर्था इति दशमाध्याये व्यवस्थापितमयुक्तम्। ननु य एव विद्वानग्निं चिनुत इतिवाक्योत्पन्नस्याग्नेः पशुकामादिवाक्यैः फलार्थत्व ऽपि अग्निष्टोमादिवाक्यैः क्रत्वर्थत्वमपि स्यात् ऐन्द्रवायवं गृह्णाति

मैत्रावरुणं गृह्णातीत्यादिवाक्योत्पन्नानामैन्द्रवायवादिग्रहाणामैन्द्रवायवाग्रान् गृह्णीयाद्यः कामयेत। यथापूर्वं प्रजाः कल्पेरन्निति वाक्येन फलार्थत्वेऽपि वाग्वा एषा यदैन्द्रवायवाग्रा गृह्यन्ते वाचमेवानुप्रयन्तीतिवाक्येन क्रत्वर्थत्वमिवेति चेत्। न। सिद्धरूपस्यानारभ्याधीतस्याग्नेः स्वतः फलार्थत्वासम्भवेनाग्निष्टोमादिवाक्यानां तदपेक्षिताश्रयक्रियासमर्पकतयानपेक्षितक्रत्वङ्गतापरत्वायोगात् ऐन्द्रवायवादिग्रहाणां तु ज्योतिष्टोमादिप्रकरणादेवाश्रयो लभ्यत इति युक्तं वाग्वा एषेत्यस्य क्रत्वङ्गतापरत्वं स्यादेतदग्नेः प्रकरणाभावेऽपि दीक्षणीयादिसोमप्रयोगसङ्कीर्णसावित्रहोमोखासम्भरणदीक्षणीयाविशेषिकगुणरूक्मप्रतिमोचनादिकाङ्गकलापरूपाल्लिङ्गादाश्रयो लभ्यत इत्यग्निष्टोमादिवाक्यानामपि क्रत्वङ्गतापरत्वं युक्तमिति क्रमः कथ लिङ्गात्प्राप्नुवन्ननारभ्याधीताग्निः सान्तपन्यायेन विकृतिष्वेव प्राप्नुयान्न प्रकृतौ। उत्तरवेद्यवरोधात् अतोऽत्राग्निष्टोमोक्थ्यातिरात्रवाक्यानि तावदग्नेः प्रकृत्याश्रयत्वप्राप्त्यर्थान्येव भवन्ति अग्निष्टोमादिशब्दानां प्रकृतिविकृतिसाधारणत्वेऽपि विधेरप्राप्तपक्षपातित्वेनात्र प्रकृतिपरत्वौचित्यात्। एव च श्रोत्रप्रत्तवचनसमर्पितप्रकृतिरूपाश्रयेण तदाकाङ्क्षाशान्तेर्दीक्षणीयासंबन्धलिङ्गादिकृत्याश्रयत्वकल्पना न प्रवर्त्तत इति द्विरात्रादिवाक्यान्यपि तत्तदाश्रयत्वप्राप्त्यर्थान्येव पर्यवस्यन्ति। आश्रयप्रापकविधिमायपाठादिति कुतोऽत्र क्रत्वर्थतापरत्वकल्पनाशङ्कावकाश इति भावः। यद्यप्यग्निष्टोमादिवाक्यानां फलार्थाग्न्या-

आश्रयसमर्पणार्थत्वे सति द्विरात्रादिवाक्यानां तदीयक्रत्वर्थतापरत्वे ऽपि प्रकृतावग्नेरङ्गत्वाभावेन तेषामतिदेशसम्भवत्प्राप्तिकाग्निविधित्वाभावादव्याप्त्याक्षेपो भवेदेव तथापि प्रायपाठानुरोधेनौचित्यमनुसृत्य तेषामाश्रयविधिपरत्वमुक्तमिति द्रष्टव्यम्। स्यादेतल्लिङ्गादेवाग्नेः प्रकृत्याश्रयत्वमपि प्राप्नोति पुरुषार्थसमासत्तेः काम्यं नित्यस्य बाधकमितिन्यायेन फलार्थतया बलवतस्तस्योत्तरवेदिबाधकत्वात्, पुरुषार्थप्रयुक्ता हि सर्वस्य प्रवृत्तिरतः काम्यो ऽग्निः फलस्य प्रत्यासन्नः शीघ्रं प्रयुज्यते उत्तरवेदिस्तु क्रत्वर्थो विलम्बेन पश्चात्कारप्रवृत्तिविषयः स तस्या बाधकः। न च चमसगोदोहनवदेकप्रकरणगतयोरेव नित्यकाम्ययोः काम्यबलवत्त्वन्यायः प्रकरणाम्नातानारभ्याधीतयोस्तु तयोर्नित्यमपि प्रकरणाम्नातमेव बलवत् अनारभ्याधीतस्य विकृतिष्वपि सावकाशत्वेन दुर्बलत्वादिति वाच्यम्। सामान्यत इष्वधिकृतमात्रविषये चमसः विशिष्य पशुकामविषये गोदोहनमिति सामान्यविशेषन्यायेन पशुकामातिरिक्तविषये चमसः सावकाशो गोदोहनं निरवकाशमिति सावकाशनिरवकाशन्यायेन च बलवतो गोदोहनस्यासङ्कीर्णकाम्यबलवत्त्वन्यायानुदाहरणतया सामान्यविशेषभावादिन्यायाविषयस्यारब्धादेरेव सकलमीमांसकप्रसिद्धकाम्यबलवत्त्वन्यायोदाहरणतौचित्यात्। अपि च काम्येनाग्निनोत्तरवेद्या बाधे ऽपि नात्यन्तबाधः, उत्तरवेद्यां ह्यग्निश्चीयत इति श्रुतिबलादुत्तरवेदेष्टकस्थण्डिलयोरग्निनिधाने "वेद्यां हवींष्यासादयति" "बर्हिषि हवींष्यासादयती" त्युक्तयो-

वैदिवर्हिर्षोर्हविरासादन इव समुच्चयावगमात् । तस्मा-
त्फलार्थस्याग्नेराग्याकाङ्क्षायां लिङ्गादेव विकृतिवद-
ङ्गनावेव प्राप्तिसम्भवादग्निष्टोमादिवाक्यानि सर्वाण्यपि
क्रत्वङ्गत्वपराण्येव वाच्यानि तेषु वैकृतानिविधीनाम-
तिदेशतः सम्भवत्प्राप्तिकविषयाणां श्येनाद्यात्मिफला-
र्थगुणप्रापणार्थत्वस्यावश्यवाच्यतया युक्तैव प्रागुक्ताविता-
व्याप्तिः । ननु तथाप्येतान्यग्निष्टोमादिवाक्यानि परिसं-
ख्यार्थानीतियुक्तमनारभ्याधीतेषु काम्यगुणेषु पर्णतादि-
ष्विव प्रकृतौ वा द्विरुक्तत्वादिति न्यायानवतारेणाग्नेः
समुच्चित्य प्रकृतिविकृतिरूपेषु सर्वेषु सोमेषु प्राप्तिसत्त्वा-
दिति चेन्नैवम् । तेषां प्रागपोदितक्रत्वङ्गत्वप्रतिप्रसवा-
र्थत्वस्यैव लाघवेन युक्तत्वात् । तथा हि "य एवं विद्वानग्निं
चिनुत" इत्यनारभ्याधीतवाक्येनाग्नेश्चयनसंस्कार्यत्वं श्रुतं
तच्च चयनप्रकरणोक्तचयननिर्वर्त्यस्थण्डिलापरिदेशस्था-
पनद्वारकं पर्यवस्यति । स्थण्डिलनिर्वर्त्तकेन चयनेन सा-
क्षादग्नेः संस्कार्यत्वायोगात् । तेन संस्कार्यत्वं चायतन-
विशेषनिहितेषु सम्भारेषु निधानरूपेणाधानेन संस्कार्य-
त्ववदग्नेराहवनीयात्मनोत्पादात्मकरूप न भवति । आ-
धाने पवमानेष्टिभ्यामेव तदुत्पत्तेः । अन्यथा चयननिर्व-
र्त्तिते स्थण्डिले ऽग्निस्थापनात्प्राचीनेषु अग्निहोत्रदर्श-
पूर्णमासादिष्वग्निमति क्रतौ स्थण्डिलनिर्वृत्तेः प्राचीनेषु
दीक्षणीयादिषु चाहवनीयाभावप्रसङ्गात् । एव चाह-
वनीयस्य सतश्चयनसंस्कारस्य कैमर्थ्याकाङ्क्षायामाहव-
नीयः सामान्येन क्रत्वर्थतया यदाहवनीये जुहोतीति-
वाक्येन सिद्धो विशिष्य यस्य क्रतवपूर्वस्योपयोगी स्थण्डि-

ले निधीयते तादर्थ्यमेकतद्द्वारा पर्यवस्यति। किं च सोमप्रयोगसकोशप्रयोगस्य चयनस्य सोमप्रयोगाद्वहिरनुष्ठातुमशक्यतया तन्मध्यत एवानुष्ठातव्यत्वे पाशुकधर्मजातस्याग्नीषोमीयपशुङ्गत्वमिवानुष्ठानसादेश्यलक्षणस्थानप्रमाणेनापि क्रत्वर्थत्वं प्राप्नोति। एवं प्राप्तवतस्य क्रत्वर्थस्य पशुकामादिवाक्यैश्चयनसंस्कृतस्याग्नेः फलसंयोजनं कुर्वद्भिरपवादः प्राप्नोति वाचनिकफलेन फलाकाङ्क्षाशान्त्या क्लृप्तप्रकारस्य फलस्याकल्पनीयत्वात्। एवं क्रत्वर्थत्वापवादे प्राप्ते तत्प्रतिप्रसवार्थान्यग्निष्टोमादिवाक्यानीति युक्तम्। प्रतिप्रसवेऽपि विधिलाघवस्य प्रागुपपादितत्वात्। तस्माद्यथा "य एवं विद्वान् षोडशिनं गृह्णाती"ति ज्योतिष्टोमप्रकरणाम्नातवाक्योत्पन्नस्य "षोडशिना वीर्यकामः स्तुवीते"ति फलविनियोगवचनायोदितप्रकरणलब्धज्योतिष्टोमाङ्गभावस्य षोडशियागाभ्यासस्याप्यग्निष्टोमे राजन्यस्य गृह्णीयादप्युक्थ्ये ग्राह्योऽतिरात्रेण ब्राह्मणस्य उत्तरेऽहन् द्विरात्रस्य गृह्णते मध्यमे त्रिरात्रस्य चतुर्थे चतुर्थेऽहन्यहीनस्य गृह्णतद्वतिवाक्यैः क्रत्वर्थतासिद्धिरेवमग्नेरप्यग्निष्टोमादिवाक्यैः क्रत्वर्थतासिद्धिः स्यादेवेत्याशङ्काह।

नित्याकाम्यस्य शैघ्र्यात्प्रकृतिमपि समापद्यतां लिङ्गतोऽग्निः सोऽङ्गं सचाद्यवाक्यैः प्रकृतिविकृतिषु स्याद् द्विराचादि-

गो ऽपि ॥ तद्वाक्यान्न्याद्यवाक्यैस्त्रिभिरपि निखिलाहर्गणान्प्रापिते ऽग्नौ किं वा कुर्वन्त्वंगतया प्रकृतिमिह विधिव्रातमग्नेः स्तुवन्तु ॥ २३ ॥

एवमग्निष्टोमादिवाक्यानां क्रत्वर्थत्वविधिरूपतामुपपादयता कस्मिन्विधावव्याप्तिरिष्यते । न तावदग्निष्टोमेनानुयजन्तीति विधौ, तस्य प्रकृत्यग्निष्टोमे ऽग्निप्राप्त्यर्थत्वात् । न च वाच्यमग्निष्टोमशब्दो विकृत्यग्निष्टोमस्यापि साधारणः । अतस्तवातिदेशतो ऽग्निप्राप्तिः सम्भवतीति तदीयाग्निविध्यंशे ऽव्याप्तिरिति । प्रकृतिविकृत्यग्निष्टोमयोर्विधेरेकत्वेन तद्विध्यप्रवृत्तावग्ने. प्रकृत्यग्निष्टोमाङ्गत्वासिद्धा ऽन्यत्र तदतिदेशे ऽप्यसम्भवात् । नापि तस्युवथ्येन तमतिरात्रेणेति विध्योरव्याप्तिः तयोरप्यग्निष्टोमवाक्यवत्प्रकृतिविकृतिसाधारणत्वात् । ननु प्रकृतिभूतयोरप्युवथ्यातिरात्रसंस्थावतोः क्रत्वोः अग्निष्टोमविकारत्वात्ततश्चोदकात्सम्भवत्प्राप्तिकस्याग्नेः तयोः पुनर्विधानं गुणकामप्राप्त्यर्थमिति तद्विध्योरव्याप्ति. स्यादेवेति चेदुच्यते, न तावदग्निष्टोमविकारे, तयोरप्यग्निष्टोमवत्प्रकृतिभूतज्योतिष्टोमात्मकत्वात् ज्योतिष्टोमस्यैव खल्वग्निष्टोमोक्थ्यषोडश्यतिरात्रसंज्ञकाश्चतस्रः संस्थाः । तत्राग्निष्टोमसंस्था चममवक्रत्वयां उक्थ्य गृह्णीयात्षोडशिना वो-

र्थकामः स्तुवीतातिरात्रेण प्रजाकामं याजयेदिति ज्योतिष्टोममाश्रित्य फलार्थतया विहिता गोदोहनवत्पुरुषार्था इति विशेषः। अग्निष्टोमादिसंस्था इति चाग्निष्टोमादिसंज्ञकैः स्तोत्रैः क्रतोः समाप्तय उच्यन्ते संपूर्वस्य तिष्ठतेर्धातोः समाप्तिवाचित्वात्। ततश्च यथा फलाय गोदोहनग्रहणे ऽपि तदाश्रयैर्दर्शपूर्णमासौ प्रकृतिभूतौ एवं फलार्थमुक्थ्यादिसंस्थानुष्ठाने ऽपि तदाश्रयो ज्योतिष्टोमः प्रकृतिभूत एव भवति। प्रकृतौ च तत्र नातिदेशादग्नेः प्राप्तिर्नाप्यग्निष्टोमवाक्यरूपादुपदेशात्। तेनाग्निष्टोमसंस्थावत्येव हि तस्मिन्नग्निः प्राप्यते न तु संस्थान्तरवत्यपि। यथाश्ववती बृहत्पृष्ठस्येति वाक्येनाश्ववती बृहत्यन्येव तस्मिन्प्राप्यते न तु रथन्तरसाम्न्यपि तत्रोक्थ्यसंस्थस्यातिरात्रसंस्थस्य च ज्योतिष्टोमस्याङ्गत्वेनाप्राप्तो ऽग्निरुक्थ्यातिरात्रवाक्याभ्यां विधीयते। उक्थ्यातिरात्रशब्दयोरुक्थ्यातिरात्रसंस्थविकृतिसाधारण्ये ऽप्यग्निष्टोमवाक्योक्तन्यायेन विकृतिष्वाग्नेरप्राप्तस्य विधौ भवत इति न तयोरव्याप्तिशङ्कावकाशः नापि द्विरात्रादिवाक्येऽव्याप्तिः। द्विरात्रादिष्वग्निष्टोमोक्थ्यातिरात्रसंस्थानाम् अङ्गं सत्त्वेन तेषु प्रकृतिविकृतिसाधारणाग्निष्टोमादिवाक्यैरेवाग्नेरौपदेशिकत्वस्य तदधीनगुणकामप्राप्तेश्च सम्पन्नतया तेषां गुणकामप्राप्त्यर्थाग्निविधिरूपत्वस्य वक्तुमशक्यत्वात्। न च तेषु षोडशिसंस्थस्याप्यङ्गः सम्भवेन तस्मिन्नहनि षोडशिसंस्थे प्रकृतिभूतज्योतिष्टोम इवाग्नेरौपदेशिकत्वं तेभ्यो न लभ्यत इति तदर्थं द्विरात्रादिवाक्यं स्यादिति वाच्यम्। तेष्वग्नि-

ष्टोमादिसंस्थानामप्यङ्गं मन्त्रेनाग्निस्तेपामप्यगङ्गं स्या-दिति तदङ्गसूतान्याश्रितगुणकामप्रवृत्युपपत्त्या षोड-शिसंस्थे ग्रहा रौपदेशिकत्वसंपादनस्य निष्फलत्वात् । ओपदेशिकाङ्गानुष्ठानमेव हि तदाश्रितगुणकामप्रवृत्ति-प्रयोजकं न तु यत्र तस्याङ्गस्योपदेशेन न प्रवृत्तिस्तदुपका-रकत्वाभावो ऽपि गौरवात् । किं तर्हि हिरात्रादिवाक्या-नि कुर्वन्तु । अग्निष्टोमादिवाक्यैः सर्वेष्वहर्गणेषु प्रा-प्तस्याग्नेर्हिरात्राद्यतिरिक्तेभ्यः प्रतिक्षेपरूपां परिसंख्यां कुर्वन्तु । षोडशिग्रहविषयहिरात्रादिवाक्यानीवाहरन्तरे-भ्यः प्रतिक्षेपरूपां परिसंख्याम् अत एव षोडशिनो वै-कृतत्वं तत्र कृत्स्नविधानादित्यधिकरणे षोडशिग्रहस्या-ग्निष्टोमादिष्वङ्गत्वेन विधानादतिदेशतः सर्वत्रप्राप्ति-कस्य हिरात्रादीनां तत्र तत्राह्नि पुनर्विधानं परिसंख्या-र्थमित्युक्तम् । आम्नानं परिसंख्यार्थमिति सूत्रेण । ननु षोडशिग्रहणवाक्येष्वग्निष्टोमादिशब्दानां प्रकृतिमात्र-परत्वात् हिरात्रादिष्वतिदेशतः प्राप्तिः तत्र नामत्रमिति भवत्वप्राप्ति परिसंख्या इह त्वग्निवाक्येषु तेषां प्रकृ-तिविकृतिपरत्वाभ्युपगमादुपदेशत एव हिरात्रादीना-महरन्तरेष्वपि प्राप्तिरस्तीति प्राप्तपरिसंख्यायां त्रैदो-ष्यं स्यादिति चेत् तर्ह्येव हिरात्रादिवाक्यानि समनन्त-रविधीनां स्तुतिं कुर्वन्तु । एवमेते ऽग्निष्टोमादिष्वग्निविषयः प्रशस्ता यत्त्वग्निविधानमात्रेण हिरात्राद्यहर्गणेष्वग्नि-र्लभ्यत इति इत्थमेव षाडगिरसां हिरात्रे षोडश्युत्तर-इति वचनमुत्तरे ऽहन् हिरात्रस्य गृह्यत इति हिरात्रसा-मान्यवचनप्राप्तस्य षोडशिनो हिरात्रान्तरेभ्यः प-

रिसंख्यार्थमिति वृत्तिकारमते प्राप्तपरिसंख्यार्थत्वेन त्रै-दोष्यं स्यादित्यपरितुष्यता भाष्यकृता तस्य वैखान-सपूर्वे ऽहन् साम भवतीति समनन्तरविधिस्तावक-त्वमुक्तं पूर्वस्याह्नो वैखानमाख्यवैशेषिकगुणविधिर्यु-क्तः। यदुत्तरस्याप्यह्नः षोडश्याख्यो वैशेषिको गुणो वर्त्ततद्वयोरित्येन स्तौतीति। तस्मात् द्विरात्रादि-वाक्येष्वपि नाव्याप्तिशङ्कावकाशइतिभावः। नन्वग्ना-ग्निष्टोमादयः षोडशिग्रहाग्निष्टोमादिवाक्येष्विव प्र-कृतय एव गृह्यन्तां न विकृतयोऽपि, ततश्च द्विरात्रा-दिगतेष्वग्निष्टोमोक्थ्यातिरात्रसंस्थेष्वहःसु प्रकृतिभूतेभ्यो ऽग्निष्टोमादिभ्योऽदकास्मभवत्प्राप्तिकस्याग्नेर्विधानं गुणकामप्राप्त्यर्थमेव भवेन्न तु स्तुत्यर्थं परिसंख्यार्थं वा स्तुतेर्व्यर्थप्रायत्वात्। आतिदेशिकपरिसंख्यायाश्चाप्राप्त-विषयत्वेन त्रैदोष्याभावे ऽप्यग्निप्रकरणासंनिहितगुण-कामप्राप्त्यर्थत्वसंभवे ऽसंनिहितद्विरात्रादितदतिरिक्ता-नेकाहर्गणप्रकरणगततत्तच्चोदकवाक्यानुसन्धानलभ्या-ग्निव्यावृत्तफलकल्पनस्यायुक्तत्वात्। तर्हि षोडशिग्र-हविषयद्विरात्रादिवाक्यान्यपि पूर्ववाक्यसंनिहितराज-न्यादिनिमित्तप्राप्त्यर्थान्येव स्युः न तु द्विरात्राद्यहरन्त-रचोदकपर्यालोचनालभ्यषोडशिग्रहपरिसंख्यार्थानीति चेत्तथैव सन्तु अत एव शास्त्रदीपिकायां षोडशिग्रहवि-षये द्विरात्रादिवचनमनैमित्तिकत्वार्थमित्युक्तम्। तस्मा-दुक्तमिह द्विरात्रादिवाक्ये द्व्याप्तिकथनमित्याशङ्क्याह।

अग्निष्टोमादयश्चेत्प्रकृतय इह

न स्यात्समानं विधानम् सङ्कोचश्च श्रुतीनां क्व चन नयविदां निर्निमित्तो न युक्तः। तस्माद्व्याप्तिरग्नेर्विधिषु न घटते वर्णिता वैकृतेष्वित्याक्षेपे ऽस्मिन् प्रवक्तुं नयसरणिचणैः शक्यमेतावदेव ॥ ३४ ॥

यद्यत्राग्निष्टोमादिष्टाः प्रकृतिमात्रपराः स्युः तदा गुणस्य समानविधानं स्यादिति सूत्रोक्तं प्रकृतिविकृतिगुणैः सामानविध्यं न सिध्येत् । एकविधिविधेयत्वं हि सामानविध्यम् । नन्वत्रोपदेशकल्पतयैकरूपैर्विधिभिः विधेयत्वमात्रं तद्विवक्षितं तावतैव विकृतिषु गुणकामप्राप्तिफलस्य लाभात् । न त्वेकविधिविधेयत्वपर्यन्तं विवक्षितं तावत्पर्यन्तविवक्षायां फलाभावात् । अपि चाहर्गणेष्वग्निवत्समानविधानं स्यादिति दशमाध्यायसूत्रेण तत्रैव तत्तात्पर्यस्य स्पष्टीकरणाच्च । तत्र हि द्वादशाहे व्यनीकायां रथन्तरबृहत्साम्नोराद्ययोरह्नोश्चोदकादैन्द्रवायवग्रहाग्रत्वप्राप्तिसम्भवे किमर्थं तयोः पुनर्विधानमित्याशङ्कायां सामानविध्यार्थमिति तत्फलमुपक्रम्याग्निवदिति दृष्टान्त उपन्यस्तः तत्र दार्ष्टान्तिके प्रकृतिविकृत्योर्न विध्यैक्यमस्ति प्रकृतौ यदि रथन्तरसाम्ना सोमः

इत्यादिविधिविकृतावेन्द्रवायवाग्रं प्रथममङ्गरित्यादिविधिरिति तद्विदात्, किं तूपदेशरूपतया प्राकृतवैकृतविध्योरैकरूप्यमात्रं तथैव तद्दृष्टान्ते ऽग्नावपि सामानविध्यं भवितुमर्हतीति चेत् । भवत्येवमग्न्यतिगाद्याधिकरणसूत्रसङ्गतिस्तदीयतन्त्ररत्नस्थ गतिस्तु न स्यात् । तत्र हि वैकृताग्निविधीनां परिसंख्यात्वमाशङ्क्य सामा, नविध्येन निराकृतम् । तदस्माभिः 'प्रथमश्लोकव्याख्याने स्पष्टीकृतम् । तत्तु तदा सङ्गच्छते यदि प्रकृतिविकृतिष्वग्नेरेकविधिविधेयत्वं स्यात् । भिन्नविधिविधत्वे हि प्राकृतविधिना क्लृप्तोपकारस्याग्नेर्विकृतिविशेषेषु पुनर्विधानं गृहमेधीयाज्यभागविधानवत्परिसंख्यार्थमस्त्विति शङ्का सामानविध्येन निराकर्त्तुमशक्यैव स्यात् । अत एवास्माभिः पूर्वं श्लोके प्राकृताग्निविधिभ्यो भिन्नानां द्विरात्रादिष्वग्निविधीनां परिसंख्यात्वपक्षो ऽपि दर्शितः । नन्वस्तु वैकृताग्निविधीनां परिसंख्यात्वनिराकरणे हेतुविशेषनिर्देशकतन्त्ररत्नमात्रस्यासङ्गतिस्तथापि सूत्रादिसामञ्जस्यावैकल्यादग्निष्टोमादिशब्दानां प्रकृतिमात्रपरत्वाभ्युपगमे को दोष इति चेत्तेषामविशेषप्रवृत्तश्रुतिरूपाणां निर्निमित्तः प्रकृतिषु सङ्कोच एव दोषः, तं हि न्यायविदो नानुमन्यन्ते । न हि षोडशिग्रहवाक्यगताग्निष्टोमादिशब्दानां ज्योतिष्टोममहाप्रकरणमिवाभिक्रामं जुहोतीत्यत्र जुहोतिरिति कर्तव्यताकाङ्क्षप्रयाजावान्तरप्रकरणमिव चेहानारभ्याधीताग्निष्टोमादिशब्दानां किं चित्सङ्कोचकमस्ति सङ्कोचकाभावे च यदाहवनीये जुहोतीत्यनारभ्यवादगतजुहोतेः ।

प्राकृतवैकृतसकलहोमपरत्वमिवेहाग्निष्टोमादिशब्दानां प्रकृतिविकृतिरूपसकलाग्निष्टोमादिपरत्वमेव न्याय्यम् । तस्मात्प्रकृतिमाधारयोरग्निष्टोमादिवाक्यैरेव द्विरात्रादिष्वग्निप्राप्त्या प्रकृतिवत्तेष्वपि तदाश्रितगुणकामलाभाद् द्विरात्रादिवाक्यानां पूर्वश्लोकोक्तरीत्या परिसंख्यार्थत्वं स्तुत्यर्थत्वं वानन्यगत्या स्वीकरणीयमिति तेष्वपि नास्त्यव्याप्तिः । अतो विषयसप्तमीपक्षे वैकृताग्निविधिष्वव्याप्तिरित्युक्तिर्निरालम्बनेति स्थितमेवमाक्षेपे मीमांसान्यायविद्भिरेतावदेवोत्तरं वक्तुं शक्यं किं तदिति चेत्तत्राह ।

अग्निष्टोमादिशब्दाः प्रकृतिविकृतिसंस्पर्शिनस्सन्तु नाम प्राप्त्वाम्नातसंस्थान्प्रथममथनते यान्त्यनाम्नातसंस्थान् । तत्तस्यतां द्विरात्रप्रभृतिषु विषयश्चोदकप्राप्तमग्निं श्येनाक्रत्यादिलब्ध्यै विदधतइति ते त्वव्याप्तते ति ॥ ३५ ॥

पूर्वश्लोकोक्तरीत्या सङ्कोचे कारणाभावादिमेऽग्निष्टोमादिशब्दाः प्रकृतिविकृतिगामिनः सन्तु नाम अत एव प्रकृतिसामानविध्यात्परिसंख्यात्वमनुपपन्नमिति तन्त्ररत्नवचनमप्यग्निष्टोमादिवाक्यतयाभिप्रायेण युज्यते, तथा-

पि विकृतिरूपान् सर्वानग्निष्टोमादीन्न स्पृशन्ति किं त्वग्निष्टोमादिसंस्थावतः क्रतुविशेषानन्विच्छन्तो येषु क्रतुषु प्रत्यक्षश्रुत्याम्नातास्तत्तत्संस्थाः सन्ति तेषु शीघ्रं बुद्ध्युपारूढेषु प्रथममवतरन्ति । तावता नैराकाङ्क्ष्यात् शब्दानां विरम्य व्यापाराभावाच्च तदनन्तरं विलम्बितोपस्थितिकेषु चोदकप्राप्यसंस्थेषु क्रतुषु नावतरन्ति पर्णमय्यादिवाक्यस्थितजुह्वादिशब्दवच्च चोदकप्राप्तासु वैकृतजुह्वादिषु"उपांशु पौर्णमास्यां यजन्ति"ति वाक्याभावे दर्शपूर्णमासाधिकारवाक्यस्थपौर्णमासपदमिवान्तरालविधिसामर्थ्यलब्धपौर्णमासीकाले उपांशुयाजे चाहवनीयवाक्यगतजुहोतेरप्यगुणश्च स्वकालत्वादित्यधिकरणे सर्वहोमविधिसाधारण्यं नाङ्गीकृतं किं तु ये विकृतिष्वामनहोमादय उपदिष्टा न त्वतिदिष्टास्तत्साधारण्यमेवाङ्गीकृतम् । तन्मात्रसाधारण्ये ह्यतिदिष्टसाधारण्य इव न विरम्य व्यापारप्रसक्तिरस्ति । अत एवातिदेशप्राप्येषु होमेष्वाहवनीयस्याप्यतिदेशेनैव प्राप्तिस्तदधिकरणवार्त्तिके दर्शिता । ततश्चाहवनीयेन सहैवास्यातिदेशनात् । प्रकृतौ वा द्विरुक्तत्वादित्ययं निश्चयो भवेदिति । एवं च प्रकृतानामग्निष्टोमादिशब्दानां प्रत्यक्षाम्नाततत्तत्संस्थावन्मात्रविषयतया तेष्वेवाग्नेरुपदेशतः प्रवृत्तिः. येषु तु द्विरात्रादिषु प्रत्यक्षाम्नातसंस्थाविशेषरहितेषु चोदकात् द्वादशाहिकमध्यमदशरात्रिगततत्तत्संस्थाविशेषलाभः तेष्वग्निष्टोमादिवाक्यरूपोपदेशपरित्यक्तेष्वतिदेशत एवाग्नेः प्राप्तिरिति तेषु गुणकामा न प्राप्नुयुः, अतस्तेषु सामानविध्येन गुणकामप्राप्त्यर्थमग्निविधिपराणि द्विरात्रा-

दिशाख्यानीति तेष्वव्याप्तिकथनं युक्तमित्येतावदिह वक्तुं शक्यम् । नन्वेवमेव समाधानमुच्यतां को दोष इति चेत्तत्राह ।

तत्रैतद्दूषणं स्यान्न गुणफलविधिष्वत्र वान्यत्र व्याप्तिः प्राक्चित्क्रत्वपूर्वान्वयमुपगतवानाश्रयो ऽत्रानुवाद्यः ॥ किन्त्वग्निष्टोममुख्यक्रतुसमधिगमात्प्रागनारभ्यवादे शुद्धो ऽग्निस्तस्य नैव क्वचिदपि विकृतावाश्रयत्वे ऽस्ति भेदः ॥ ३६ ॥

स्यादिदमुत्तरं यद्यग्न्याश्रितफलविधिषु अन्यत्रैवाग्निप्रकरणे ऽन्येषु वा क्रतुप्रकरणेषु किं चित्क्रत्वपूर्वान्वयित्वेन सिद्धो ऽग्निराश्रयत्वेनानुवाद्यः स्यात् । तथा हि यदि प्रागेवाग्न्याश्रितगुणफलविधिप्रवृत्तेः केषु चित्क्रतुप्रकरणेषु उपदेशेन केषु चिदतिदेशेन च तत्तत्क्रत्वपूर्वान्वयो ऽग्नेः सिद्धः स्यात्तद्व्यतिरेकेण चात्र गुणफलविधिष्वाश्रयानुवादार्थं शुद्धाग्निसमर्पकपदोऽनुवादो न स्यात् तदानीमौपदेशिकत्वबुद्धिन्यायेन प्रथमबुद्धिमयतरत्वौपदेशिके ऽग्नावाश्रयत्वेनान्विते चरममातिदेशिकस्याग्नेर-

न्वयो न भवेदिति तथापि तदाश्रयत्वेनान्वयार्थमुपदेशः सफलः स्यात्। यदि वा तत्रैव प्रकरणे किं चित्क्रतुपूर्वान्वयित्वेन सिद्ध एवाग्निरप्रणयनवद्गुणफलविध्यन्वयी स्यात् तदा गोदोहनवदन्याश्रितगुणफलविधिस्तत्रैव क्रतौ व्यवतिष्ठेतेति क्रत्वन्तरगताग्नेरपि तदाश्रयत्वसिद्ध्यर्थं यत्नान्तरं कर्त्तव्यं स्यात्। नन्वेवमनारभ्यवादरूपे ऽग्निप्रकरणे ऽग्निष्टोमादिवाक्यैः क्रत्वन्वयकरणात् प्रागेव य एवं विद्वानग्निं चिनुतइत्युत्पन्नः शुद्धो ऽग्निः श्येनाक्षत्यादिगुणफलविधिप्राश्रयत्वेनान्वेति सोमप्रयोगाद्बहिः केवलस्याग्नेरनुष्ठातुमशक्यत्वादग्निष्टोमादिवाक्यैस्तस्य क्रतुषु संयोजनाच्च यत्राग्निस्तत्रैव तदाश्रिता गुणफलविधय इत्यर्थादेव तेषामपूर्वीयाग्निसंबन्धः सिध्यति अर्थात्सिध्यच्चापूर्वीयस्याश्रयत्वं येष्वग्नेरौपदेशिकमपूर्वीयत्वं येषु चातिदेशाधीनं तेषु सर्वेष्वप्यविशेषेण सिध्यति। न ह्यत्र अतिदिष्टस्याग्नेराश्रयणे दार्शपौर्णमासिकाप्रणयनाश्रितत्वेनावगतस्य गोदोहनस्येष्ट्यन्तरातिदिष्टप्रणयनाश्रयणे वैगुण्यवदिह किं चिद्वैगुण्यमस्ति एतादृग्विषयाभिप्रायेणैवातिदिष्टाश्रयणेनापि गुणकामप्रवृत्तिरङ्गीकृता। अवैगुण्ये तु भवतु कामस्यापि प्रवृत्तिरिति तदभिप्रायेणैव भाष्यकारो ऽप्याह तस्मिन्प्रवर्त्तमाने कामो ऽपि प्रवर्त्तत इति तथा हृतिदिष्टाग्न्याश्रयणेनापि गुणकामप्राप्तिसम्भवान्न तदर्थं हिराचादिवाक्यापेक्षेति भावः। का तर्हि हिराचादिवाक्यानां गतिः स्यात्क्रतवेत्युक्तमिति चेन्न। अग्निष्टोमोक्थातिरात्रवाक्यसरूपतया तद्विधायकतया प्रतीयमानानां व्यर्थप्रायस्तातिपरत्वक-

ल्पनायोगात् । तस्मात्तद्विधित्वनिर्वाहान्यथानुपपत्त्यैवा-तिदिष्टाश्रयणेन गुणकामा न प्रवर्त्तन्तइति कल्पयिष्याम: । तथा सति हि गुणमात्रार्थता तेषां भवेदित्यनुशयानं प्रत्याह ॥

वाचस्त्वग्नेर्द्विरात्रप्रभृतिषु परिसंचक्षतामन्यतो ऽग्निम् तेष्वन्याङ्गानि यद्वा नियमनमथ वा तेषु कुर्वन्तु तस्याः ॥ येष्वेताः क्लिष्टगत्या गुणफलभवनप्रापणार्था भवेयुः षोडश्यर्थेष्विव स्यात्तदपि विधिफलं तेष्ववश्यं तथापि ॥ ३७ ॥

यदि द्विरात्रादिवाक्यानां केन चित्प्रकारेण विधायकत्वं वाच्यमिति निर्बन्धस्तदा तान्यङ्गान्तरेभ्यो ऽग्नेः परिसंख्यां कुर्वन्तु । यदि प्राप्तपरिसंख्या त्रिदोषा तदपेक्षया व्यर्थप्राप्ति स्तुतिरेव वरमिति उक्तमिति तत्रापरितोषस्तर्हि द्विरात्रादिष्वेव गृहमेधीयाज्यभागविधिन्यायेन चोदकप्राप्ताङ्गान्तरपरिसंख्यां कुर्वन्तु। यदि च द्विरात्रादिष्वतिदेशप्राप्ताङ्गसद्भावेति लिङ्गानि सन्तीति तद्विरोधात्तत्राप्यपरितोषस्तर्हि द्विरात्रादिपूक्त-

रवेद्याः पत्नप्राप्तावग्नेर्नियमनं कुर्वन्तु द्विरात्रादिचोदकपर्यालोचनालभ्योत्तरवेदिप्राप्त्यपेक्षाग्निनियमापेक्षया-ऽग्निप्रकरणाम्नाततदाश्रितगुणकामप्राप्तिर्बुद्धिसंनिहितेति तादर्थ्यमेव द्विरात्रादिवाक्यानां कल्पयितुमुचितमिति प्रथमश्लोकव्याख्याने प्रतिपादितमिति चेदिदमपि तत्र षोडशिद्विरात्रादिवचनमुदाहृत्य प्रतिपादितमेव संनिहितफलालाभे प्रकरणान्तरस्थचोदकाधीनप्राप्तिसापेक्षो नियमो ऽपि फलं भवितुमर्हतीति इह चान्यतः सम्भवन्ती गुणकामप्राप्तिः फलं न भवतीत्युक्तमेव यद्यपि क्लिष्टगत्या द्विरात्रादिवाक्यानां गुणकामप्राप्त्यर्थत्वं समर्थ्यते तथाप्यग्नेर्नियमनमपि फलं सम्भवन्न निवारयितुं शक्यम् । न ह्येकस्य वाक्यस्य प्राप्तिनियमपरिसंख्यास्वेकमेव फलमिति नियमः अनेकफलसङ्करस्य तत्र तत्र वाक्ये बहुशः प्रागुदाहृतत्वात् । किं च द्विरात्रादिवाक्येष्वेव षोडशिग्रहविषयेष्वनेकफलसङ्करः सिद्धान्ताभिमतो दृश्यते । तथा हि उत्तरे ऽहन्द्विरात्रस्य गृह्यते इत्यादिवाक्यानि तत्प्राचीनवाक्यसङ्कीर्तितं ब्राह्मणत्वराजन्यत्वरूपनिमित्ताभावे ऽपि षोडशिनः प्रापणार्थानीति तावत् शास्त्रदीपिकाकृतोक्तम् । तेनैवोत्तरे ऽहन्नितिवाक्यं प्रकृत्यतिरात्रे विकल्पितस्य षोडशिनः तथैव द्विरात्रस्योत्तरे ऽहनि प्राप्तौ तन्नियमार्थमिति । तन्त्ररत्ने प्रतिपादितम् । सूत्रकृता तु षोडशिनो वैकृतत्वं तत्र कस्त्वविधानादित्यधिकरणे उत्तरे ऽहन्नित्यादिवाक्यानि परिसंख्यार्थानीति प्रतिपादितं तत्र हि षोडशी प्रकृतौ ज्योतिष्टोमे न ग्राह्यस्तस्य मध्यमे ऽहन्नित्यादिवाक्यैः का-

हस्त्येन विकृतिसंबन्धित्वावगमात्तदनुसारेणाग्निष्टोमो-क्थ्यातिरात्रशब्दानां विकृत्यग्निष्टोमादिपरत्वौचित्यात् अन्यथा प्रकृत्यग्निष्टोमादिषु सतस्तस्यातिदेशाद्विकृतिषु प्राप्तिसम्भवेन मध्यमादिवाक्यवैयर्थ्यप्रसङ्गादिति प्रापय्य ज्योतिष्टोमप्रकरणगतानां षोडशिविषयाग्निष्टोमादिवाक्यानां द्वादशोपसत्तादिवाक्यवत्तदनन्वयिपदरहितानां प्रकरणादुत्कर्षायोगात् प्रकृतावपि षोडशी ग्राह्य इति सिद्धान्तिते किमर्थानि तर्हि मध्यमादिवाक्यानीत्याकाङ्क्षायामाम्नानं परिसंख्यार्थमिति सूत्रेणातिरात्रोक्थ्याग्निष्टोमसंस्थेष्वहर्गणानामहरन्तरेष्वपि ब्राह्मणराजन्ययोः षोडशिनः प्राप्तौ तत्परिसंख्यार्थानीत्युक्तं किमत्रफलं मयाख्यातव्यं तस्मात् षोडशिविषयहिराचादिवाक्येष्वित्राग्निविषयहिरा चादिवाकेष्वप्यनिवार्यः फलान्तरसङ्करः। अत फलान्तरेण तेषां विधित्वनिर्वाहादतिदिष्टाश्रयणेन गुणकामा न प्रवर्तन्त इति परिभाषानाश्रयणीयेति कथमपि हिरात्रादिवाक्येष्वव्याप्तिरवकाशं न लभतइति भावः। एवं हिरात्रादिवाक्येष्वव्याप्तेरनवकाशत्वं सप्रपञ्चमुपपादितम्। "पशुकाम उक्थ्यं गृह्णीयात्" "षोडशिना वीर्यकामः स्तुवीत" "अतिरात्रेण प्रजाकामं याजयेदि"ति वाक्यानि पश्वादिफलार्थं ज्योतिष्टोमाश्रितोक्थ्यादिसंस्थाद्रूपगुणविधायकानीति मतमाश्रित्योक्थ्यातिरात्रवाक्ययोरप्यव्याप्तेरनवकाशत्वं प्रागुपपादितम् ये तु मन्यन्ते पशुकामादिवाक्यानि पश्वाद्यर्थमुक्थ्याद्यधिकावृत्तियुक्तप्रकृतसोमयागविधायकानि न तु तदाश्रि-

नोक्थ्यादिसंस्थामात्रविधायकानि यत्र हि लोकतः क्रतोर्गुणान्वयो लभ्यते तत्रैव फलाय गुणमात्रस्य विधिर्युज्यते यथा गोदोहनादेः यत्र तु शास्त्रादृते न तत्सिद्धिस्तत्र न स युज्यते गुणाश्रयसंबन्धे गुणफलसंबन्धे च शास्त्रव्यापारायोगात्, किं तु तत्र गुणविशिष्टक्रतोरेव फलाय विधानं वाच्यम् अत एव "दाक्षायणयज्ञेन स्वर्गकामो यजेत" इत्यादिष्वप्यावृत्तिगुणविशिष्टस्य क्रतोरेव फलाय विधानमभ्युपगम्यते एवं च

फलकामनानिमित्तकतदधिकावृत्तियुक्तोक्थ्यादिसंस्थः सोमयागो नित्यवदाम्नाततदनावृत्तियुक्तस्याग्निष्टोमसंस्थस्य "वसन्ते वसन्ते ज्योतिषा यजेत" "ज्योतिष्टोमेन स्वर्गकामो यजेते"ति विधिद्वयप्राप्तनित्यकाम्योभयावस्थस्य सोमयागस्य विकार इति तत्र दीक्षणीयादेरङ्गकलापस्यातिदेशेनैव प्राप्तिर्न तूपदेशेन नित्यवदाम्नातदीक्षणीयाद्युपदेशस्य शीघ्रोपस्थितिकनित्यवदाम्नाताग्निष्टोमनित्यकाम्यक्रतुप्रयोगान्वयेन चरितार्थस्य विलम्बितोपस्थितिकनैमित्तिकोक्थ्यादिग्रहाद्यप्याधिकावृत्तियुक्तप्रयोगान्तरान्वयकल्पने विरक्तिप्रसङ्गादिति तन्मतायथार्थो नोक्थ्यातिरात्राग्निवाक्ययोरतिदेशतः सम्भवव्याप्तिकाग्निविधिद्वयोरव्याप्तिर्वक्तुं शक्यते इत्यत आह ।

उक्थ्यादिस्वकफलानां क्रतुसमधिगतिं सम्वतां केऽपि तेषाम् । तेनाग्निष्टोमसंस्थक्रुतविक्र-

तितयोक्थ्यादिसंस्था न सिध्येत्। किं तु स्यात्सर्वकाम्योक्त्युदितफलभिदा साधिकायां प्रकृत्यामुक्थ्यादीनां व्यवस्था प्रकरणपठनात्सर्वतस्तत्प्रसक्तौ ॥३८॥

पशुकाम उक्थं गृह्णीयादित्यादिवाक्यैरुक्थ्यादिशब्दवाच्यमुक्थ्यादिस्तोत्रैः क्रतुसमाप्तिरूपामुक्थ्यादिसंस्थामतिलङ्घ्योक्थ्यादिपदलब्धस्योक्थ्यादिसंस्थाविशिष्टस्य क्रतोः पश्वादिफलसङ्गतिरङ्गीक्रियते चेत्पशुकामादिवाक्यानि क्रतुफलविधयो न भवेयुः सर्वेभ्यः कामेभ्य इतिवाक्यान्तरेणैव क्रतोः पश्वादिसकलफलान्वयसिद्धेः। ततश्चोक्थ्यादिसंस्थे क्रतौ फलार्थस्य विध्यन्तरस्याभावात्तद्विधिविधेय उक्थ्याद्यधिकावृत्तियुक्तः क्रतुरग्निष्टोमसंस्थस्य क्रतोर्विकृतिरित्येवं न सिध्येदेव किं तर्हि पशुकामादिवाक्यैः सिध्येदिति चेदुच्यते वसन्तादिवाक्येन जीवदधिकारतया सर्वकामवाक्येन तत्तत्फलकामाधिकारतया चावगते प्रकृतिभूते ज्योतिष्टोमे तत्प्रकरणोत्पन्नानामुक्थ्यादीनामविशेषेण संबन्धे प्राप्ते पशुकामादिवाक्यैरुक्थ्यस्य पशुफलार्थं तस्मिन्संबन्धः षोडशिनो वीर्यफलार्थं इत्यादिरूपा व्यवस्था परं तैर्वाक्यैः सिध्यति यथा वृष्ट्यादिफलत्रयार्थं विहितसौभरपठितानां त्रयाणामपि हीषीत्येवमादीनां

निधनानामविशेषेण तत्संबन्धे प्राप्ते श्रीपिति इष्टिकामाय निधनं कुर्यादुगिल्यन्नाद्यकामाय उइति स्वर्गकामायेत्यादिवाक्यैर्दृष्टार्थं श्रीपिति निधनमित्यादिव्यवस्था सिध्यत्येवं दाचायणयज्ञसाकंप्रस्थायीयादावपि दार्शपौर्णमासिकसार्वकाम्यवाक्यलब्धस्वर्गपश्वादिफलविशेषे क्रतावावृत्तिसहप्रस्थानादिगुणव्यवस्थैव सिध्येन्न तु गुणविशिष्टस्य क्रतोः सार्वकाम्यवाक्योदितफलात्फलान्तरेणान्वयः तस्मादुक्थ्यादिवाक्योदितफलानां क्रतुसङ्गतिस्वीकारे ऽप्युक्थ्यादीनामग्निष्टोमविकारत्वासिद्धेस्तन्मताश्रयणे ऽप्युक्थातिरात्राग्निवाक्ययोरव्याप्तेर्नावकाश इति भावः। वस्तुतस्तु तेषां क्रतुसङ्गतिस्वीकार एवायुक्तः संस्थाविशेषविशिष्टेषु क्रतुषूक्थ्यादिशब्दप्रयोगस्य विशेष्यं नाभिधा गच्छेत् शीणशक्तिर्विशेषणादितिन्यायेन लाक्षणिकत्वात्, उक्थ्यादिफलवाक्येषु च लक्षणाकल्पने प्रमाणाभावात् । न च तेषां गुणाश्रयसंबन्धे गुणफलसंबन्धे च व्यापारायोगाल्लक्षणाकल्पनं प्रकरणादेव गुणानामाश्रयसंबन्धलाभात् तस्मादुक्थ्यादिफलवाक्येषु स्तोत्रविशेषैः क्रतुमसमाप्तय एवोक्थ्यादिशब्दवाच्याः फलाय विधीयन्ते पशुकामो यदस्तुवीत याजयेदिति तु सौर्यादिषु निर्वपत्यादिवदनुवादमात्रं .तदेतत्सर्वं शास्त्रदीपिकादिष्वेव स्पष्टम् । एवमवास्वरसो मन्यते के ऽपीत्युक्त्यासूचितः संस्थास्तु समानविधानाः प्रकरणाविशेषादितिसंस्थाधिकरणे किं सर्वसंस्थं ज्योतिष्टोमं प्रकृत्य दीक्षणीयादयो धर्मा उताग्निष्टोमं प्रकृत्येत्यादिभाष्यवचनं तु ज्योतिष्टोमस्यैवाग्निष्टोमसंस्थोक्थ्यादिसंस्थस्य च

सामानविध्यासामानविध्यविचारपरं न ग्राह्यं किं तु ज्योतिष्टोमेन तदाश्रितानामुक्थ्यादिसंस्थानां पृथक् फलवत्त्वेनेतिकर्त्तव्यतापेक्षिणीनां सामानविध्यासामानविध्यविचारपरं नेतव्यम्। अत एव यत्र यत्र गुणकामा भवन्ति तत्र तत्र क्रियायां साध्यमानायां नान्यथा तत्रेतिकर्त्तव्यतायामन्तिकमुपनिपतेत्सा साधनस्य वा साध्यस्य वेति सन्दिह्यमाना साध्यस्य भवितुमर्हति नासौ साध्यस्याभवन्ती साधनेन संबध्यतइति सिद्धान्तभाष्यवचनं सङ्गच्छते। इदं हि क्रतोः क्रत्वाश्रितगुणकामानां च फलार्थत्वेनेतिकर्तव्यताकाङ्क्षालक्षणप्रकरणाविशेषाद्दोहणोयादिषु सामानविध्यमितिपूर्वपक्षे प्राप्ते सिद्धान्तयुक्तिप्रदर्शनपरम्। अस्य चेदं तात्पर्यं गुणः फलाय चोद्यमानः पूर्वप्राप्तां परप्रयुक्तक्रियामाश्रित्य पश्चाच्चोद्यते प्रधानयुक्ता च क्रिया प्रयुज्यते ततश्च प्राक्तनस्तत्कर्मोत्पत्तिक्रियाविधिसमयएवाङ्गविधीनां व्यापारो न पश्चात् गुणफलविधाने ऽपि विरम्य व्यापारयोगादिति तस्मादयुक्तं वैकृताग्निविधिरपूर्वविधिलक्षणस्याव्याप्तिकथनमित्येवं प्रथमाक्षेपः प्रपञ्चेनाक्षिप्तः। अथाक्षेपान्तराण्यपि यथा सम्भवमाक्षिप्यन्ते। यदुक्तं सप्तदश्यवाक्यवदभ्युदयार्थत्वाङ्गीकारेण स्वर्गकामादिवाक्येष्वपूर्वविधिलक्षणाव्याप्त्युद्धारे तस्य नियमपरिसंख्याविध्योरतिव्याप्तिः स्यादिति तत्र साप्तदश्यवाक्यदृष्टान्तकथनमयुक्तमित्याक्षिपति।

तासु स्यात्साप्तदश्यं प्रकरणा-

ह्वितं यासु न श्रूयते तत्रास्य स्याद्विकल्पो विकृतिषु कथिते चोदकात्पाञ्चदश्ये । सत्येवं मित्रविन्दादिषु नियमविधिस्तस्य भूयो विधिः स्यात् सार्थक्ये सम्भवत्यभ्युदयफलकता केवलं नैव कल्प्या ॥ ३७ ॥

अनारभ्याधीतसाप्तदश्यवाक्यस्यापि प्राकरणिकसाप्तदश्यवाक्यवन्मित्रविन्दादिमात्रशरणत्वे स्यादेवमगत्याभ्युदयार्थत्वकल्पनं तदेवासिद्धान्तुरस्य प्रवृत्तिविशेषकरत्वपर्यवसायी गत्यन्तरसम्भवात् । तथा हि । यासु सौर्यादिविकृतिषु साप्तदश्यं न श्रूयते तास्वनारभ्यवादप्राप्तसाप्तदश्यस्यातिदेशप्राप्तेन पाञ्चदश्येन विकल्पं प्राप्नोतु मित्रविन्दादिषु पुनः साप्तदश्यविधानं विकल्पापवादरूपं साप्तदश्यनियमार्थमस्तु । एवं सर्वस्यापि साप्तदश्यवाक्यस्य प्रवृत्तिविशेषकरत्वसम्भवे किमित्यन्यतः सिद्धत्यर्थे केवलादृष्यर्थविधित्वमभ्युपगम्यते । नन्वनारभ्याधीतसाप्तदश्यस्य सौर्यादिगामित्वे सौर्यादिष्वतिदेशात्पाञ्चदश्यं न प्राप्नुयात् उपदेशेनातिदेशबाधात् इति चेत्सत्यमन्यत्र तथैव इह तु सौर्यादिषु साप्तदश्यं पाञ्चदश्यातिदेशबाधनेन स्वयं नियतत्वं प्राप्नोति चेन्मित्रवि-

न्द्रादिषु पुनः साम्नदश्यविधानं व्यर्थं स्यात्तथैव मित्रविन्द्रादिष्वपि सान्तदश्यनियमलाभोपपत्तेः । अतो ऽनारभ्याधीतं सान्तदश्यवाक्यं स्वस्य मित्रविन्दादिगतौ स्वैयर्थ्यं सौर्यादिगतौ पाञ्चदश्यातिदेशबाधेन प्राकरणोक्तसान्तदश्यवाक्यवैयर्थ्यं चालोच्य सौर्यादिकं गत्वा तत्र पाञ्चदश्यातिदेशं च सोढ्वा तेन सह विकल्पमनुमन्यते यथा न तौ पशौ करोतीति पशावाज्यभागप्रतिषेधस्तत्र चोदकादाज्यभागयोरप्राप्तावसत्प्रतिषेधतया स्ववैयर्थ्यं चोदकात्तयोः प्राप्तौ सर्वथा तयोः प्रतिषेधे च तत्प्रापकस्य चोदकस्याप्रामाण्यापत्तिं चालोच्याज्यभागातिदेशं सोढ्वा तदनुष्ठानेन सह विकल्पमङ्गीकरोति । एवं हि तत्र चोदकनिषेधशास्त्रयोरिवात्रापि प्राकरणिकाप्राकरणिकसान्तदश्यवाक्ययोः प्रवृत्तिविशेषकरतया साफल्यं भवति तस्मात् केवलाद्दृष्टार्थत्वे सान्तदश्यवाक्योदाहरणमयुक्तमिति भावः । यदुक्तमपूर्वविधिलक्षणे सर्वोद्देश्यानुवृत्तिरप्राप्तेरात्यन्तिकत्वमिति पक्षे त्रेधा तण्डुलान्विभजेदिति विधावव्याप्तिस्तत्र दार्शिकहविषां पूर्वदेवताभ्यो ऽपनयस्य वक्ष्यमाणदेवताभ्यो विभागस्य वा विधौ तेषां मध्ये तण्डुलदधिशृतेषु देवतापनयविभागयोरर्थसिद्धत्वेनोपांशुयाजाज्यमात्रे विधेश्चारितार्थ्यस्य वक्तव्यादिति तदाक्षिपति ।

नास्त्येवोपांशुयाजोदधिशृतसहितः पौर्णमास्यां विधानात्

तदर्थं दर्शतन्त्रे पठितमपि
ऋगाम्नातयाज्यानुवाक्यम्। ज्ञा-
त्वा चिन्त्यैव तस्य क्वचिदधि-
करणे दार्शिकेष्वस्तितोक्तिस्त-
त्त्वेधा तण्डुलानित्यनुवदनम-
तस्तत्र नार्थ्याप्तिरस्ति ॥ ३९ ॥

दधिसूत्रवदमावास्यायामुपांशुयाजो नास्त्येव उपांशु पौर्णमास्यां यजन्निति पौर्णमास्यां तद्विधानात्। न च वाच्यम् बह्वृचब्राह्मणे अमावास्याप्रकरणे उपांशुयाजयाज्यानुवाक्यायुगलपाठात्तस्यामपि सोऽस्तीति प्रधानस्योपांशुयाजस्य पौर्णमासीकालत्वे तदङ्गतया तत्परतन्त्रस्य मन्त्रस्यान्यत्र पठितस्यापि तद्गामित्वात्। अयं चार्थः सूत्रकृतैव दशमाध्याये ऽमावास्यायामुपांशुयाजः स्यादुपांशुयाजमन्तरा यजतीत्यविशेषश्रवणादिति पूर्वपक्षं कृत्वापि या पौर्णमास्यां स्यात्प्रधानशब्दसंयोगान्मन्त्रो यथा प्रधानं स्यादिति सिद्धान्तसूत्रेण स्पष्टीकृतः। प्रपञ्चितं चैतच्चतुर्दशश्लोकव्याख्याने। नाप्येतच्छङ्कनीयम् अमावास्यायामुपांशुयाजमङ्गीकृत्यापि उपांशुयाजोऽवचनात्तथाप्रकृतीत्याद्यधिकरणप्रवृत्तिर्दृश्यत इति तस्य न्यायव्युत्पादनार्थं कृत्वा चिन्तारूपतया नेतव्यत्वात्। अन्यथा पौर्णमास्यां यजन्नित्यस्य पौर्णमासीकालत्वविधायकश्रुतिव्याकोपप्रसङ्गात्। उदाहरणान्तरावलम्बनानु-

पादोदाहृततदाशमिकाधिकरणविरोधप्रसङ्गाच्च । तस्मात् त्रेधा तण्डुलान्विभजेदित्ययं वक्ष्यमाणस्य तण्डुलानां मध्यमादिभावेन विभागस्यानुवाद इत्येव युक्तम् ध्याकरग्रन्थेपूक्तरीत्यानुवादत्वपरिहाराय दार्शिकहविःसामान्ये लक्षणामङ्गीकृत्य पूर्वदेवतापनयनस्य वक्ष्यमाणदेवताभ्यो विभागस्य वा विधेयत्वाभ्युपगमे ऽपि तस्य तण्डुलदधिशृतेष्वर्थसिद्धत्वेनापाशुयाजाज्यस्याभावेन च विधेयत्वालाभेनानुवादत्वापरिहाराच्च । तस्मात् त्रेधा तण्डुलानिति विधौ सर्वोद्देश्यानुष्ठताप्राप्तभावेनाव्याप्तिवर्णनमयुक्तमिति भावः । एवमभ्युदयेष्टिवाक्ये दार्शिकहविषां पूर्वदेवताभ्यो ऽपनयस्यापेक्षामङ्गीकृत्य तस्यार्थसिद्धत्वाद्विधिवैयर्थ्यमुक्तम् इदानीन्तदपेक्षैव नास्तीति निरतरां तस्य वैयर्थ्यमाह ।

प्रत्येकं द्रव्ययुग्मे न पटु घटयितुं देवतां वाक्यमेकम् साङ्ख्यस्यापि भङ्गः पशुफलवचसा केवलं तद्विधाने तस्मात्तावद्विशिष्टानपि नियतिविधावार्त्तिवाक्योक्तरीत्या वक्तव्यो देवतानामपनयनविधिः कल्पनं क्वापि युक्तम् ॥४०॥

भवेदिह दार्शिकहविषां पूर्वदेवतापनयापेक्षा यदि तेषां देवतान्तरसंयोजनपराणि मध्यमादिवाक्यानि स्युः तदेवाथिह तथात्वे हि वाक्यभेदः प्रसज्येत तथा हि मध्यमादिवाक्यानां देवतान्तरसंयोजनपरत्वे द्रव्येष्वग्न्यादिदेवताविधानं देवतासु दातृत्वादिगुणविधानं चेति त्रिष्वपि वाक्येषु तावदेको वाक्यभेदः, दधिशृतवाक्ययोः स्थविष्ठानां दध्यणिष्ठानां शृतं चाधिकरणं विधेयम् इत्यपरो वाक्यभेदः, तथा स्थविष्ठानामणिष्ठानां चरुभावो ऽपि विधेय इति अन्यो वाक्यभेदः । स्यादेतन्नैते वाक्यभेदाः प्रसरन्ति । तथा हि दातृप्रदातृशिपिविष्टशब्दानां श्रुत्यैवाग्न्यादिपदसामानाधिकरण्यात् पदद्वयप्रतिपादितं विशिष्टदेवताकारकमेकमेव विधेयं न तु देवतास्तद्गुणाश्च प्रत्येकं विधेयाः । अभ्युदयेष्टिप्रकरणे सह श्रपयतीतिवचनमस्ति तदेतद्देवतैक्याद्दधिस्थविष्ठयोः शृताणिष्ठयोश्च सहपाकविषयं, ततश्च स्थविष्ठानामणिष्ठानां च तण्डुलानामल्पत्वाद्दधिशृतयोर्भूयस्त्वाच्च तण्डुलानां चरुत्वं दधिशृतयोरधिकरणत्वं चार्थात्प्राप्नोति । अर्थप्राप्तं च तत्सर्वमनूद्यते तत्तद्गुणविशिष्टमेकदेवताकारकं विधीयते मध्यमानां तण्डुलानामग्निर्दाता दत्ता स्थविष्ठानां दध्नीन्द्रः प्रदाता अणिष्ठानां शृतस्य च विष्णुः शिपिविष्ट इति । अतो नैवं वाक्यभेदावकाश इतिचेत्सत्यमित्थं सह श्रपणे वाक्यान्तरमङ्गीकृत्य कल्पने उक्तप्रकारेण वाक्यभेदो नास्तीति तथापि प्रकारान्तरेण वाक्यभेदः स्यादेव दधिवाक्ये दध्नि स्थविष्ठेषु शृतवाक्ये शृते चाणिष्ठेषु च प्रत्येकं

देवतासंयोजनात् । इयांस्तु भेदः पूर्वस्मिन्पक्षे स्विष्टकृति देवता प्रणीताकार्ये च दधिविधेयमिति चोदिष्टेषु देवता प्रणीताकार्ये शृतं च विधेयमितिच विधेयभेदाद्वाक्यभेदः। द्वितीयपक्षे स्विष्टकृषु दधि च चोदिष्टेषु शृते च देवताविधेयेत्युद्देश्यभेदाद्वाक्यभेद इत्युभयवाक्यविशिष्टो विध्यावृत्तिलक्षणो वाक्यभेदः। अपि चात्र मध्यमादिवाक्येषु दार्शिकहविषां देवतान्तरसंयोजनविधिरिति पक्षे पशुकामार्थमध्यमादिवाक्यसारूप्यभङ्गः प्रसज्येत। एवं हि काम्येष्टिकाण्डे श्रूयते। "यः पशुकामः स्यात्सो ऽमावास्यामिष्ट्वा वत्सानपाकुर्याद्ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधश्चरुं ये ऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुमि"ति तत्र पशुकामेष्टिविधौ मध्यमादिवाक्येषु द्रव्यदेवताविशिष्टकर्मविधिरङ्गीकृतो नवमे। तथात्रापि तथाभूतकर्मविध्यङ्गीकारे तत्सारूप्यं समञ्जसं भवति न तु देवतामात्रविध्यङ्गीकारे तस्मादिष्याप्यवाक्यभेदाय पशुकामेष्टिवाक्यसारूप्यसामञ्जस्याय च तत्तद्द्रव्यविशेषविशिष्टकर्मविधिरेवाङ्गीकर्त्तुं युक्त। ननु तत्र प्रकृतकर्मप्रत्यभिज्ञानाभावादगत्या विशिष्टविधिरङ्गीकृत. इह प्रकृते दर्श. कर्मणि प्रत्यभिज्ञायमाने नैमित्तिकदेवतान्तरमात्रविधानेन लाघवे सम्भवति विशिष्टविधिगौरवमङ्गीकर्त्तुं युक्तमिति चेन्न। आर्त्तिप्राप्यन्यायेन प्रकृतकर्मप्रत्यभिज्ञानमनादृत्याप्यवाक्यभेदाय विशिष्टकर्मान्तरविधेरेवाङ्गीकर्त्तुमुचितत्वात्। तथा हि दर्शप्रकरणएव श्रूयते"यस्योभय हविरार्त्तिमा-

ऐन्द्रं पञ्चशरावमोदनं निर्वपेदि"तिवाक्ये आर्त्तदोह प्रतिनिधित्वेन पञ्चशरावद्रव्यमात्रं कर्मणः साधनं विधीयते न द्रव्यदेवताविशिष्टकर्मान्तरं गौरवादिति षष्ठे पञ्चशरावस्तु द्रव्यश्रुतेः प्रतिनिधिः स्यादिति सूत्रेण पूर्वपक्षं कृत्वा सिद्धान्तितं प्राप्ते कर्मणि पञ्चशरावद्रव्यमिन्द्रो देवतेति द्वयं विधातुं न शक्यते वाक्यभेदप्रसङ्गात्। न च सान्नाय्यप्रतिनिधौ पञ्चशरावे सान्नाय्यदेवताया इन्द्रस्य स्थानापत्त्या प्राप्तिसम्भवादिन्द्रशब्दोऽनुवाद इति वाच्यम्। सान्नाय्ये माहेन्द्रस्यापि कदाचित्सम्भवेनेन्द्रस्य नित्यप्राप्त्यभावात् तस्मान्नित्यतयैन्द्रस्यापि विधेयत्वाद्वाक्यभेदः स्यादित्यवाक्यभेदाय द्रव्यदेवताविशिष्टदोहार्त्तिनिमित्तकर्मान्तरविधिरेवाङ्गीकर्त्तव्य इति एवं च द्रव्यार्त्यो प्रकृतस्य सान्नाय्ययागस्य द्रव्यापेक्षायां स्फुटायामपि यदि सवाय दीक्षितानां साम्युत्तिष्ठासेत्सोममपभज्य विश्वजिता यजेतेतिवाक्ये संकल्पमध्ये सत्रन्यत्क्वोत्तिष्ठासोः सोमक्रयात्पूर्वं पश्चाच्चाविशेषेण प्रायश्चित्तविधायकमिति साम्युत्थाने विश्वजित्क्रीते विभागसंयोगादित्यधिकरणे निर्णीते सोमविभागवचनस्य सोमक्रयानन्तरकालोत्तिष्ठासुयजमानकर्त्तृकस्वकीयसोमांशविभागानुवादकत्ववदैन्द्रशब्दस्येन्द्रयाजियजमानोद्देश्यदेवतानुवादकत्वमिति पक्षप्राप्तानुवादत्वाभ्युपगमेन कथं चिद्वाक्यभेदस्य परिहर्त्तुं शक्यत्वेऽप्यैन्द्रपदस्य विधेयसमर्पकत्वे सम्भवति निरर्थकपाक्षिकानुवादत्वं न कल्पनीयमिति न्यायमालमवलम्ब्यावाक्यभेदाय कर्मान्तरविधावङ्गीकृते किमु वक्तव्यमभ्युदयेष्टिवाक्ये कर्मान्तरवि-

धिरङ्गीकर्त्तव्य इति, न हि तत्रेन्द्रसंबन्धस्येवात्र यत्किञ्चिद्द्रव्यदेवतासंबन्धस्य पक्षे प्राप्तिरस्ति। येन दधिवाक्यभेदः कथं चिदपि परिह्रियेत न वा तत्र द्रव्यमात्रविधिपक्षोत्थापकप्रकृतकर्मगतद्रव्याकाङ्क्षानिमित्तद्रव्यापचारानुकीर्त्तनवदिह देवतामात्रविधिपक्षोत्थापकदेवताकाङ्क्षानिमित्तदेवतापचारानुकीर्त्तनमस्ति। न च त्रेधा तण्डुलानितिवाक्यस्य देवतापनयविधिपरत्वं स्पष्टं येन तद्विधिबलादपनीतपूर्वदेवतानां हविषां देवताकाङ्क्षास्तीति समर्थ्येत, किं तु तण्डुलशब्दस्य दार्शिकहविःसामान्यलक्षकत्वकल्पनया तद्विभागप्रतियोगिनीनां शब्दानुपात्तानां देवतानां कथं चिद्बुद्धिस्थीकरणेन चातिक्लिष्टं कल्पनीयम्। न चैवं कल्पनायां किं चित्कल्पकमस्ति मध्यमादिवाक्येषु प्रकृतहविषां देवतान्तरविधिरेव तदाकाङ्क्षार्थं पूर्वदेवतापनयमपेक्षमाणस्त्रेधा वाक्यस्यापि तद्विधायकत्वकल्पकमिति चेत्। न वाक्यभेदप्रसङ्गेन तेषां प्रकृतहविःसंबन्धिदेवतान्तरविधिपरत्वासिद्धेः। देवतापनयविधिबलादेव तेषां देवतान्तराकाङ्क्षया सोढ्वापि वाक्यभेदं मध्यमादिवाक्येषु देवतान्तरविधिरभ्युपगम्यत इत्युच्यते चेत्परस्पराश्रयो नातिवर्त्तितुं शक्यते। ननु मध्यमादिवाक्यानां प्रकृतकर्मसंबन्धिगुणमात्रविधायकत्वे सम्भवति प्रकृतहानमप्रकृतकल्पनं विशिष्टविधिगौरवमपूर्वकर्मान्तरकल्पनागौरवं न्यायस्थं परिहरणीयम्। सम्भवति चात्र प्रकृतहविःसंबन्धिदेवतामात्रविधानं यदि तदा दधिशृतवाक्ययोः प्रतिद्रव्यं एको दोषः, न ह्येकस्माद्दोषाद्बिभ्यता बहवो दोषाः स्वीक-

रणीया:। यदि वाक्यभेदोऽवश्यं परिहरणीयस्तदा मध्यमादिवाक्यानां द्रव्यदेवताविशिष्टैकप्रयोगविधायकत्वमस्तु तत्र चानेकगुणविशिष्टैककर्मविधाविव वाक्यभेदो न प्रसरति। प्रकृतहानमप्रकृतकल्पनमपूर्वकर्मान्तरकल्पनं च न भवति प्रकृतस्यैव दर्शकर्मणो द्रव्यदेवताविकारविशिष्टप्रयोगविधानादिति चेत्तर्ह्याग्निवाक्ये ऽप्येवमेव कर्मान्तरविधिर्न स्यात्। वस्तुतस्तु तत्रैवार्जवेन द्रव्यमात्रविधिर्द्रव्यदेवताविशिष्टैकप्रयोगविधिरिति वा कल्पनेन प्रकृतहानादय: परिहर्तुं शक्यन्ते तत्र द्रव्यमात्रविधिपक्षे ऽप्यैन्द्रपदस्य पक्षप्राप्तानुवादकत्वेन वाक्यभेदपरिहारसम्भवात्। इह देवतामात्रविधिपक्षे तत्परिहारासम्भवात्। तत्रैकस्यैव लिङ्. श्रवणेन विशिष्टैकप्रयोगविधिपक्षस्योपपन्नतरत्वात्। इह मध्यमादिवाक्यत्रये लिङ्त्रयश्रवणेन तावद्विकारविशिष्टैकप्रयोगविधायकत्वमसम्भवात्, अत्र तु विधायकानां लिङामनेकत्वाद्विकाराणाञ्चानेकवाक्यगतत्वेन तावद्विकारविशिष्टैकप्रयोगविधायकत्वकल्पनानवकाशात्। न च मध्यमादिवाक्यत्रवे कैकवाक्योदितविकारविशिष्टं प्रयोगत्रयं विधीयतइति युक्तम्। न वा सिद्धान्ताभिमतमेकस्मिन्नेव प्रक्रान्ते दर्शप्रयोगे अकालोपक्रमनिमित्तदेवताविकारमात्राभ्युपगमात्। परमार्थतस्तु उभयत्रापि प्रयोगविधिपक्षस्तुच्छ: प्रक्रान्तस्य दर्शप्रयोगस्य यावज्जीववाक्येन काम्यवाक्येन वा विहितस्य विध्यन्तरानपेक्षितत्वात्। प्रयोगान्तरविधेरनभिमतत्वात्। अभ्युदयेष्ट्यधिकरणे प्रक्रान्तएव प्रयोगे देवताविकारोपपादनात्। दधिशृत-

विशिष्टप्रयोगस्यासन्नयतानुष्ठातुमशक्यत्वेन सान्नाय्यसंयोगात्सन्नयतः स्यादित्यधिकरणे ऽसन्नयतो ऽप्यभ्युदयेष्टिं व्यवस्थापितवता सिद्धान्तिना मध्यमादिवाक्येषु तत्तद्देवतान्वितदधिशृतविशिष्टप्रयोगविधेरङ्गीकर्त्तुमशक्यत्वाच्च । दधिशृतयोर्देवतान्तरविधानार्थमनुवाद्यत्वे हि प्रघप्राप्तयोर्यथाप्राप्तिपाक्षिकानुवाद इत्यसन्नयतो ऽपि स्यात् न तु विधेयत्वे न, न च वाच्यं विधेयतत्तद्देवतान्विताभ्यां यथाप्राप्त्यनुवाद्याभ्यां दधिशृताभ्यां विशिष्टः प्रयोगो विधेयः स्यादिति । विधिविषयविशिष्टान्तर्गतस्य विधेयसंदष्टस्य दध्नः शृतस्य सोमा रौद्रं चरुं निर्वपेच्छुक्लानां व्रीहीणामित्यत्र व्रीहिविशेषणस्येवानुवाद्यत्वायोगात् । तस्मान्मध्यमादिवाक्येषु प्रक्रान्ते दर्शकर्मणि गुणविधिरेष्टव्यः । ननु तर्हि गुणविधिरेवास्तु यस्य हविर्निरुप्तमित्याद्यधिकारिविशेषणादकालोपक्रान्तप्रकृतकर्मप्रत्यभिज्ञाने जायति तत्र गुणमात्रविधानमतिलङ्घ्य गुणविशिष्टकर्मान्तरविधिकल्पनायोगात् । ज्ञाते चैवं प्रत्यभिज्ञाबलाद्गुणविधितात्पर्ये तदनुरोधेनापतन्नानेकद्रव्योद्देशेन देवतागुणविधानप्रयुक्तो वाक्यभेदो न दोष इति चेदेवं तर्ह्यार्त्तिवाक्येष्वेवमेव गुणमात्रविधिः स्यात् तत्रापि यस्योभयं हविरित्यधिकारिविशेषणतः सान्नाय्यहविष्कप्रकृतकर्मप्रत्यभिज्ञानात् । यत्तु हविर्नाशे कर्मण एव नाशात्तत्र प्रकृतकर्मप्रत्यभिज्ञा नास्तीति । तन्नुच्छम् । उपात्तहविर्नाशे हविरन्तरोत्पादनेन कर्मानुष्ठानस्य शेषाद्वदाननाशे स्यात्तदर्थत्वादित्यधिकरणे व्यवस्थापितत्वेन यस्य सर्वाणि हवींषि नश्येयुर्दुष्येयुर-

पहरेयुर्वा श्वाश्येन तो देवता: परिसंख्याय यजेतीतिश्र-वणेन च कर्मलोपापराक्तरकालकृतमकृतमिति प्रसिद्धे-रन्यायकालापक्रान्तकर्माभावन प्रत्यभिज्ञानाभावस्य व-क्तुं शक्यत्वात्। तस्मादार्त्तिवाक्यद्व मध्यमादिवाक्ये-ष्वपि कर्मान्तरविधिरेव वक्तव्य इति नास्ति तत्र दार्शि-कहविषां पूर्वदेवतापनयस्योपयोग: कर्मान्तरविधौ त-ण्डुलादीनामुपादेयत्वेन प्रकृतग्रहणे कारणाभावात्। ये मध्यमा इति यच्छब्दस्य सतो ऽपि द्रव्यदेवता-विशिष्टकर्मविधौ तण्डुलानामुद्देश्यत्वापादनासमर्थत-या पराक्तमेष्टिगतमध्यमादिवाक्यगतयच्छब्दस्येवावि-वक्षितार्थताया एव प्राप्तेः। अत एवातञ्चनाभ्या-सलिङ्गसमर्थने कर्मान्तरविधिपक्षे प्रकृतद्रव्यग्रहणा-भावो ऽभ्युदयेष्ट्यधिकरणएव वर्णितः। एवं हि तत्। यदि बिभियादभिमोदेष्यतीति मध्यरात्रे हवींषि निर्व-पेत् फलीकृतैस्तण्डुलैरुपासीतार्धं दधि हविरातञ्चना-र्थं निदध्यादर्धं न यदाभ्युदियात्तेनातश्च्य प्रचरेदादि-नान्येद्युस्तेन ब्राह्मणं भोजयेदिति। अस्यार्थ: व: प्रहत्त-दर्शतन्त्रो यजमान: किमद्य चतुर्दश्यामेवामावास्याभ्रा-न्त्या दर्श: प्रारब्ध: किं चन्द्रमा अभ्युदेष्यतीति शङ्कया भय: प्राप्नुयात्तन्मध्यरात्रमेव रात्रौ व्रीहीन्निरुप्यावहत्य फलीकृत्योदीक्षमाणा आसीत सायन्दोहसंपादितं च द-धि द्विधा विभज्य तदर्धं मुख्यकाले करिष्यमाणस्य द-र्शस्यार्थे तत्पूर्वदिनमार्येदोह सम्पाद्य दध्यातञ्चनाय नि-दध्यात् अर्धान्तरं तदर्थं न निदध्यात्। एवं कृते यद्य-भ्युदय: स्यात्तदा मुख्यकाले दर्शप्रारम्भानन्तरमातञ्चनार्थं

निहितेनार्धेन दध्ना सायंदुग्धे पयस्यातञ्चनं कृत्वा द-
ध्युत्पाद्याग्रेद्युर्दधियागं निर्वर्त्तयेत् । यदि नाभ्युदयस्त-
दानीमातञ्चनार्थं विहितादर्धादन्येनार्धेन तदर्थनिष्ट्त्ते-
स्तदर्थं दध्युत्पादनानपेक्षणेनातञ्चनार्थं निहितमर्धं ब्रा-
ह्मणभोजनेन प्रतिपादयेदिति । तदेतदातञ्चनाभ्यास-
दर्शनं सिद्धान्तलिङ्गत्वेन वर्णितम् । यदि कर्मान्तरमभ्यु-
दयेष्टिः स्यात्तदा पशुकामेष्टाविव दधिशृतयोरधिकर-
णत्वेन प्रणीताकार्यविधानादुपादेयत्वेन च प्रकृतग्रहणे
प्रमाणाभावात् लौकिकएव दधि पयसि च श्रपणं
कृत्वा सायन्दोहेनाकालकृतेनापि प्रायश्चित्तनिर्हृत-
कालापराधदोषेण मुख्यकाले दर्शः कर्त्तव्यो न दध्य-
न्तरमुत्पादनीयम् । यदि त्वकाले प्रक्रान्तमेव दर्शकर्म
देवताविकारयुक्तं सदभ्युदयेष्टिः स्यात्तदा तदर्थं कृतेन
दध्ना तस्यैवानुष्ठितत्वान्मुख्यकालकर्त्तव्यदर्शार्थमवश्यं द-
ध्यन्तरमुत्पाद्यमिति अर्धयदातञ्चनम् । तत्रामुख्यकाल-
कृतसायन्दोहार्धेनैवातञ्चनं कार्यमित्येतावान्विशेषो वि-
धीयतइति । नन्वेवं सति शान्तिकर्मणि वैतालोदय: क-
र्मान्तरविधिपक्षे प्रकृतग्रहणप्रमाणाभावप्रदर्शनार्थमा-
तञ्चनाभ्यासलिङ्गमुपवर्णयता त्वयैव कर्मान्तरविधौ लि-
ङ्गानुपपत्तिरुद्घाटिता । अतः कर्मान्तरविध्युपगमो न
युक्त इति चेत् । उच्यते । आतञ्चनाभ्यासलिङ्गं समर्थ-
यमानेन सिद्धान्तिना कर्मान्तरविधिपक्षे प्रकृतग्रहणा-
भावः समर्थित इत्येतावदस्माभिरिक्षोपन्यस्त नत्वातञ्च-
नाभ्यासस्य सिद्धान्तलिङ्गत्वमनुमोदितम् । अकालकृ-
तदधः कर्मान्तरतयाप्यातञ्चनाभ्यासोपपत्तेः । प्रायश्चि-

स्तेनाकालकृताग्निप्रणयनदेवतापरिग्रहादिप्राप्तापचारनिर्हरणवदकालकृतदर्भः कर्माङ्गत्वमपि तेन कृतमित्यत्र प्रमाणाभावात् । न हि स्तेयप्रायश्चित्तेन स्तेयदोषनिर्हरणवत्स्तेयलब्धद्रव्यस्य कर्मार्हत्वमपि क्रियते । एवं कार्मान्तरविधिपक्षे प्रकृतद्रव्यग्रहणं नास्तीति सिद्धान्त्यभिमानमनुसृत्य देवतापनयविधेरनुपयोग उक्तः । वस्तुतस्तस्मिन्नपि पक्षे प्रकृतद्रव्यग्रहणनियमोऽस्त्येव यतस्तल्लिङ्गमेव यदि बिभियादित्यादिवाक्ये मध्यमादिवाक्ये च जागर्त्ति । तथा हि फलीकृतैस्तण्डुलैरुपासीतेति फलीकरणपर्यन्तमेव कृत्वा तण्डुलभावविनाशकं पेषणमकृत्वाभ्युदयसदसद्भावनिर्णयपर्यन्तं प्रतीक्षणविधानादिदं ज्ञायते मध्यमादितण्डुलविभागापेक्षायामभ्युदयेष्टामेतएव तण्डुला इति अन्यथा पेषणात्प्रागेव प्रयोगमवसाप्य प्रतीक्षणमदृष्टार्थं स्यात् । तथा आतञ्चनार्थस्य दध्यर्धस्याभ्युदयाभावपक्ष इव तदन्यस्य दध्यर्द्धस्याभ्युदयपक्षे प्रतिपत्त्यभिधानादिदं ज्ञायते अभ्युदयेष्टां तदेवान्यदर्धं दधीति । अन्यथाभ्युदयाभावपक्षे दध्यन्तरोत्पादनस्यानपेक्षितत्वादातञ्चनार्थं दध्यर्धस्य प्रतिपत्त्यपेक्षावदभ्युदयपक्षे तदितरार्द्धस्य लौकिकदधिसाध्यायामभ्युदयेष्टां दध्यन्तरोत्पादननिर्वर्त्यमुख्यकालदर्शे चानुपयोगात्प्रतिपत्त्यपेक्षास्तीति तत्प्रतिपत्तिरप्युपवर्ण्येत । तथा "विष्णवे शिपिविष्टाय शृते चरुमि"ति शृतपदप्रयोगात् ज्ञायते ऽभ्युदयेष्ट्यां वैदिकमासिकया दृष्ट्या शृतशब्दवाच्यः प्रातर्दोह एव पयो न तु लौकिकं पय इति । अन्यथा आदित्यः प्रायणीयः पयसि चरुरित्यत्रेव

पयःशब्द एव प्रयुज्येत। ननु पशुकामेष्टौ लौकिकपयः साधारणायामपि शृतपदं श्रूयते। सत्यं तत्र शृतशब्दः श्रपणयतो लौकिकपयसो लक्षणार्थ इति सूत्रकृतैवोक्तं पशुकामेष्ट्यधिकरणे लक्षणार्था शृतश्रुतिरिति। न चेह लक्षणायां प्रमाणमस्ति। प्रकृतस्य शृतशब्दमुख्यार्थस्य सम्भवात्। ननु कर्मान्तरार्थद्रव्याणां कर्मान्तरार्थत्वमयुक्तमिति चेत्। किमेकस्मिन्नपि वा कर्मणि देवतान्तरार्थद्रव्याणां देवतान्तरार्थत्वं युक्तम्। वचनबलाद्युक्तमिति ह्युभयत्रापि तुल्यम्। एवं च कर्मान्तरपक्षे ऽप्यातञ्चनाभ्रामउपपन्नः प्रकृतस्य दध्नः कर्मान्तरे विनियुक्तत्वेन मुख्यकालकर्त्तव्यदर्शे दध्यन्तरापेक्षासत्त्वात्। एवं तर्हि देवतापनयविधेरनुपयोगः प्रत्युक्तः स्यात् दार्शिकद्रव्याणां कर्मान्तरे ऽभ्युदयेष्टौ विनियोगार्थं दार्शिकदेवतापनयविधेरपेक्षितत्वात्। अर्थसिद्धविधेर्नास्त्युपयोग इति चेत्। एवं पूर्वश्लोकप्रदर्शितार्थसिद्धत्वहेतुनैवाप्यनुपयोगवर्णनायामत्र श्लोके समर्थितस्य कर्मान्तरत्वस्याहेतुतया तद्वैयर्थ्यप्रसङ्ग इति चेत्। उच्यते। पूर्वश्लोके तण्डुलादिष्विवोपांशुयाजाख्ये देवतापनयस्यार्थसिद्धत्वाभावात् तत्र तद्विधेरर्थवत्त्वमित्याशङ्का अमावास्यायामुपांशुयाजाभावसमर्थनेन निराकृता। अत्र तु तस्यामभ्युपगम्याप्युपांशुयाजमभ्युदयेष्टेस्ततः कर्मान्तरत्वसमर्थनेन सा निराक्रियते कर्मान्तरत्वे हि तत्रोपांशुयाजाभावेन तद्विषयतया देवतापनयविधेरर्थवत्ता न भवतीति भवः। एवं तर्ह्यभ्युदयेष्टेः कर्मान्तरत्वे ऽपि तद्देवताभ्यः प्रकृतहविषा

विभजनविधिः स्यादेव उपांशुयाजाख्ये तस्यार्थवत्त्वात् कर्मान्तराभ्युदयेष्टावुपांशुयाजाभावे ऽपि प्रकृतहविरन्तर्गतोपांशुयाज्यस्याभ्युदयेष्टिदेवताभिर्विभजनोपपत्तेरित्याशङ्कामुद्भाव्य निराकरोति।

तर्हि स्याद्देवताभ्यः प्रविभजनविधिस्तत्र तद्गामिनीभ्यो न स्यादेवं हि सर्वास्वपि दधिशृतयोर्देवतास्वन्वयः स्यात्। तस्मिन्वाक्ये विधेयं विभजनमिह चेद्वक्ष्यमाणप्रकारं न स्यादौपांशुयाजे हविषि तदिति तत्सर्वथा व्यर्थमेव ॥ ४१ ॥

यदि प्रकृतहविषामविशेषेणाभ्युदयेष्टिदेवताभ्यो विभजनमभिमतं तदा दधिशृतयोरपि सर्वदेवतान्वयः स्यात्। उत्तरत्र तयोर्विशिष्य सङ्कीर्त्तनं स्थविष्ठैरणिष्ठैश्च तण्डुलैः सह श्रपणनियमार्थं स्यात्। अथ वक्ष्यमाणप्रकारेण विभजनविधिस्त्रेधा तण्डुलान्विभजेदिति वाक्ये ऽङ्गीक्रियते। तथा च दधिशृतयोर्वक्ष्यमाणदेवताविशेषव्यवस्था न भज्यत इति मतं तदौपांशुयाजाख्ये वक्ष्यमाणो देवतान्वयप्रकारो नास्तीति विभजनवाक्यं तद्विषयत्वेनार्थवन्न भवेत्। तण्डुलदधिशृतेषु तु तद्वाक्यैरेव तथा वि-

भजनं सिद्धमिति सर्वथा व्यर्थमेव चेधा तण्डुलानितिवाक्यम् । अतस्तण्डुलशब्दलक्षणाक्लेशेऽपि तद्वैयर्थ्यानपाया-त्तस्य तथाश्रुतानुवादकत्वमेव युक्तमिति तत्र विध्यभावात्तद्विध्यव्याप्तिवर्णनमत्यसमञ्जसमिति भावः । एवमाचिन्त्यपूर्वविध्यादीनां लक्षणेषूदाहरणेषु च लक्षणानि व्यवस्थापयितुं नियमपरिसंख्यालक्षणसंग्राह्यसन्देहपदानि निर्धारयन्नेव लक्षणव्यवस्थापनं प्रतिजानीते ।

एवं प्राप्ते भणामस्त्रिविधविधिजुषां लक्षणानां विभागम् दृष्टार्थो यः स सर्वो भवति नियम इत्यभ्युपेत्य व्यवस्थाम् । अर्थाद्वा शब्दतो वा स्वविषयगलितादेवकारान्नृचो वा यः स्यात्कस्यापि वाधः स भवति परिसंख्येति रीतिं च कृत्वा ॥ ४२ ॥

प्रागग्रताग्न्यादिविधीनां दृष्टार्थानामप्राप्तविषयत्वादपूर्वविधित्वमङ्गीकृत्य तेषु लक्षणाव्याप्तिरुक्ता । पूतीकाधारमन्त्रनियमविध्यतिव्याप्त्युद्भावनेन तत्समानन्यायतया सर्वेषामपि दृष्टार्थविधीनां नियमविधीनां नियमविधित्वमपि सूचितम् । तथा निषेधरूपविधिषु अपूर्वविधि-

लक्षणाव्याप्त्युद्भावनेन दीक्षितो न जुहोतीत्यादीनामपूर्वविधित्वं सूचितम् । तथा निषेधमात्रस्य परिसंख्यात्वाभ्युपगमो ऽप्यसूचितेनात्र नियमपरिसंख्यालक्षणसंग्राह्यासंग्राह्यसन्देहप्राप्ताविदमुच्यते । अप्राप्तविषयः प्राप्तविषयो वा यो विधिर्दृष्टार्थः स सर्वो ऽपि नियमविधिरित्यभ्युपगच्छामः । अप्राप्तविषये ऽपि तस्मिन्नियमादृष्टाभ्युपगमावश्यं भावात् । तथा हि दृष्टार्थाप्राप्तविधिविषयो द्विविधः, विधिं विना स्वतः प्रसिद्धदृष्टप्रयोजनजननसामर्थ्यो, विधिबलप्रसादनियततज्जननसामर्थ्यश्च, तत्रौदुम्बरो यूपो भवतीत्याद्यः प्रकृतौ यूपे पक्षप्राप्तो ऽप्युदुम्बरः खदिरादिनियमविधिना निवर्त्तित इति विकृतावपि चोदकात् खदिरादेरेव प्राप्त्या प्रतिप्रसवविधिविषयन्यायेन सोमापौष्णपशावप्राप्तैवोदुम्बरजातिरष्टास्रत्वादिविशिष्टयूपाकृतिजनने स्वत एव प्रसिद्धसामर्थ्या च । उत्तरावारशाखाच्छेदनमन्त्रोत्करपरिध्यादिर्द्वितीयः विधिबलादेव हि हिरण्यगर्भे मन्त्रस्य गौणवृत्तिकल्पनया इन्द्रप्रकाशने इषेत्वेति मन्त्रस्य छिनद्मीत्यध्याहारेण शाखाच्छेदनप्रकाशने उत्तरस्य पृथ्वग्रताकरणेन वाजिनपात्रधारणे परिधेः स्वविभवग्रहणेन पशुनियोजने च सामर्थ्यं प्रसाधनीयम् । ततश्च तद्द्वैविध्यात्तद्विषयो विधिरपि द्विविधः । एवं द्विविधे ऽप्यप्राप्तफलके दृष्टार्थविधौ नियमादृष्टाभ्युपगम आवश्यकः चोदकप्राप्तखदिरादिनापि सम्भवति यूपादिस्वरूपमात्रे उदुम्बरादिनियमविधानस्यानर्थक्यात् । अत एवाहुः दृष्टार्थेष्वपि सर्वेषु नियमादृष्टमिष्यत इति । अन्यथाऽवहननादिनियमविधावपि

नियमादृष्टकल्पनं न स्यात् । नानोपायसाध्ये दृष्टप्रयोजने विशिष्टस्य कस्य चिन्नियमो ऽनर्थकस्तस्य क्रत्वपूर्वोपयोगित्वमपि तज्जन्यं द्वारं विनानुपपन्नं क्रत्वपूर्वस्य प्रधानानुष्ठानानन्तरभावित्वादित्येतदेव हि तेषु नियमादृष्टकल्पनायां बीजम् । तदिहापि तुल्यम् । नियमादृष्टाभ्युपगमे च नियमविधित्वमेव प्राप्नोति । अत एव पूतीकाविधेः पक्षप्राप्तविषयत्वाभावे ऽपि नियमविधित्वम् । सर्वे द्रव्यविधयो नियमविधय इत्याकारेण सकलमीमांसकप्रवादश्च । अपि च नावमिके पत्नीसंयाजाधिकरणे पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्त इत्यस्य भाष्यादिषु यन्नियमविधित्वमुक्तं तदप्यप्राप्तस्यैव पत्नीसंयाजान्तत्वस्य दृष्टार्थतामात्रेण न तु तस्य पाक्षिकप्राप्त्या तदसम्भवात् । तथा हि । यद्यपि द्वादशानामह्नां सहप्रयोगवचनात्पूर्वंपूर्वमहः कस्मिंश्चित्पदार्थेऽवस्थाप्य परम्परमुपक्रमितव्यम् । तथापि पत्नीसंयाजेष्ववस्थापनं पक्षे ऽपि न प्राप्नोति उपांश्वादिहारियोजनपर्यन्तः सोमयागो ह्यहःशब्देनोच्यते । यथोक्तं तन्त्ररत्ने ज्योतिष्टोमे ऽहःशब्देन उपांश्वादिहारियोजनपर्यन्तः सोमयागः परिच्छिन्न इहापि द्वादशाहे एवं द्रष्टव्यमिति । तथा च सहत्वसिद्ध्यर्थं हारियोजनानन्तरमेवावस्थानं प्राप्नोति यदि तु वसतीवरीपर्यन्तानि पूर्वाणि तन्त्रमध्यकालत्वादवभृथादीन्युत्तराणि तस्य दीक्षात्रिसर्गार्थादिति सूत्रोक्तरीत्या द्वादशाहे वसतीवरीपर्यन्तानां पूर्वेषामवभृथादीनामुत्तरेषाचाङ्गानां तन्त्रत्वे ऽपि भेदस्तु तद्दृष्टात्कर्मभेदः प्रयोगः स्यात्तेषां प्रधानशब्दादितिसूत्रोक्तन्यायेन प्रधानैरहर

ङ्गालान्यङ्गानि तत्तत्प्रधानकाले भेदेनानुष्ठेयानीति तत्तत्तुल्यकालीनानामैष्टिकप्राशुककर्मणां माङ्गानां तत्र तत्राहनि भेदेनानुष्ठानं प्राप्नुयात्। तथा कार्त्स्न्येन प्राशुकैष्टिकप्रयोगसमाप्त्यनन्तरमेवावस्थानं प्राप्नोति सर्वथापि पत्नीसंयाजानन्तरमवस्थानस्य न पाक्षिकी प्राप्तिरस्ति। तथा च पत्नीसंयाजान्तो ऽग्नीषोमीयः सन्तिष्ठत इतिवदप्राप्तविधिरेवायम्। तथापि सहत्वनिर्वाहकतयादृष्टार्थतासत्त्वात्तावन्मात्रेण नियमविधित्वं भाष्यादिप्रयुक्तमिति समर्थनीयम्। अनियमप्राप्ते पत्नीसंयाजान्ते संस्थातव्यमिति नियम्यत इति भाष्यं च हारियोजनान्तत्वादेरेव प्राप्त्या पत्नीसंयाजान्तनियमस्याभावे प्राप्त इत्येव योजनीयम्। यस्मिन्कस्मिंश्चिदनियमेनावस्थाने प्राप्ते पत्नीसंयाजान्तता नियम्यत इति तन्त्ररत्नमपि हारियोजनप्रचारे पश्वादिसमापनकर्मणि वा यस्मिन्कस्मिंश्चित्पत्नीसंयाजान्तनियमं विना ऽवस्थाने प्राप्तइति योजनीयम्। न तु यथाश्रुत ग्राह्यं पत्नीसंयाजान्ततायाः अनियमतः प्राप्त्यसम्भवस्योक्तत्वात्। परिसंख्यालक्षणाक्षेपे तु यथाश्रुतभाष्याद्यनुरोधादनियमो ऽभ्यभिधुपन्यस्तः तस्मादृष्टार्थः सर्वो विधिर्नियमविधिरिति युक्तमेव। न चैवं पुत्रेष्टिकारीर्यादिविधेर्नियमविधित्वप्रसङ्गः। अदृष्टाद्वारकत्वस्यापि विवक्षितत्वात्। यथार्थोद्दा स्वविषयप्रच्युतात्लक्षणोकशब्दाद्दा एवकाराद्दा नञ्पदाद्दा लभ्यो यस्य कस्यापि भावस्याभावस्य वा यो बाधः स सर्वो ऽपि परिसंख्येति मर्यादां कुर्महे। तत्रानिन्द्रायेडोबर्हिः प्रतिसमानयति जुह्वा-

मौपभृतमित्यर्थादुपरितनप्रयाजद्वये जौहवाज्यस्य प्राचीनप्रयाजत्रये औपभृताज्यस्य च बाधः। आहवनीय इत्यत्र यदाहवनीये जुहोतीति सामान्यशास्त्रप्राप्तिर्विधिस्वरूपविषयप्रच्युताद्प्राप्तनिषेधरूपार्थान्तरलक्षकात्तस्मादेव शब्दादग्निहोत्राङ्गयन्तराधासीप्याहवनीयबाधः। अत्र ह्येवावपन्तीत्यत्रैवकारेण पवमानातिरिक्तस्तोत्रेष्वावापबाधः। न तौ पशौ करोतीत्यत्र नञ्पदेन पशावाज्यभागबाधः। स्यादेतन्न नञ्पदलभ्यः सर्वो ऽपि निषेधः परिसंख्येत्यङ्गीकर्त्तुं युक्तं विधाविव निषेधे ऽपि अपूर्वविध्यादिरूपेण त्रैविध्यसम्भवात्। शक्यते हि दीक्षितो न जुहोतीत्यादिरपूर्वविधिः। न हि स्यादित्यादिर्नियमविधिः नानुयाजानित्यादिः परिसंख्येति वक्तुमिति चेत्। नैवम्। परिसंख्याशब्दार्थवर्जनबुद्धिजनकस्य नञो ऽपि परिसंख्यात्वस्याप्रत्याख्येयतया तद्योगेन जुहोति न हिंस्यादित्यादेरपि परिसंख्यात्वस्यानिवार्यत्वात्। तत्र चान्यत्र च प्राप्त इति लक्षणानुसारेणापि तस्य परिसंख्यात्वप्राप्तिः। तद्यावर्त्तनाय तत्र विशेषणान्तरविवक्षायाश्च परिसंख्यालक्षणाक्षेपे दूषितत्वात्। अत्र ह्येवावपन्तीति परिसंख्यायां तत्र चान्यत्र च प्राप्त इति यथानुगतलक्षणस्याव्याप्त्यभावाच्च। तस्माद्यो लक्ष्य एवकारप्रतिपाद्यो नञर्थभूतश्च सर्वो ऽपि निषेधः परिसंख्येति युक्तम्। उक्तं च न्यायसुधायां परिसंख्यावर्जनबुद्धिस्तद्धर्थो नञादिः परिसंख्याशब्दस्तद्योगाद्ब्राह्मणो न हन्तव्यो नेक्षेतोद्यन्तमादित्यमित्यादीनामेव श्रुत्या परिसंख्यात्वं निषेधपर्युदासविशेषव्यपदेशात्तु व्यवहारसिद्धेर्न परिसं-

ख्याव्यपदेशः। सत्यमेव वदितव्यमित्यादीनामेव श्रुत्या नियमत्वम्। अन्यत्र तु फलेनैव नियमपरिसंख्याव्यपदेश इति। एवं दृष्टार्थः सर्वो ऽपि विधिर्नियमविधिरिति सर्वो ऽपि निषेधः परिसंख्येति चाङ्गीकृत्यापूर्वविध्यादीनां लक्षणानि विभज्य दर्शयिष्यन्त इत्यर्थः। तान्येवाह।

नित्यौदास्यान्यकिं चिद्विगलितनियतं यस्य तत्प्राप्तिमात्रम्
तत्कालं यस्य बोधःसमुदयति निवृत्त्यात्मनावश्यमेव॥ प्राप्तिं
भिन्नस्य ताभ्यां कथमपि विदधत्स्यादपूर्वो विधिर्नः कुर्वन्प्राप्तिं तयोः स्यात्सनियमपरिसंख्याभिधानः क्रमेण॥ ४२॥

नित्यं यदौदासीन्यं विपक्षप्राप्तिसाध्यरहिततया नित्यप्राप्तं यदौदासीन्यं तदन्यस्य कस्य चिद्विगलितेन निवृत्त्या नियतं यस्मात्प्रसक्त्यावच्छिन्नं तन्नियमविधिषु नियम्यं कर्म तदेकमपूर्वविधिलक्षणे व्यापार्यं तथा यस्य तद्विधिकाले निवृत्त्यात्मतया धीर्नियता सा तस्मिन् विधौ परिसंख्या नाम तदपरत्व व्यापार्यं ताभ्यामुभाभ्यां भिन्नस्य कथमपि प्राप्तिं विदधद्विधिर्नो ऽस्माकं

अपूर्वो विधिः स्यात् । तयोरुभयोर्नियम्यनिवृत्त्योः प्राप्तिं कुर्वन् विधिः क्रमेण नियमपरिसंख्याविधिः स्यात् नियम्यप्राप्तिं कुर्वन्नियमविधिः निवृत्तिप्राप्तिं कुर्वन् परिसंख्याविधिश्च स्यादित्यर्थः । तदेतल्लक्षणत्रयं विविच्य दर्शयामः । नियम्यपरिसंख्यान्यप्राप्तिकारी विधिरपूर्वविधिः । तत्प्राप्तिकारित्वं च यथा कथंचिद्विवक्षितं न तु कश्चित्तत्र विशेषो विवक्षितः । तेन विधिविषयस्यान्यस्य वा प्राप्तापोदितस्यात्यन्ताप्राप्तस्य वा यस्य कस्य चित् स्वरूपेण किं चिद्विशेषणान्तरावच्छिन्नत्वेन येन केन चिद्रूपेण प्रकृतविध्युद्देश्ये ऽन्यत्र वा यत्र कुत्र चित् प्रकृतविध्युद्देश्ये ऽपि सर्वत्र क्व चिदपि वा क्रियत्यां प्राप्तौ सत्यामसत्यां वा यथा कथं चित्प्राप्तिं कुर्वन्नित्ययमर्थो लभ्यते । तेन पूर्वोद्भावितसर्वाव्याप्तिनिरासः । तथा हि । अग्न्यतियाद्यविधिषु तावन्नाव्याप्तिः । तेषां विधिविषयप्राप्तिकारित्वाभावे ऽपि तदाश्रितगुणक्रमप्राप्तिकारित्वात् । अथताविषयस्तु पूतीकादिविधिवन्नियमविधयो वक्तव्या इति न तेष्वव्याप्तिशङ्का भवति । किं तूद्देश्यप्राप्तिकारिणि तावन्नताग्नीषोमावाज्यस्यैव तावुपांशु पौर्णमास्यां यजन्निति विध्यन्तरएव द्वयमपि शङ्का लभते । उद्देश्ये ऽन्यत्र वेति विशेषानुपादानात् । स्वर्गायाग्निहोत्रविधिषु नानाशाखाम्नातविधिषु च नाव्याप्तिः, तेषां स्वरूपेण प्राप्तिकारित्वाभावे ऽप्यभ्युदयशिरस्कत्वेन प्राप्तिकारित्वात् । ननु स्वरूपेण यदप्रापणीयं तदेव प्रापणीयं भवति न तु प्राप्तमप्राप्तविशेषणविशिष्टतामात्रेण स्वयं प्रापणीयतां लभते विवक्षितविवेकि-

न । तथा सति क्वचिदंशे अपूर्वविधिरूपाणामंशन्तो नियमविधिरूपाणां परिसंख्याविधिरूपाणां च विधीनां नियमपरिसंख्याभिन्नत्वाभावेनासंग्रहप्रसङ्गात् । सन्ति हि तथाभूता विधयः प्रागुदाहृताः ते चानुपदमेव विवेचयिष्यन्ते । ननूक्तलक्षणमनुपपन्नं प्राकृतपृष्ठविध्योरव्याप्तेः ताभ्यां विधिभ्यां प्रापणीययोर्बृहद्रथन्तरसाधनकपृष्ठाख्यस्तोत्रयोर्विकृतिविशेषे उपहव्यादिषु विध्यन्तरैर्नियम्यत्वात् । न च प्रकृतविध्यनियम्यत्वं विवक्षितं प्रकृतपृष्ठविधिनियम्याप्रसिद्ध्या तदन्यत्वोक्त्यसम्भवेन तथा युक्ताव्याप्तितादवस्थ्यादिति चेन्न । किं चिद्विषयकप्राप्तित्वावच्छिन्नं नित्यप्राप्तौदासीन्यभिन्नकिञ्चिन्निवृत्तिनियतं यस्य भवति तत्र तन्नियम्यमिति विवक्षितत्वात् । अस्ति च प्रकृतौ ज्योतिष्टोमे बृहत्प्राप्तित्वावच्छिन्नस्य रथन्तरप्राप्तित्वावच्छिन्नस्य चौदासीन्यभिन्नविदलननिवृत्त्या नियतेभ्यो ऽवहननप्राप्त्यादिभ्यो ऽन्यत्वम् । ननु च बृहद्रथन्तरयोः प्रकृतौ विकल्पितत्वात्तयोः प्राप्तिरन्योन्यनिवृत्तिनियतैव । अत एव द्वितीये रथन्तराधिकरणे "यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात्" "यदि बृहत्सामा शुक्राग्रानि" त्यत्र रथन्तरमात्रसामकस्य बृहन्मात्रसामकस्य च गायत्रादिसामरहितस्य क्रत्वन्तरस्य विधिरङ्गीकरणीयः । ज्योतिष्टोमे गायत्र्या महीयवादानेकसामान्तरव्यावर्त्तनाक्षमस्य रथन्तरस्य बृहतश्च विशेषणत्वायोगेन तस्य रथन्तरविशिष्टतया बृहद्विशिष्टतया च निर्देशायोगात् इति पूर्वपक्षे प्रापृते नीलमुत्पलमित्यादौ सर्वत्र नैल्यादिविशेषणं स-

मानजातीयस्य रक्तिमादेरेव व्यावर्त्तकं न तु गन्धादेरपीति। तद्वदिहापि ज्योतिष्टोमे रथन्तरं बृहच्च पृष्ठस्तोत्रसाधनतया स्वसमानजातीयस्य बृहतो रथन्तरस्य च व्यावर्त्तकमिति तयोर्नैल्यादिवद्विशेषणत्वोपपत्तेर्ज्योतिष्टोमस्यैवाग्रताविशेषं विधातुं बृहत्सामेति रथन्तरसामेति च निमित्ततया निर्देशो न तु सामविशेषविशिष्टयोः क्रत्वन्तरयोर्विधिरिति सिद्धान्तितं दशमे। उभयसामि नैमित्तिकमित्यधिकरणे च येषु संसवादिषु बृहद्रथन्तरपृष्ठसमुच्चयो विहितस्तेषु बृहद्रथन्तरयोः परस्परव्यावर्त्तकत्वाभावेन निमित्तत्वाभावान्नैमित्तिकमग्रतार्थं उपवन्तौ रथन्तरपृष्ठस्य प्रतिपदं कुर्याद्‌ग्रवतीं बृहत्पृष्ठस्येतिविहितं नैमित्तिकं प्रतिपदन्तरं च न कर्त्तव्यमिति सिद्धान्तितमिति चेत्। उच्यते। रथन्तरं पृष्ठं भवतीत्यादिवाक्याभ्यां तयोर्ज्योतिष्टोमे प्राप्तिर्न ते परस्परव्यावर्त्तके। अपूर्वसाधनयोस्तयोः प्रयाजादिवत्समुच्चयस्यैव ततः प्राप्तेः। किं तु विधिवाक्यसिद्धं तदुभयमनूद्य साक्षादेव विकल्पं विदधता वचनान्तरेण रथन्तरपृष्ठं बृहत्पृष्ठं वा कर्तव्यं न तूभयं समुच्चितमिति सिद्धं तदुभयमनूद्य साक्षान्निर्देशो यदि बृहत्सामेत्यादयस्तैरनूद्यमान एव रथन्तरादिसंबन्धः परस्परव्यावर्त्तकः। अतस्तत्र रथन्तरप्राप्तित्वावच्छिन्नस्य बृहत्प्राप्तित्वावच्छिन्नस्य च किं चिन्निवृत्तिनियतत्वाभावान्नाव्याप्तिः। अन्यदिह वक्तव्यशेषं लक्षणत्रयसाधारणमग्रे वक्ष्यते। तस्माद्युक्तमपूर्वविधिलक्षणं नित्यप्राप्तौदासीन्यभिन्नकिंचिन्निवृत्तिनियतं यस्य यद्विषयप्रा-

प्तित्वावच्छिन्नं तत्र तत्प्राप्तिकारिविधिर्नियमविधिः। अवहननस्य हि दार्शपूर्णमासिकेषु व्रीहिषु प्राप्तिराक्षेपिकी वैधी वा सा द्विधापि नित्यप्राप्तौदासीन्याद्भिन्नस्य विदलनादेर्नियतया विदलनादिनिवृत्त्या नियता। आक्षेपिकी तु पाक्षिक्येवेति अवहननादिप्राप्तित्वावच्छिन्ने विदलनादिनिवृत्तिनियममात्रमविशिष्टं यद्यप्यत्रहननप्राप्तित्वावच्छिन्नं विदलनादिनिवृत्तिनियतं न भवति। अग्निचयने औदुम्बरमुलूखलं सर्वौषधस्य पूरयित्वावहत्यथितउपदधातीत्युपधेयोलूखलसंस्कारत्वेन विहितस्यावहननस्य वैतुष्यार्थत्वाभावाद्विदलनादिप्रसक्त्यभावेन तत्रावहननप्राप्तौ सत्यामपि विदलनादिनिवृत्त्यभावादिति चेत्। सत्यम्। तथापि दार्शपौर्णमासिकव्रीहिविषयकावहननप्राप्तित्वावच्छिन्नस्य विदलनादिनिवृत्तिनियतत्वमस्तीति लक्षणानुगतिः। अत एव किं चिद्विषयकत्वं प्राप्तिविशेषणमर्थवत्। एवं च वैकृतेषु रथन्तरपृष्ठादिनियमविधिष्वपि नाव्याप्तिः, प्राकृतोत्पत्तिवाक्यतः प्राप्तौ व्यभिचारेण रथन्तरप्राप्तिमात्रस्य बृहदादिनिवृत्तिनियतत्वाभावे ऽपि उपहव्यादिविकृतिषु या चोदकाक्षिकी रथन्तरादिप्राप्तिर्या च वैशेषिकेण नियमविना वैशेषिकी तत्प्राप्तिस्तस्याः द्विविधाया अपि बृहदादिनिवृत्तिनियतत्वात्। न चैवं विकृतिषु बृहदादिनियतप्राप्तिकस्य रथन्तरादेः प्रकृतौ प्राप्तिकारी विधिरपि नियमविधिः स्यादिति वाच्यम्। न हि यस्य किं चिद्विषयप्राप्तित्वावच्छिन्नमुक्तरूपनिवृत्तिनियतं तस्य यत्र क्वचित्प्राप्तिकारित्वं नियमविधिलक्षणमुक्तम्। किं तु-

यस्य यद्विषयप्राप्तिरव्यवच्छिन्नसकृद्रूपनिवृत्तिनियतं तस्य तत्प्राप्तिकारी विधिर्नियमविधिरिति ततश्च तस्यान्यत्र प्राप्तिकारिणि विधौ कुतो लक्षणातिप्रसङ्गः। नन्ववहननस्य दार्शपौर्णमासिकेषु व्रीहिषु नियतैवाप्राप्तत्वाभावपर्यायाप्राप्तिर्न तु विलम्बितोपस्थितिकादाक्षयादनियता काचित्प्राप्तिरस्ति तत्कथमिह द्विविधापि प्राप्ति निवृत्तिनियतेति लक्षणानुगतिः समर्थिता। उच्यते। यस्य यत्र यथावत्प्रवृत्तिर्नातर्किता। न वा प्रमाणेन सम्भाविता सर्वापि प्राप्तिस्तद्रूपनिवृत्तिशिरस्कैव भवेत् तत्र तत्प्राप्तिकारी विधिर्नियमविधिरिति स्वतःसिद्धतर्कितसाधारणेन सम्भावितप्राप्तिगर्भं लक्षणं विवक्षितं तथा चावहननस्य यथावत्प्रवृत्ते नियमविधिना तर्कितेनाक्षेपेण च सम्भाविता प्राप्तिः रथन्तरस्य च यथावत्प्रवृत्तेन वैशेषिकवचनवैशेषिकरचनापरामर्शात्प्रकृतौ बृहद्रथन्तरविकल्पमपि क्रोडीकृत्य प्रथमं यथाप्रवृत्तेन चोदकेन च सम्भाविता प्राप्तिश्च विच्छलनहङ्कारादिनिवृत्तिनियतैव भवेदित्युपपन्ना लक्षणानुगतिः। एवमेवोदाहरणान्तरेष्वपि लक्षणानुगतिर्द्रष्टव्या। नन्वेवमप्युत्तरेऽहन् द्विरात्रस्य गृह्णात इति षोडशिग्रहनियमविधौ लक्षणस्याव्याप्तिः। तत्र षोडशिग्रहप्राप्तिव्यतिरिक्तायास्तेन सह प्रकृतौ विकल्पितस्य षोडशिग्रहाभावस्य निवृत्तेरभावेन षोडशिग्रहप्राप्तौ तदभावनिवृत्तिनियतत्वासम्भवादिति चेन्न। अभेदेऽपि व्याप्तिसत्त्वेन तत्सम्भवाद् भेदगर्भव्याप्तेरविवक्षितत्वात्।

इति संक्षेपः।